अथर्ववेदसंहितायाः

पञ्चमं काण्डम्

अभिनवसायणभाष्य–समन्वितम्

卐

भाष्यकाराः

वेद-दर्शनाचार्याः महामण्डलेश्वराः

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः



सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः

तथा

म० म० पं० नवलकिशोर-काङ्करः

卐

सद्गुरु-गङ्गेश्वर-इण्टरनेशनल वेदमिशन


बम्बई


श्री वीरराघवन जी

को सादर [illegible]

— [illegible]

२२/6/95





श्री गुरुगङ्गेश्वरग्रन्थमालापुष्प-३६

शौनकीयायाः

अथर्ववेदसंहितायाः

पञ्चमं काण्डम्



भाष्यकाराः

वेद-दर्शनाचार्य-महामण्डलेश्वर-

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः



सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः


तथा

विद्यावाचस्पतिः कविशिरोमणिः गद्यसम्राट्

महामहिमोपाध्यायः

आचार्य-नवलकिशोर-काङ्करः

प्राप्तराष्ट्रपतिसम्मानः





प्रकाशकः

सद्गुरु-गङ्गेश्वर-इण्टरनेशनल वेदमिशन

तुलसी निवास, चर्चगेट, बम्बई-२०

१९८५

पुस्तकप्राप्तिस्थानानि

तुलसीनिवास, फ्लैट ३१, चर्चगेट, डी रोड़, बम्बई-२०

गुरुगङ्गेश्वरधाम, तिडके कॉलोनी, त्र्यंबकरोड़, नासिक-२

गङ्गेश्वरधाम, १३ पार्क एरिया, करोलबाग, नई दिल्ली-५

चतुर्वेद शोधसंस्थान, श्रौतमुनिनिवास, वृन्दावन (मथुरा)

मुद्रकः

चन्द्रोदय प्रिंटर्स, जयपुर।



प्रथमं संस्करणम्

५००

मूल्यम्

पञ्चत्रिंशद्रूप्यकाणि

विदेशेषु पञ्चदश डालराणि

भूमिका

अखिलसृष्टिप्रपञ्चस्य, निखिलवाङ्मयस्य, भारतीयायाः संस्कृतेर्मानवीयाया धर्मपरम्परायाश्च जीवातुभूतो भगवान् वेद एवेति संशीतिशून्यं वचः । अत एव 'वेदोऽखिलो धर्ममूलम्', 'वेदाद् धर्मो हि निर्बभौ' इत्यादिकं शास्त्ररहस्यं प्रतिपादयन्तः स्वकीयमभीष्टञ्च प्रदर्शयन्तः स्मृतिकारा महान्तो महर्षयोऽपि निरवशेष-वर्णाश्रम-धर्माणां, समस्तवाङ्मयप्रपञ्चानां मानुष्यरक्षणौपयिक-सकलकर्मणाञ्च मूलभूतस्यास्य भगवतो वेदस्य किमप्यपूर्वं महत्त्वं प्रत्यपीपदन् । वेदस्येदमेव वेदत्वं यत् स प्रत्यक्षेणानु-मानेन वा दुर्बोधमज्ञेयमुपायं स्वयं सहजमेव बोधयति । यथोक्तमभियुक्तैः --

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।। इति ।

भगवतो वेदस्येदमेव वैशिष्ट्यं मनसि निश्चिन्वन् याज्ञवल्क्यः शतपथब्राह्मणे स्पष्टमुद्घोषयति--

यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां ददल्लोकं जयति, त्रिभिस्तावन्तं जयति, भूयांसं च अक्षय्यं च य एवं विद्वान् अहरहः स्वाध्यायमधीते तस्मात् स्वाध्यायोऽध्येतव्यः । (११।५।६१)

अर्थाद् वित्तवैभवपरिपूर्णपृथिवीदानादप्यधिकं फलम्, किमन्यदक्षय्यं लोकमपि मानवः प्रतिदिनं वेदस्वाध्यायेन लालभ्यते ।

भगवान् मनुरपि वेदविदो विदुषो विषये स्पष्टं लेलिखीति--

वेदशास्त्रार्थतत्त्वज्ञो यत्र कुत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ।।

(मनुस्मृतिः १२।१०२) इति च ।

महाभाष्यकारेण मुनिना पतञ्जलिनाऽपि ब्राह्मणानां कृते षडङ्गवेदस्या-ध्ययनमावश्यकमुद्घुष्टम्- "ब्राह्मणेन निष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्च" (पातञ्जलमहाभाष्यम्) । मानवधर्मप्रवर्त्तकेन मनुमहाराजेन तु मनुस्मृतौ (१।१२८) वितुन्नेन चित्तेन समकथि--

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।। इति ।

सोऽयं वेदो मूलत एक एवावर्त्तिष्ट, महर्षिर्व्यासः पुनर्यज्ञविधानमाधारीकृत्य ऋग्-यजुः-सामाथर्वनामभिरस्य चातुर्विध्यं चकार :--

वेदान् विव्यास यस्मात्स वेदव्यास इति स्मृतः । (म०भा०)

तत्र पातञ्जलमहाभाष्यानुसारमेकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यम्, नवधा आथर्वणो वेदः । चतुर्णां वेदानां शाखाग्रन्था एकत्रिंशदुत्तरैकशत-(११३१)-सङ्ख्यावन्तो भवन्ति । प्रत्येकशाखायाः पुनरेकैकं ब्राह्मणम्, एकैकोपनिषत्, एकैकञ्चारण्यकमपि भवति । इमे च सर्वे ग्रन्थास्त्रिणवत्यधिकत्रयस्त्रिंशच्छत (३३९३) सङ्ख्याका जायन्ते । मन्त्रसंहितानां सम्मेलनेन चैते ग्रन्थाश्चतुर्विंशत्यधिकपञ्चचत्वारिंशच्छत (४५२४) सङ्ख्यां स्पृशन्ति । शातपथी श्रुतिस्तु वेदसङ्ख्यामेवं निर्दिशति- **"ते सर्वे त्रयो वेदाः, दश च सहस्राण्यष्टौ च शतान्यशीतीनाम्"** इति । अत एव भगवान् तित्तिरिः **'अनन्ता वै वेदाः'** (तै ब्रा० ३।१०।११।३) इत्युल्लिख्य वेदानामानन्त्यं स्व्यचेक्रीयिष्ट । औपनिषत्का आरण्यकाश्च भागा न ब्राह्मणातिभिन्ना इति कृत्वा महर्षयो **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"** इति मानं मानं सर्वानिमान् मन्त्रग्रन्थान् ब्राह्मणग्रन्थांश्च वेदनाम्नैव व्याचख्युः । साम्प्रतन्तु समयचक्रप्रभावत उपर्युक्तासु शाखासु बह्वचो नामशेषतां गताः । इदानीम् ऋग्वेदस्य द्वे शाखे प्राप्येते- बाष्कलशाखा शाकलशाखा च । ब्राह्मणग्रन्थावपि द्वावेव नेत्रातिथितामायातौ- ऐतरेयब्राह्मणं कौषीतकीयब्राह्मणञ्च । यजुर्वेदो विभागद्वये विभक्तः- कृष्णः शुक्लश्च । तत्र कृष्णयजुषस्तैत्तिरीया, काठकी, मैत्रायणी चेति तिस्रः शाखा उपलब्धाः सन्ति । शुक्लयजुषः शाखास्वपि माध्यन्दिनी काण्वी चेति द्वे शाख एव पश्यामः । कृष्णयजुषस्तैत्तिरीयं ब्राह्मणं शुक्लयजुषश्च शतपथब्राह्मणं लभ्यते । साम्नां सहस्रशाखासु सम्प्रति तिस्र एव शाखा अवलोक्यन्ते- कौथुमी, जैमिनीया, राणायणीया चेति । वेदस्यास्य ताण्ड्य-षड्विंश-मन्त्र-दैवताऽऽर्षेय-सामविधान-संहितोपनिषज्जैमिनीयनामभिः प्रसिद्धा अष्टौ ब्राह्मणग्रन्थाः सुलभाः सन्ति । अथर्ववेदस्य तौद - भौदप्रभृतिनवसु शाखासु साम्प्रतं पैप्पलादी शौनकी चेति द्वे शाखे दृश्येते । ब्राह्मणञ्चास्य गोपथमेकमेव प्राप्यते ।

तस्यैतस्य पृथुप्रथितस्य वेदस्य वास्तविकस्वरूपमपरिचिन्वतः सन्तः शास्त्रकाराश्चास्य पौरुषेयत्वापौरुषेयत्वसम्बन्धेऽपि नैकमत्यं कलयन्ति । यथा मीमांसादर्शनप्रवर्त्तयिता मुनिर्जैमिनिः कथयति- **"अनित्यदर्शनाच्च"**,**"उक्तं तु शब्दपूर्वकत्वम्"**, **"आख्याः प्रवचनात्"**,**"परन्तु श्रुतिसामान्यमात्रम्"** (मीमांसा १।१।२८।३१), **"शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्"**, **"अत एव च नित्यत्वम्"** (मीमांसा० १।३।२८-२९) इति । एतदनुसारं मीमांसकानामयमभिप्रायः सिध्यति यदिमे वेदा

अकृतकाः कर्त्तुः श्रवणाभावात् । ये च वत्स-कश्यप-कण्वप्रभृतयो महर्षयो विद्यन्ते ते तु मन्त्रद्रष्टारो न पुनः कर्त्तारः । अतः पुरुषेणारचितत्वादिनेऽपौरुषेयाः । परमिमे स्वयमपि नोत्पन्नाः, यतः शब्दानां नित्यत्वं सर्वस्वीकृतमस्त्येव । जगतोऽनादित्वाच्चैषां शब्दानामर्था अपि नित्या एव । शब्दार्थयोः सम्बन्धस्य नित्यत्वेऽपि न कस्यचन विप्रतिपत्तिः । साहित्यसम्प्रदायेऽपि कालिदासेन वागर्थयोः सम्पृक्तत्वमवर्ण्यत । अत एवेमे शब्दार्थमूलका वेदा अपि नित्या अपौरुषेयाश्च ।

अथ साङ्ख्यशास्त्रविदो वदन्ति– **"न नित्यत्वं वेदानां कार्यत्वश्रुतेः", "न पौरुषेयत्वं तत्कर्त्तुः पुरुषस्याभावात्", "मुक्तामुक्तयोरयोग्यत्वात्", "न पौरुषेयत्वान्नित्यत्वमङ्कुरादिवत्", तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः" "यस्मिन्नदृष्टेऽपि कृतबुद्धिरुपजायते, तत्पौरुषेयम्"** (सां० सू० ५।४५-५०) इति । अर्थाद्यथा प्रकृतेर्नियममनुसृत्य वृक्षाङ्कुरादयः सूर्यचन्द्रग्रहादयश्च स्वयमुत्पन्नास्तथा वेदा अपि स्वयमुत्पन्ना अतोऽनित्या वेदाः, किन्तु वेदरचयितुः पुरुषस्य प्रतिपत्तिर्नास्त्यतोऽपौरुषेया अपि ते ।

वैशेषिका वैयाकरणाश्च निगदन्ति–**"बुद्धिपूर्वा कृतिर्वेदे, ब्राह्मणे संज्ञाकर्मसिद्धिलिङ्गम्"** (वैशे० सू० ६।१।१-२), **"आर्षं सिद्धदर्शनञ्च धर्मेभ्यः"** (वैशे० सू० ६।२।१३) इति च । "न हि छन्दांसि क्रियन्ते, नित्यानि छन्दांसीति····" । **यद्यप्यर्थो नित्यः । या त्वसौ वर्णानुपूर्वी सा अनित्या । तद्भेदाच्चैतद् भवति– काठकं कालापकं मौद्गलं पैप्पलादकम् । शौनकादिभ्यश्छन्दसि"** (महाभाष्यम् ४।३।१०६) । कैयटश्च भाषतेऽत्र "महाप्रलयादिषु वर्णानुपूर्वीविनाशे पुनरुत्पद्य ऋषयः संस्कारातिशयाद्वेदार्थं स्मृत्वा शब्दरचनां विदधतीत्यर्थः" इति । "तेन दृष्टं साम" (५।४।२७) वासिष्ठं वैश्वामित्रं कालेयम् । यस्य साम्नो विशिष्टकार्यविषयो विनियोगो ज्ञानातिशयसम्पत्त्या कलिनाऽज्ञायि तत्तेन दृष्टमित्युच्यते" इति च ।

एवमेभिः सुधीभिर्वेदानां विवक्षा द्वेधा स्वीक्रियते– शब्दरूपेणार्थरूपेण च । वेदशब्दव्यवहारे वाक्यप्रधानतायां वेदा महर्षिभिर्विरचिताः, अतस्ते पौरुषेया अनित्याश्च, किन्तु वाच्यविद्याप्रधानतायामिमेऽकर्तृका अपौरुषेया नित्याश्चेति ।

अथ नव्यनैयायिकानामुदयनाचार्यः सङ्गिरति––

प्रमायाः परतन्त्रत्वात् सर्गप्रलयसम्भवात् ।
तदन्यस्मिन्ननाश्वासान्न विधान्तरसम्भवः ॥

"स्यादेतद् । परतः प्रामाण्येऽपि नित्यत्वाद्वेदानामनपेक्षत्वम् । महाजनपरिग्रहाच्च प्रामाण्यमिति को विरोधः । न, उभयस्याप्यसिद्धेः । यदा च वर्णा एव न नित्यास्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां पदानाम्,

कुतस्तराञ्च तत्समूहरचनाविशेषस्वभावस्य वाक्यस्य, कुतस्तमां तत्समूहस्य वेदस्य ? परतन्त्रपुरुषपराधीनतया प्रवाहाविच्छेदमेव नित्यतो ब्रूम इति चेद् एतदपि नास्ति, सर्गप्रलयसम्भवात्–इति ।" (द्वि० स्तबक १ कारिका व्याख्या)

अथैतत्कथनमनुसरता श्रीगङ्गेशोपाध्यायधीमताऽप्येवमलेखि तन्निष्कर्षोऽयं सिध्यति यन्नेमे वेदाः कूटस्थनित्याः, न वा प्रवाहनित्याः । तेन वेदानां नित्यत्वाभ्युगपमस्तावन्नावकल्पते । किन्त्वनित्यत्वेऽपि न वेदानां महर्षिकर्तृत्वं सम्भवम्, अतीन्द्रियार्थविषयतयाऽतीन्द्रियार्थद्रष्टुरीश्वरस्यैव तत्कर्तृत्वसम्भवात् । महर्षयस्तु वसिष्ठ-शौनकप्रभृतयो द्रष्टारो न कर्त्तारः । अत एवोक्तमभियुक्तैः ––

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयम्भुवा ।। इति ।

आदिपुरुषकर्तृतया पौरुषेयत्वोपपत्तावपि परतन्त्रशरीरधारिपुरुषनिर्मितत्वाभावादिमे वेदा अपौरुषेया एवेत्येषां लेखनस्वारस्यम् । अतोऽर्वाचीनन्यायनये वेदा ईश्वरकृता अनित्याः पौरुषेयाश्च ।

अथ प्राचीना न्यायविदो वदन्ति–"आप्तोपदेशः शब्दः", स द्विविधो दृष्टादृष्टार्थत्वात् (गौ० सू० १।१।७-८)। "मन्त्रायुर्वेदप्रामाण्याच्च तत्प्रामाण्यमाप्तप्रामाण्यात्" (गो०सू० २।१।६९)। एतद्विवृण्वता भाष्यकारेण वात्स्यायनेनालिख्यत–"यन्मन्वन्तरयुगान्तरेषु चातीतानागतेषु सम्प्रदायाभ्यासप्रयोगाविच्छेदो वेदानां नित्यत्वम्, आप्तप्रामाण्याच्च प्रामाण्यम्...............य एवाप्ता वेदार्थानां द्रष्टारः प्रवक्तारश्च त एवायुर्वेदभृतीनाम्, इत्यायुर्वेदप्रामाण्यवद्वेदप्रामाण्यमनुमातव्यम्......................" (वात्स्यायनभाष्यम् ४।१।६०)। अग्रे पुनरयं कथयति- "य एव मन्त्रब्राह्मणस्य द्रष्टारः प्रवक्तारश्च ते खल्वितिहासस्य पुराणस्य धर्मशास्त्रस्य चेति" (४।१।६२) इति ।

एवं विहिते विचारे सिद्धं भवति यत् प्राचीनन्यायमते वेदा महर्षिकृता अतः पौरुषेयास्तेषां कूटस्थनित्यत्वाभावेऽपि तैः प्रवाहनित्यत्वेन त्ववश्यं भाव्यम् । लौकिकशब्दवदेवैषां वैदिकशब्दानामप्याप्तप्रामाण्यादेव प्रामाण्यमध्यवसेयम् । यैरेव महर्षिभिरायुर्वेदा उक्तास्तैरेव हीमे वेदा अपि निगदिताः । अत एव यथाऽऽयुषो वेदानां प्रामाण्यं तथैवैतेषामपि वेदानाम् इति । तेन निर्गलितोऽयमर्थः, प्राचीनन्याये वेदा महर्षिविरचिताः, अतः पौरुषेयाः प्रवाहनित्याश्चेत्यलं प्रपञ्चितेनानेन प्रकरणेन । एतद्विषयकैः प्रचुरप्रमाणपुरःसरं प्रस्तुतैः शास्त्रार्थसन्दोहैः संभृताः सन्ति बहवो ग्रन्थाः किन्तु नाद्यत्वे कश्चनैकः सर्वमान्यः सिद्धान्तः स्थिरतामुपेतः । पाश्चात्या विपश्चितस्तु वेदान् पुरुषरचितान् मन्यन्त एव ।

एतेषां विदुषां कथितिरियमस्ति यद् ऋग्वेदेऽपि प्राचीनानां नूतनानाञ्च मन्त्रकृतां महर्षीणामुल्लेखो लभ्यते । किमन्यत् ?, वेदः स्वयं कथयति यद् ब्राह्मणादि-सहिता वेदग्रन्था ऋषिनिर्मिताः सन्ति । प्रमाणरूपेणेमे मन्त्रास्तैः प्रस्तूयन्ते—

"ये पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि (मन्त्रान्) जनयन्त विप्राः" (ऋ० सं० ७।२२।९)

"इदं ब्रह्म (मन्त्रः) क्रियमाणं नवीयः"

(ऋ० सं० ७।३५।१४)

"ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः" (ऋ० सं० ७।३७।४)

"ब्रह्मेन्द्राय वज्रिणे अकारि" (ऋ० सं० ७।९७।९)

"इमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः"

(गो० ब्रा० पूर्वप्र० १।२।१०)

"नमो ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रविद्भ्यो मन्त्र-पतिभ्यः" (मैत्रा० ब्रा०)

"यामृषयो मन्त्रकृतो मनीषिणः" (तै० ब्रा० २।८।८।५)

इत्यादिमन्त्रैः श्रुतिवाक्योपोद्बलितं मन्त्रकर्तृत्वं महर्षीणां ते समर्थयन्ते ।

अथ धिषणस्पर्धिधिषणा नैकराजन्यमौलिपालि—चुम्बितचरणाः स्वर्गीया गुरुवर्या विद्यावाचस्पतयो म० म० श्रीमधुसूदनमैथिलास्तु वैदिकविज्ञानसमर्थित भिन्नमेवैकं निश्चितं राद्धान्तं विषयेऽत्र व्यतन्तानषत । तेषामिदमस्ति मतस्वारस्यं यन्न कदापि वर्णाक्षर-पद-वाक्य-मन्त्रसमष्टिरूपः 'ईषेत्वोर्जेत्वा०' इत्यादिशब्दात्मको वेदशास्त्रग्रन्थ एव वास्तविको वेदः, न चायं वसिष्ठ-विश्वामित्रादिमानवविशेष-महर्षिभिः सन्दृब्धो ग्रन्थसमूहो वेदो विशुद्धरूपेण परमेश्वरप्रणीतो भवितुं शक्नोति। अस्यापौरुषेयत्वे त्वन्यदेव निगूढं रहस्यं वरीवर्त्ति । वस्तुतो वेदशब्दगृहीत मौलिकतत्त्वं किमपि भिन्नमेवास्ति यस्य तत्त्वस्य व्याख्याकरणाद्धेतोः 'ताच्छब्द्य' न्यायेन शब्दात्मक-ग्रन्थोऽपि पुनर्वेदनाम्नैव प्रसिद्धिमबाभजिष्ट । यथा खलु व्याकरणविषयप्रतिपादकं पुस्तकं लोके व्याकरणनाम्ना ख्यातिमुपयातम्, सिद्धान्तकौमुदीं सर्वे व्याकरणनाम्नैव परिचिन्वन्ति व्यवहरन्ति च परन्तु सिद्धान्तकौमुदीपुस्तकं व्याकरणशिक्षणपुस्तकं वर्त्तते न पुनस्तत् स्वयं व्याकरणम् । तथैव सहिता-ब्राह्मणादयो ग्रन्था अपि न स्वयं वेदाः । इमे तु मौलिकस्यापौरुषेयस्य वेदतत्त्वस्य प्रतिपादकाः ।

वेदार्थतत्त्वं परिज्ञातुं तत्स्वरूपमवगन्तुं वा न केनचनेतस्ततो भ्रमितव्यं न वा शास्त्रान्तरावलोकनक्लेशः करणीयः । सेयं वेदाक्षरसञ्चितिरेवात्मनो निगूढं

स्वरूपसौन्दर्य विशिष्टतत्वसंवलितं स्वयं जिज्ञासवे स्पष्टं प्रयच्छति जायेव पत्ये उशती सुवासाः। मन्त्रद्रष्टॄणां महर्षिप्रवराणां विचित्रेयं पद्धतिरासीद् यत्ते यस्य तत्त्वस्य व्याख्यानाय यं शब्दं प्रायुञ्जत, यान्यक्षराण्यसेवन्त तस्मिन्नेव शब्दे तस्य पूर्णं रहस्यमपि विनिहितवन्तः। यथा 'हृदय' शब्द एवावलोकनीयः। अस्य सर्वं रहस्य-मस्मिन्नेव निगूढं वरीवर्त्ति। शब्देऽत्र "स्वरोऽक्षरम्, सहाद्यैर्व्यञ्जनैः" इति प्रातिशाख्यनियमानुसारं स्वरव्यक्तानि त्रीण्यक्षराणि सन्ति–'हृ' इत्येकमक्षरम्, 'द' इत्येकमक्षरम्, 'यम्' इत्येकमक्षरञ्च। हरणार्थकाद् हृञ् धातोः 'हृ' नामकमक्षरं गृहीतम्, अवखण्डनार्थकाद् दो धातोः 'द' नामकमक्षरं गृहीतं 'यम्' इति नामक-मक्षरञ्च द्वयोरेतयोर्नियामकत्वेन नियन्तृत्वेन वा स्वीकृतम्। त्रयाणामेषामर्थः क्रमशो भवति–आहरणं, खण्डनं, नियमनञ्च। आहरणभावः, आदानभावः, सङ्ग्रहभावश्चेत्यनर्थान्तरम्। खण्डनभावः, विसर्गभावः, त्यागभावश्चेत्यपरपर्या-याञ्चितं त्रितयम्। एतेन वस्तुन आहरणशक्तिः, आदानशक्तिः, सङ्ग्राहिका शक्तिश्च 'हृ' इत्यनेनाक्षरेण द्योत्यते। या हि शक्तिर्विसर्गात्मिका समागतान् पदार्थान् प्रतिप्रक्षिपति सा 'द' इत्यनेनाक्षरेण सूच्यते। एवं यां तृतीयां नियामिकां शक्ति-माश्रित्येमे आदान-विसर्गक्रिये प्रचलतः स्वव्यापारं तनुतस्तदनयोः प्रतिष्ठाशक्तिरत्र 'यम्' इत्यक्षरेण प्रकटिता भवति। आसां तिसृणां शक्तीनां समुच्चितावस्थैव 'हृदयम्' इत्यनेन नाम्ना व्यपदिश्यते।

वैदिकव्यवहारे विसर्गात्मिका शक्तिः 'प्राणन' शब्देनाख्यायते, आहरणशक्तिश्च 'अपानन' शब्देन व्यवह्रियते। गमनं प्राणनम्, आगमनमपाननम्। पदार्थस्य केन्द्रात् तत्परिधिमभियानं प्राणन भवति, अयमेव हि विसर्गस्त्यागभावश्च। परिधेः केन्द्रं प्रत्यागमनञ्चापाननं भवति। इदमेव हि आदानं सङ्ग्रहणञ्च। अग्रतः प्रसर्पणं प्राणनं, पृष्ठतोऽपसर्पणमपाननम्। एवमेव श्वासग्रहणक्रिया प्राणनं निःश्वसनप्रक्रिया त्वपाननम्। अनयोः प्राणापानयोश्च यत्र केन्द्रीभूते मूलबिन्दौ नियमनं भवति स हि मध्यस्थो ज्ञेयः। यद्यपि सर्वसाधारणदृष्ट्या प्राणरूपश्वासक्रियया अपाननरूपप्रश्वास-प्रक्रियैव च मर्त्यो जीवतीति, किन्तु वस्तुतो मर्त्यः प्राणी न प्राणरूपेण श्वासेन, न वा अपाननरूपेण प्रश्वासेन जीवति प्रत्युत यमवलम्ब्य प्राणापानौ स्वक्रियां कुरुतस्तस्य व्यानस्य महिम्नैव स जीवनं धारयति। अत एव कठोपनिषच्छ्रुतावाम्नायते––

न प्राणेन नापानेन मर्त्यो जीवति कश्चन।
इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ॥
ऊर्ध्वं प्राणमुन्नयति अपानं प्रत्यगस्यति।
मध्ये वामनमासीनं सर्वे देवा उपासते॥

इति। (५।५,३)

अत्र हृकारोऽपानः, दकारः प्राणः, यमिति च व्यानः। अस्याः प्राणत्रय्याः समष्टिरेव हृदयमिति कथ्यते। इदमस्ति पारिभाषिकशब्दानामेकमुदाहरणम्।

साम्प्रतं प्रस्तुतप्रकरणे सौरजगल्लक्ष्यीकृत्येदमेव हि प्रोच्यते। निखिलमिदं प्रकाशमयं सौरमण्डलं जगत् सौरकिरणानां समूहमात्रमेव। इमे वै सूर्यरश्मयः सहस्रधा विभक्ता असङ्ख्यभावमापन्नास्तत्केन्द्रमण्डले आबद्धाः सन्ति। सूर्यबिम्बनियन्त्रिता रश्मयः सर्वत्र प्राणदपानत्-क्रियामालम्ब्य जगति प्रसर्पन्ति प्रकाशञ्च वितन्वन्ति। प्रत्येकसौररश्मिः स्वल्पं स्वपृष्ठभागेऽपसर्पणं विधायैव पुनरग्रभागे प्रसर्पतीति प्रत्यक्षमस्त्येवातपवर्धनक्रममवलोकयतामनुभववतां विपश्चिताम्। रश्मीनां पृष्ठमभिगमनमेवापाननं, पुरः प्रसर्पणञ्च प्राणनम्। इमावेव प्रसर्पणापसर्पणव्यापारौ प्राणापानौ। नियन्त्रणकर्त्ता सूर्यबिम्बो हि व्यानः। एतदेव दाशतय्यामुच्यते--

अन्तश्चरति रोचनास्य प्राणदपानति।
व्यख्यन्महिषो दिवम्॥ (ऋ० सं० १०।१८९।२) इति।

यथैतेन हृदयशब्दोदाहरणेन तत्तदक्षरनिगूढस्य तद्वाच्यरहस्यार्थस्य भावः प्रदर्शितस्तथैवायं वेदशब्दः स्वात्मनि किमपि निगूढं तत्त्वं बिभर्त्ति। विद्धातुर्हि ज्ञानार्थको लाभार्थकः सत्तार्थकश्च विद्यते। अतो धातुनाऽनेन निष्पन्नस्य वेदशब्दस्यापि त्रयोऽर्था भवन्ति– ज्ञानं, लाभात्मकरसः, सत्ता चेति। ज्ञानं चित् लाभात्मकरस आनन्दः, सत्ता च सत्। एतत्समष्टिरेव सच्चिदानन्दः। अयमेव वेदः, इयमेव ब्रह्म, इयमेव च विद्या। एतदेव लक्ष्यीकृत्य श्रुतिराह–"वेदो ब्रह्म" (जैमिनीयोपनिषद्-ब्राह्मणम् ४।११।४।३) तथा 'येन वेदान् वेद ऋग्वेदं यजुर्वेदं सामवेदमिति तस्यैतस्य ब्रह्मरसः" (शाङ्खायनारण्यकम् ८।३) इति। इदमस्ति वेदतत्त्वस्य तटस्थलक्षणम्। अथ स्वरूपलक्षणमभिलक्ष्य ब्राह्मणभागे भगवान् तित्तिरिः प्राह--

ऋग्भ्यो जातां सर्वशो मूर्त्तिमाहुः
सर्वा गतिर्याजुषी हैव शश्वत्।
सर्वं तेजः सामरूप्यं ह शश्वत्
सर्वं हेदं ब्रह्मणा हैव सृष्टम्॥

(तै० ब्रा० ३।१२।९।१) इति।

अर्थात् समस्ता मूर्त्तिमन्तः पिण्डाः, ये हि मरणधर्मशीलाः परिवर्तनस्वभावाश्च सन्ति ते सर्वे ऋक्तत्त्वतः प्रजाताः, पिण्डावस्थितञ्च आदानविसर्गात्मकं गतितत्त्वं यजुःसमुद्भूतं वरीवर्त्ति। क्रियार्थगतिमुपलभ्यैव पिण्ड आत्मस्वरूपं संरक्षति। क्रियाशीलतां विहाय तु पिण्डः स्वरूपेणोच्छिद्यते। अत एव कथ्यते-- 'सर्वा गतिर्याजुषी हैव शश्वद्' इति। प्रत्येकवस्तुनः पिण्डाद् प्रतिक्षणं बहिर्निर्गच्छद्

सूक्ष्मतरं प्राणरश्मिरूपं तेजोमण्डलमेव सामवेदः। इदमेव साम तेजोमयस्य बहिर्मण्डलात्मकस्य विभूतिमण्डलस्य सर्जकम्। मण्डलं यथा यथोत्तरं वृद्धिमुपैति तथा तथा वस्तुपिण्डस्य पार्श्वाणुद्वयमुत्तरोत्तर ह्रस्वत्वमुपयाति। अत एव साममण्डलान्तर्वत्तिना मूर्त्तिभावानामुत्तरोत्तरं ह्रस्वत्वप्राप्तिकारणाद् वस्तुपिण्डतो यथा यथा वयं दूरङ्गता भवामस्तथा तथा वस्तुपिण्डानुगतो मण्डलभावोऽस्माकं संमुखे ह्रस्वीभूतो दृश्यते। समीपस्थितं वस्तु कथं स्थूलं, दूरङ्गतं च तत् कथं सूक्ष्मं प्रतीयतेऽस्य कारणं केवलं पिण्डावच्छिन्ना ऋक्, मण्डलावच्छिन्नं सामैव केवलं नान्यत्। तेन च वस्तुपिण्डः ऋङ्मूर्त्तिः, वस्तुपिण्डस्य प्राणमण्डलात्मकं तेजोमण्डलमेव सामेति दिक्। तदस्या वेदत्रय्या विश्वव्यापकतामुद्दिश्यैव ब्राह्मणमन्त्रो वावदीति–"त्रय्यां वाव विद्यायां सर्वाणि भूतानि" (शत० ब्रा० १०।४।२।२२) इति।

अस्माकं दृग्विषयीभूतो न पिण्डात्मक ऋग्वेदः, न च गत्यात्मको यजुर्वेदः। अपि तु विभूतिलक्षणस्तेजोमयः सामवेद एव दृष्टेरालम्बनं जायते। अत एव परमेश्वरीयविभूतिषु सामवेदोऽगण्यतामरेश्वरेण कृष्णेन। अस्या वेदत्रय्याः स्वरूपविकासो ब्रह्मशब्दवाच्येनाथर्ववेदेन सोमात्मकेन सञ्जातः। तदेव श्रुत्या प्रतिपादितम्– 'सर्वं हेदं ब्रह्मणा हैव सृष्टम्' इति। इदमेव वेदस्वरूपमुपवर्णयता मनुमहाराजेन प्रोक्तम्––

अग्नि-वायु-रविभ्यस्तु त्रयं ब्रह्म सनातनम्।
दुदोह यज्ञसिद्ध्यर्थमृग्-यजुः-सामलक्षणम्॥इति।

(मनुस्मृ० १।२३)

अर्थात् प्रजापतिना लोकविधात्रा यज्ञस्वरूपनिर्माणाय अग्निवाय्वादित्येभ्यः क्रमशः ऋग्-यजुः-सामान्यलभ्यन्त। तथा चतुर्थं सनातनं ब्रह्म अथर्ववेदस्वरूपमपि प्राप्यत। चतुर्थोऽयं वेदोऽथर्ववेदो गोपथे ब्राह्मणेऽपि ब्रह्मनाम्नाऽभिहितोऽत्र ब्रह्मशब्देनागृह्यत। यथा हि–"**चत्वारो वा इमे वेदा ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेद इति**" (गोपथब्रा० १।२।१६) मनोरिदं कथनं शतपथब्राह्मणोद्दलितं विद्यते, यतस्तत्र स्पष्टं प्रतिपादितं याज्ञवल्क्येन महर्षिणा––"**स इमानि त्रीणि ज्योतींष्यभितताप, तेभ्यस्तृप्तेभ्यस्त्रयो वेदा अजायन्त, अग्नेः ऋग्वेदो वायोर्यजुर्वेदः सूर्यात् सामवेदः**" (शत० ब्रा० ११।५।८।३) इति। एवं हि ऋगग्निः, यजुर्वायुः, साम चादित्यः। त्रयाणामेषां समष्टिरेव वेदत्रयी विद्यते। इयं च त्रयी अथर्वनामकेन ब्रह्मणा सम्मिल्य पूर्णमात्मस्वरूपं समेति।

तस्या एतस्या वेदत्रय्या वैज्ञानिकं स्वरूपमुद्दिश्यैव शातपथी श्रुतिः कथयति–

"यदेतन्मण्डलं तपति तन्महदुक्थं ता ऋचः,
स ऋचां लोकः। अथ यदेतदर्चिर्दीप्यते

तन्महाव्रतं तानि सामानि, स साम्नां लोकः। अथ य एष एतस्मिन् मण्डले पुरुषः सोऽग्निः, तानि यजूंषि, स यजुषां लोकः। सैषा त्रय्येव विद्या तपति ....त्रयी वा एषा विद्या तपति" (शत० ब्रा० १०।५।२।१।२) इति। "एवं वाऽस्य महतो भूतस्य निःश्वसितमेतद्यत् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः..................अस्यैवैतानि सर्वाणि निःश्वसितानि" (बृह० उ० ४।४।१०) इति च।

तदस्योपक्रमस्यायमेवाभिप्रायो यदेते ऋग्यजुःसामाथर्वनामभिर्विश्रुताश्चत्वारो वेदाः क्रमशोऽग्निवाय्वादित्यसोमात्मकाः सन्ति। एष्वग्निविद्यैव ऋग्विद्या वर्त्तते, तत्प्रतिपादकः शब्दात्मको वेदग्रन्थश्च ऋग्वेदः कथ्यते। वायुविद्यैव यजुर्विद्या विद्यते, तत्प्रतिपादको वेदग्रन्थश्च यजुर्वेदः प्रोच्यते। तृतीया आदित्यविद्याथ सामविद्या निगद्यते, तत्प्रतिपादको वेदग्रन्थश्च सामवेदोऽभिधीयते। चतुर्थी सोमविद्यैवाथर्वविद्या वर्वर्त्ति, अस्याः प्रतिपादको वेदग्रन्थश्चाथर्ववेदनाम्ना विश्रुतिमाश्रितः। एषां घनत्वप्रवर्त्तकेनाग्निनानुप्राणितानां पिण्डानां मूर्त्तिस्वरूपाणां वा सम्पादको वेदः ऋग्वेदः। अयमेव पार्थिवो वेदः। तरलताप्रवर्त्तकेन वायुनानुप्राणितानां गतिस्वरूपाणां सम्पादको वेदो यजुर्वेदः। अयमेवान्तरिक्ष्यो वेदः। विरलताप्रवर्त्तकेनादित्येनानुप्राणितानां मण्डलानां स्वरूपसम्पादको वेदः सामवेदः, अयमेव हि दिव्यवेदः। अग्नित्रय्याः स्वरूपसमर्पको यज्ञप्रवर्त्तकः पूर्वोक्तः सोमवेद एवाथर्ववेदो विद्यते। चतुर्णामेषां वेदानां चत्वारो लोका अपि वर्त्तन्ते। ये हि शाङ्खायनब्राह्मणे प्राप्यन्ते--"त्रयो वा इमे त्रिवृतो लोकाः। अस्ति वै चतुर्थो देवलोक आपः। प्रजापतिस्तपोऽतप्यत, स तपस्तप्त्वा प्राणादेवेमं लोकम्, अपानादन्तरिक्षं लोकम्, व्यानादमुं लोकं प्रावृहत्। सोऽग्निमेवास्माल्लोकात्, वायुमन्तरिक्षलोकात्, आदित्यं दिवोऽसृजत। सोऽग्नेरेवर्चः, वायोर्यजूंषि, आदित्यात् सामान्यसृजत" (शाङ्खा० ब्रा० ६।१०) इति। चरमोऽथर्ववेदः सोमरूपोऽन्नात्मकः। आद्यास्त्रयो वेदाश्च ऋग्यजुःसामनामानोऽग्निवाय्वादित्यरूपा आग्नेया अन्नादात्मकाः। अन्नादोऽग्निरन्नं सोमं स्वान्तर्लीनं करोतीति वेदत्रय्याः प्रसिद्धिः।

ऋग्वेदात्मकोऽग्निर्भूस्थानीयोऽस्माकं पुरोवर्त्ती च वर्त्तते। अतः ऋग्वेदाग्नि-स्वरूपप्रवर्त्तकस्य शब्दात्मकस्य ऋग्वेदग्रन्थस्यारम्भे "अग्निमीडे पुरोहितम्" इति प्राप्यते। तस्यायमर्थो यत् पुरः=संमुखे हितं=संस्थितं पार्थिवाग्निं स्तवीमि। यजुषां वेदस्य प्रारम्भो भवति "ईषे त्वोर्जे त्वा वायवस्थ०" इत्यादिना। अत्र 'वायवस्थ' इत्यनेन पदेनान्तरिक्ष्यं गतिलक्षणं वायुरूप यजुस्तत्त्वं सूचितं भवति। आदित्यश्च सामवेदात्मकः, यो ह्यादित्यो भूलोकादस्माद् बहुदूरं दिवि विराजते। अत एव सामवेदसंहिताया आरम्भे "अग्न आयाहि वीतये" इति पाठो लभ्यते। दूरस्थितो हि देवो जनो वा समाहूयते न पुनः सन्निकटस्थः। अत्र 'आयाहि' इति क्रियापदेन दूरे द्युलोके स्थित आदित्यः सङ्कीर्तितः।

तदत्र सोऽयं निर्गलितोऽर्थो यदिमे ग्रन्थस्वरूपा महर्षिगणगुम्फितास्तत्पत्नी-भिश्च सन्दृब्धा वेदशब्दाभिधेयाः संहितादयो ग्रन्था न वास्तविका वेदा मूलतत्त्व-संमताः। त्रयीरूपं मौलिकं वेदतत्त्वं तु किमप्यन्यदेव, यस्य स्वल्पं स्वरूपं साम्प्रतं सूक्ष्मरूपेणोपरि निर्दिष्टमेव। तदेव नित्यकूटस्थमनाद्यमीश्वरीयमपौरुषेयञ्च। आविर्भूतर्दिव्यप्रकाशैर्ब्रह्मसंकाशैर्महर्षिप्रवरैर्दृष्टरहस्या इमे शब्दात्मका ग्रन्थस्वरूपा वेदास्तु मौलिकवेदतत्त्वस्य परिचायकाः। अत एव हि तदभिन्नाः प्रसिद्धा लोके। परमनेन नैवेषदपीदं विचिन्तनीयं, मनसि च मनाग्वैमत्यं तन्तनीयं यदिमे संहिता-ब्राह्मणादयो वेदग्रन्था महत्त्वहीना निष्प्रयोजना अनादरणीया वा। एते तु परमेश्वर-स्वरूपास्तद्वदेव चाराधनीयाः। यत एषामुपासनयैवास्माभिर्भगवान् वेदो ज्ञातुं शक्यते। विना वेदग्रन्थानां शरणग्रहणं न कथमपि वेदतत्त्वं मानवोऽवगन्तुं प्रभवतीति तेषां साङ्गमध्ययनं निश्चप्रचमावश्यकमिति।

इदं वेदतत्त्वमवगन्तुमेवाभियुक्ताः षडङ्गस्य वेदस्याध्ययनमावश्यकं निरदेदि-शिषत। मानवधर्मनिदर्शको मनुरपि नित्यं वेदमेवाभ्यसितुमन्वरोरोधीत्। किन्तु कियतोऽनुतापस्य विषयोऽयं यदिदानीं संस्कृतभाषाभिज्ञा अपि विज्ञा न वेदाध्ययनाय स्पृहयन्ति। धन्या वाराणसी पुरी, धन्याश्च दाक्षिणात्या जनपदाः, यत्र सम्प्रत्यपि भूयांसो विद्वांसो विकृतिसमवेताः श्रुतिसंहिताः कण्ठस्थीकृत्य वैदिकपरम्परामक्षुण्णां रारक्ष्यन्ते। किन्त्विमे वेदमन्त्राक्षरज्ञाः सन्तोऽपि न तदर्थज्ञाः इति त्रुटिर्नितान्तं स्वान्तं तोतुदीति। वेदरहस्यं तु तदर्थबोधं विना नैव ज्ञातुं शक्यते। अत एव मुनिर्यास्को निरुक्ते निर्वक्ति—

स्थाणुरयं भारहारः किलाभू-
दधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ॥ इति।

पद्येऽत्रासौ वेदार्थज्ञानं प्रशस्य पुनस्तत्रैव तदर्थज्ञानशून्यतां विनिन्दन् विलिखति--

यद्गृहीतमविज्ञातं निगदेनैव शब्दयते ।

अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।। इति ।

अतः सावयवमन्त्रार्थज्ञानेनैवास्य वेदाध्ययनस्य साफल्यं विद्यते । परं वेदमन्त्रार्थावबोधः सम्प्रति विलुप्तप्रचारे वैदिकवाग्व्यवहारे न सर्वेषां विदुषां कृते साफल्यमञ्चति यतो हि पञ्चसहस्रसमेऽभ्योऽपि प्राक्तनीयमृषिमुनिजनकालिकी वैदिकी भाषा साम्प्रतिकानां लोकानां कृते तु क्लिष्टातिक्लिष्टा दुरवबोधा च वरीवर्त्ति । संस्कृतवाङ्मये विहितभूरिपरिश्रमोऽपि कश्चिदेव विपश्चित् पूर्वाचार्यैर्विलिखितं भाष्यं विलोक्यैव कथञ्चिद् वेदमन्त्राणां स्वारस्यमात्मसात् कर्त्तुं शक्नोति । प्राचीनभाष्यञ्च केवलं सायणाचार्यलिखितं ब्राह्मण-कल्पसूत्रादिसम्मतं प्रमाणकोटिमुपगतञ्च जेगीयते मध्येविद्वत्समाजम् । परन्तु समेषां वेदानां भाष्यं विलिख्यापि विंशतिकाण्डेषु विस्तृततमम् अथर्ववेदं व्याचिख्यासुरपि सायणाचार्यो न जाने केन कारणेन पञ्चमकाण्डं, नवम-दशमकाण्डे, द्वादशादिषोडशकाण्डानि, अष्टमकाण्डस्य कतिपयसूक्तानि, विंशकाण्डस्य चाष्टात्रिंशसूक्तादारभ्य त्रिचत्वारिंशदुत्तरैकशतान्तानि षडुत्तरैकशतसङ्ख्याकानि सूक्तानि न स्वकीयेन भाष्येण व्यभूषयत् । अवश्यमत्र विशेषेण कारणेन भवितव्यम् । महदाश्चर्यं बोभवीति यत्तदनन्तरं व्यतीतेष्वपि पञ्चशताधिकेषु हायनेषु न केनचित्तदुत्तरभाविना मेधाविना तस्यैव ब्राह्मण-कल्पसूत्रादिसमाश्रितां शैलीमाश्रित्य तादृशं सर्वमान्यं भाष्यमतन्यत । प्रस्तुतोऽयमथर्ववेदस्तु सर्वेषां वेदानां किमपि वैशिष्टयं बिभर्त्ति । यतोऽन्ये वेदाः प्राधान्येनामुष्मिकफलावाप्तिमार्गं प्रदर्शयन्तो गौणरूपेणैहिकमार्गप्राशस्त्यं निर्दिशन्ति परन्तु तुरीयोऽयमथर्ववेदो मुख्यरूपेणैहिकनिःश्रेयससरणिं निर्दिशन् गौणरूपेणामुष्मिकस्याभ्युदस्य पन्थानं निर्देदिशीति । अत एवाचार्यः सायणोऽस्य भाष्यभूमिकोपक्रमणिकायामेवमलेखीत्--

व्याख्याय वेदत्रितयमामुष्मिकफलप्रदम् ।

ऐहिकामुष्मिकफलं चतुर्थं व्याचिकीर्षति ।। इति ।

अस्मिन् व्यतिकरेऽस्य महतीमावश्यकतामाकलय्य शताधिकवर्षायुषः प्रातः स्मरणीयाः परमपूजनीयाः पुमवतारभूता इव श्री-सरस्वत्योर्महामण्डलेश्वरा वेददर्शनाचार्याः स्वामिश्रीगङ्गेश्वरानन्दोदासीनमहाराजा आत्मनोऽनुपमेन तपोबलेन वार्धक्येऽप्यस्मिन् यूनो न्यक्कुर्वन्तः विलुप्तभाष्याणामेषां समेषां काण्डानां सहजमेव अभिनवसायणभाष्यमिदमलेलिखिषत । मह्यं नितान्तं स्पृहयन्तोऽनुगृह्णन्तश्च मां

भाष्यस्यास्य परिष्करण-सम्पादन-संशोधनादिकर्मणि न्ययोयूजिषत । एभ्य एव च सद्गुरुभगवत्पादेभ्यो लब्धमेधाबलोऽहमपि तदिदं कार्यं सम्यक् सम्पाद्य प्रस्तुतस्य पञ्चमकाण्डस्य भाष्यमेतद् वेदनिष्ठावतां प्रेक्षावतां पुरः समुपस्थापयन् परमां मुदमनुभवामि ।

यद्यपि सम्पूर्ण एवाथर्ववेदे आयुर्वेदसिद्धान्तस्य बहवो विषयाः प्रतिपदं प्राप्यन्ते तथापि प्रस्तुतेऽत्र पञ्चमकाण्डे ज्वर-दाह-यक्ष्म-प्रभृतिरुजां वर्णनं तदुपायाश्च कामं लभ्यन्ते । अस्मिन् पञ्चमे काण्डे औषधवर्णनमपि बाहुल्येनास्ति । कुष्ठौषधं तक्मज्वरनाशकं यक्ष्मसंहारकञ्च दर्शयामास--

"यक्ष्मं च सर्वं नाशय तक्मानं चारसं कृधि" (५।४।६)

"कुष्ठोसि तक्मनाशन तक्मानं नाशयन्नितः" (५।४।१) इति ।

कुष्ठं श्वासोच्छ्वासरक्षकं, चक्षुषोर्ज्योतिर्वर्धकं निर्दिश्य सोमसख्येन चास्य विशिष्टं प्रभावशालित्वमप्युपवर्णितम्--

"देवेभ्यो अधिजातोऽसि सोमस्यासि सखा हितः ।
स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ॥" (५।४।७) इति ।

पञ्चमसूक्तेऽत्र लाक्षावर्णनतः सोऽयं निष्कर्षो लभ्यते यल्लाक्षा न केवलं वृक्षनिस्यन्दितैव, अपितु कीटोत्पादिताप्यस्तीयम् । कीटेष्वपि स्त्रीजातीयाः कीटा एवात्र प्राधान्यं भजन्ते । स्त्रीजातीयैका शिलाची कथ्यते । लोमशवक्षणा अपि एका कीटस्त्री भवति या हि लाक्षां सूते ।

अत्र काण्डे सर्पविषहरा अप्यनेके सदुपायाः प्राप्यन्ते । असित-तैमात-विलिजी-प्रभृतयः सर्पविशेषा भवन्ति । न केवलमिदमेव, काण्डेऽस्मिंस्तु बहवोऽभिचार-प्रयोगास्तद्रक्षोपायाश्चापि दरीदृश्यन्ते--

"योऽस्मांश्चक्षुषा मनसा चित्त्याकूत्या
च यो अघायुरभिदासात् ।
त्वं तानग्ने मेन्यामेनीन् कृणु स्वाहा ॥" (५।६।१०) इति ।

शत्रुविजय-परराष्ट्राक्रमणसाफल्य-सूतिकारोगोपचार-मन्त्रा अपि अत्र दृष्टिपथ-मुपयान्ति । अस्तु ।

एवमनेकविधोपयोगिताकलितस्य पञ्चमकाण्डस्याप्यस्यान्यैर्विलुप्तभाष्यैः काण्डैः सह अभिनवं सायणभाष्यं विलिख्य विश्वविश्रुतयशोवैभवाः शताधिकहायनायुषः

प्रज्ञाचक्षुषः पूज्यपादा वेददर्शनाचार्या महामण्डलेश्वराः स्वनामधन्याः स्वामिश्रीगङ्गेश्वरानन्दोदासीनमहाराजा ब्रह्मवेदार्थजिज्ञासूनां बुधबन्धूनां महान्तमुपकारं कृतवन्त इति यावच्चन्द्रदिवाकरौ सर्वोऽयं विद्वत्समाज एषा कृतज्ञताभारभुग्नः स्थास्यति । यतो निश्चप्रचमनेन भाष्येण मन्त्रस्वारस्यं चिन्वन्तः सन्तः संलप्स्यन्ते स्वलिप्सितम् । यद्धीमे च भाष्यस्यास्य परिष्करण-सम्पादन-संशोधनादिकर्मप्रदानेन मामन्वजरीगृहुस्तदर्थमेषां पुरः सदैवाहं नतमस्तकस्तास्थिष्यामि । एतेषां शिष्यतल्लजैरविरतञ्च गुरुचरणसेवानिरतैर्वेदान्ताचार्यैः स्वामिश्रीगोविन्दानन्दोदासीनैश्च योऽत्र सहयोगोऽकारि तत्कृते तेभ्योऽपि ससाधुवादाः धन्यवादाः समर्प्यन्ते मयका । येन च बम्बईनगरीस्थेन "सद्गुरु-गङ्गेश्वर-इण्टरनेशनल-वेदमिशन" इति नामकेन संस्थानेन ग्रन्थस्यास्य प्रकाशनार्थं यः सकलो धनव्ययभारो व्यूढस्तदर्थं तस्मै साहाय्यकर्त्रे संस्थानायापि हार्दिका धन्यवादा वितीर्यन्ते । पर्यवसाने चास्य प्रूफपत्रसंशोधनादिकार्येषु सहर्षं पूर्णं साहाय्यमाचरन् यो मां वीतचिन्तमिवाकरोत् तं लेखन-सम्पादनादिचणमस्मज्ज्येष्ठतनयम् एम. ए. - पी-एच डी. पदजुषं डॉ० नारायणशास्त्रिकाङ्करं व्याकरण-साहित्य-साङ्ख्ययोगदर्शनाचार्यमप्यहं शुभाशिषां राशिभिः संयोजयामि । अस्य साहाय्यमन्तरेण ग्रन्थस्यास्य शीघ्रं मुद्रणं दुष्करमेवासीत् ।

एवं श्रीमत्सद्गुरोरपारया कृपया तदिदं तुरीयवेदस्य पञ्चमकाण्डस्याभिनवसायणभाष्यसम्पादन-मुद्रणादिकं सर्वं कार्यं सम्पूर्णतामितमिति कोविदकुलपुङ्गवान् पाठकान् सप्रश्रयमिदमेव निवेदये यत्तैर्भगवतो ब्रह्मवेदस्य स्वारस्यसङ्ग्रहणसंलग्नमानसैरेव भाव्यम् । भ्रमप्रमादादयो मानवसुलभा दोषास्तु प्रतिपदं बोभूयन्त एवेति तदर्थं क्षन्तव्योऽयं कोविदकुलकिङ्करः—

नवलकिशोरकाङ्करः

चतुर्वेदशोधसंस्थानम्
औत्तमुनि-निवासः
वृन्दावनम् (मथुरा)
वसन्तपञ्चमी, वि० सं० २०४१

श्रीसद्गुरुवन्दना

(१)

अभिनव-सायणभाष्य-प्रणेतृवर्यान् मनीषिमूर्धन्यान् ।
गङ्गेश्वरगुरुपादान् स्तौति गोविन्दानन्दोऽयम् ॥१॥

(२)

विद्वत्सम्मानदक्षानशरण—जनता—रक्षणे दत्तचित्तान्
वेदे वेदाङ्गशास्त्रे सुरगुरुसमतां गाहमानानमानान् ॥
श्रीमद्गङ्गेश्वराख्यान् मुनिजनमुकुटान् सद्गुरून्नम्रमौलि-
र्गोविन्दानन्दनामा चरणयुगरजःसेवको नन्नमीति ॥२॥

(३)

सर्गादौ स्फुरतां समस्तजगतां यः श्रेयसे जज्ञिवान्
अर्थानभ्युदयाय संप्रथितवाँस्ताँस्ताँस्तु वैज्ञानिकान्
अस्मत्पूज्यगुरोर्मिषेण च भुवि प्राकट्यमेवाप्तवान्
दीर्घायुर्वितरेत् स वेदभगवान् गङ्गेश्वरस्वामिने ॥३॥

(४)

भगवन्तमिदं नित्यं वाचा याचामि, मे गुरोः ।
प्रतिक्षणं प्रवर्धन्तां स्वास्थ्यमायुर्यशो बलम् ॥४॥

(५)

श्रीस्वामिगङ्गेश्वरपूज्यपादान् महर्षिकल्पान् श्रुतिशुभ्रमूर्तीन् ।
साक्षादहो भौमहिरण्यगर्भान् एतानहं नौमि विनम्रशिष्यः ॥५॥

श्रीमद्गुरुसेवासंलग्नः

गोविन्दानन्द उदासीनः

भाष्यलेखकाः

वेद-दर्शनाचार्याः महामण्डलेश्वराः

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः



धर्माचार-विचार-चारुचरिताः साद्गुण्य-पुण्यालयाः
शुद्धाहार - विहार - हृद्यहृदयास्तेजः - प्रकर्षोदयाः ।
लुप्तं भाष्यमवेक्ष्य सायणकृतं वेदस्य ये ब्रह्मणो
नूत्नं भाष्यमलेलिखुर्हि त इमे सन्त्यत्र गङ्गेश्वराः ॥

—काङ्करः

अथ

शौनकीयायाम् अथर्ववेदसंहितायां

पञ्चमं काण्डम्

मङ्गलम्

विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान् ।
पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान् ॥१॥
श्रौतवंश-समुद्भूतः श्रौतमार्ग-प्रवर्तकः ।
भक्तिवित्ति-समुच्चेता श्रीचन्द्रः पातु सद्गुरुः ॥२॥
स्वान्तध्वान्तमपाकुर्वन् वेदविज्ञान-भानुभिः ।
सर्वं समीहितं देयाद्रामानन्दो दिवाकरः ॥३॥
अभिनवमिदं भाष्यं सायणकृति-सन्निभम् ।
अनुपलब्ध-तद्भाष्य-स्थाने निर्मीयतेऽधुना ॥४॥

पञ्चमे काण्डेऽत्र षडनुवाकाः, सूक्तानि चैकत्रिंशत् सन्ति । तत्रेदम्—

प्रथमं सूक्तम्

नवर्चस्यास्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः । वरुणो देवता । प्रथमर्चः परा बृहतीत्रिष्टुप्, द्वितीयादिपञ्चानामष्टम्याश्च त्रिष्टुप्, सप्तम्या विराट्त्रिष्टुप्, नवम्याश्च त्र्यवसाना षट्पदात्यष्टिश्छन्दांसि ।

तदत्र प्रथमेऽनुवाके पञ्च सूक्तानि, तत्र 'ऋधङ्मन्त्रः' 'तदिदास' (अ० ५, १-२) इति सूक्ताभ्यां हस्तिपृष्ठे पुरुषशिरसि वा निहितायाम् आश्वत्थ्यां पाद्यां त्रिवृति गोमयपरिचये अग्निं प्रज्वाल्य आज्यं जुह्वत् शत्रून् अभिक्रामति सङ्ग्रामजयकामः ।

तथा तस्मिन्नेव कर्मणि वराहखातमृत्तिकामानीय राजानो वेदिं कुर्वन्ति । ततः पुरोधा आभ्यां सूक्ताभ्यामाज्यं सक्तूंश्च जुहुयात् । धनुरिध्मे तन्त्रे धनुःसमिधः इष्विध्मे तन्त्रे इषुसमिधश्च आदधाति । अपि च धनुः सम्पातवद् विमृज्य अभिमन्त्र्य राज्ञे प्रयच्छति ।

तथा तस्मिन्नेव कर्मणि युद्धे एकबाणेन मृतस्य पुरुषस्येध्ममुपसमाधायोपरि चक्रं धारयित्वा दीर्घदण्डेन स्रुवेणाभ्यां चक्रच्छिद्रेऽनावाज्यं जुहोति। उत्तिष्ठ संनह्य प्रहर युध्यस्वेत्यादिकां प्रोत्साहनवाचं श्रुत्वा युद्धे योजयेत्।

'यदि चिन्नु त्वा' (अ० ५।२।४) इति ऋचं परसैनिकान् अनुब्रूयात्।

एतेषां कर्मणां विकल्पः। कृतैरवश्यं जयो भवति। राजा वैश्यश्चेद् उक्तानि कर्माणि 'यदि चिन्नु त्वा' इति ऋचा कार्याणि। जयकामः सेनापतिश्चेद् उक्तान्येव कर्माणि 'त्वया वयम्' (५।२।५) इत्येकया ऋचा कार्याणि। युद्धयोग्यस्य परीक्षणकर्मणि 'नि तद् दधिषे' (अ० ५।२।६) इति ऋचा उदपात्रमभिमन्त्र्य तस्मिन् द्वौ द्वौ योद्धारौ राजा अवेक्षयेत्। तयोर्मध्ये यं यं न पश्येत् तं तं युधि न योजयेत्। 'नि तद् दधिषे' इति ऋचा नवे रथे ससारथिं राजानमास्थापयति।

सूत्रितं हि "ऋधङ्मन्त्रः', 'तदिदास' इत्याश्वत्थ्यां पात्र्यां त्रिवृति गोमय-परिचये हस्तिपृष्ठे पुरुषशिरसि वाऽमित्रान् जुह्वत् अभिप्रक्रम्य निवपति। वराह-विहिताद् राजानो वेदिं कुर्वन्ति। तस्यां प्रदानान्तानि। एकेष्वाहतस्यादहन उपसमा-धाय दीर्घदण्डेन स्रुवेण रथचक्रस्य खेन समया जुहोति। योजनीयां श्रुत्वा योजयेत्। 'यदि चिन्नु त्वा' (अ० ५।२।४), 'नमो देवेभ्यः' (६।१३) इत्यन्वाह" (कौ. सू. १५।१-६) इत्यादि।

तथा पुष्टिकर्मसु आभ्यां सूक्ताभ्यां मैश्रधान्यं भ्रष्टपिष्टं सक्तुमजालोहित-मिश्रितं रसमिश्रितञ्च सम्पात्याभिमन्त्र्याश्नीयात्।

तथा तेष्वेव कर्मसु आभ्यां सूक्ताभ्यां त्रिषूदम्बरचमसेषु प्लक्षचमसेषु वा मैश्र-धान्यं प्रक्षिप्य रसांश्च सम्पात्याभिमन्त्र्याश्नीयात्। तत्र सूत्रोक्तमन्त्रैः पूर्वाह्ण-मध्याह्नापराह्णकाले एकैकचमसभक्षणम्।

तथा तत्रैव कर्मस्वाभ्यां सूक्ताभ्यामृतुमत्याः स्त्रिया लोहितं रसमिश्रितं कृत्वा सम्पात्याभिमन्त्र्य प्रादेशिनीमध्यमाङ्गुलिभ्यां प्राश्नीयात्।

तदुक्तं कौशिकेन—"ऋधङ्मन्त्रः', 'तदिदास' (अ० ५।१।२) इति मैश्रधान्यं भृष्टपिष्टं लोहितालङ्कृतं रसमिश्रमश्नाति। अभृष्टं प्लक्षोदुम्बरस्योत्तरतोऽग्नेस्त्रिषु चमसेषु 'पूर्वाह्णस्य तेजसाग्रम् अन्नस्य प्राशिषम्' इति पूर्वाह्णे। 'मध्यन्दिनस्य तेजसा मध्यम् अन्नस्य प्राशिषम्' इति मध्यन्दिने। 'अपराह्णस्य तेजसा सर्वमन्नस्य प्राशिषम्' इत्यपराह्णे। ऋतुमत्याः स्त्रिया अङ्गुलिभ्यां लोहितम्" (कौ. सू. २२।१-५) इति।

तथा क्षेत्रं कामयमानः काम्यमाने क्षेत्रे आभ्यां सूक्ताभ्यां भक्तं दधिमधुमिश्रं सम्पात्याभिमन्त्र्याश्नीयात्। तदुक्तं कौशिकेन—'यत् क्षेत्रं कामयते तस्मिन् कीलालं दधिमधुमिश्रम्' (कौ. सू. २२।६) इति।

तथा सप्तग्रामलाभकर्मणि अस्य सूक्तस्य विनियोगः। तदुक्तं कौशिकेन—'संवत्सरं स्त्रियमनुपेत्य शुक्त्यां रेत आनीय तण्डुलमिश्रम्' (कौ. सू. २२।७) इति।

संवत्सरं ब्रह्मचर्यं कृत्वा ततो मैथुनं कृत्वा रेतस्तण्डुलमिश्रं कृत्वा सम्पात्याभिमन्त्र्याश्नातीत्यर्थस्तस्य ।

तथा समृद्धिकर्मण्यपि विनियुज्यते सूक्तद्वयमेतत् । 'निशायामाग्रयणतण्डुलान् उदङ्क्यां मधुमिश्रान् निदधाति आ यवानां पङ्क्तेः । एवं यवान् उभयान् समोप्य । 'त्रिवृति गोमयपरिचये श्रपयित्वाश्नाति' (कौ.सू. २२।१०-१२) इति । शरदि व्रीहितण्डुलान् मधुमिश्रितांश्चर्मभाण्डे निधाय निखन्यात् आ यवपचनमासात् । तथैव यवपचनर्त्तौ यवानपि तादृश एव भाण्डे व्रीहिपचनकालपर्यन्तं निधाय निखनेत् । अनन्तरमुभयान् मिश्रीकृत्य त्रिगुणिते गोमयपरिचये श्रपयित्वा सम्पात्याभिमन्त्र्याश्नातीति तस्यार्थः ।

तथा गर्भदृंहणकर्मणि 'ऋधङ्मन्त्रः' इति सूक्तस्य प्रथमाया ऋचो विनियोगः । स च 'यथेयं पृथिवी मही' (अ० ६।१७) इति सूक्तस्य प्रस्तावनायामनुसन्धेयः ।

ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा ।
अदब्धासुर्भ्राजमानोऽहेव त्रितो धर्ता दाधार त्रीणि ॥१॥

पदपाठः

ऋधक्ऽमन्त्रः । योनिम् । यः । आऽबभूव । अमृतऽअसुः । वर्धमानः । सुऽजन्मा । अदब्धऽअसुः । भ्राजमानः । अहाऽइव । त्रितः । धर्ता । दाधार । त्रीणि ॥१॥

यद्यपि सूक्तमिदं वरुणदेवताकम्, किन्तु 'यः सर्वान् प्राणिनो निखिलं विश्वं वा वृणोतीति वरुणः, यद्वा यः सर्वैः प्राणिभिः, निखिलेन संसारेण वा व्रियते वर्यते च स वरुणः' इति निरुक्त्याऽत्र वरुणदेवत्वेन सर्वव्यापकः परमात्मैव गृहीतो भवति । अत एव कपिष्ठलकठसंहितायां वरुणस्यात्मवत्सर्वव्यापकत्वं श्रूयते-'वनेषु व्यन्तरिक्षं ततान, वाजमर्वत्सु, पयो अघ्न्यासु, हृत्सु क्रतुं वरुणो विक्ष्वग्निं, दिवि सूर्यमदधात्, सौमारुद्री' (१।१९) इति । वरुणस्य परमात्मनो विराड्रूपतां ख्यापयन्त्यो भवन्ति चात्र ब्राह्मणश्रुतयोऽन्या अपि-"उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ" (क. क. सं. ३।११) 'वरुण एव सविता' (जै. उ. ४।१२।१।३), 'रात्री वरुणः' (काठ. २२।६), 'श्रीर्वै वरुणः' (कौ. १८।९), 'संवत्सरो वरुणः' (श. ४।१।४।१०), 'यः प्राणः स वरुणः' (गो. उ. ४।११), 'व्यानो वरुणः' (श. १२।९।१।१६), 'अपानो वरुणः' (श. ८।४।२।६) 'योनिरेव वरुणः' (श. १२।९।१।१७), 'इन्द्र उ वै वरुणः' (कौ. ५।४), 'वरुणो वै देवानां राजा' (श. १२।८।३।१०) इत्याद्याः प्रभूताः श्रुतयो वरुणं परमात्मरूपेण स्वीकुर्वन्ति ।

अपि चायं वरुणो मध्यस्थानीयो देवः । आप्त्येषु श्रेष्ठतमोऽसौ त्रितश्चापि मध्यमस्थानीयो देवविशेषः इन्द्रसहचारी । अतो द्वयोर्मध्यस्थानीयत्वाद् वरुणस्यापि त्रितत्वव्याख्यानमत्र सङ्घटते । तस्मादेव ऋग्वेदेऽपि "यस्मिन् विश्वानि काव्या चक्रे

नाभिरिवाश्रिता। त्रितं जूती सपर्यत व्रजे गावो न संयुजे ।'' (८.४१.६) इति मन्त्रे वरुणं त्रितममन्यत मन्त्रद्रष्टा नाभाकः। शतपथब्राह्मणे एषाम् आप्त्यानामुत्पत्तिप्रकारस्त्वेवं श्रूयते। "अग्निः स भीषा निलिल्ये, सोऽपः प्रविवेश, तं देवा अनुविद्य सहसैवाद्भ्य आनिन्युः, सोऽपोऽभितिष्ठेवावष्ठयूतास्थ या अप्रपदनं स्थ याभ्यो वा मामकामं नयन्तीति तत आप्त्याः सम्बभूवुस्त्रितो द्वित एकतः" (श.ब्रा.१.२.३.१)। अर्थात् पूर्वं कुतश्चिद्धेतोः भीतोऽग्निरपः प्राविशत्। ततो देवास्तं परिज्ञाय जगृहुः। तदाग्निना वीर्यमप्सु मुक्तम्। ततो हि आप्त्याः सम्बभूवुस्त्रितद्वितैकतसंज्ञाः। सेयं श्रुतिकथा तै०ब्राह्मणेऽपि सङ्केत-रूपेणैवमाम्नायते--"देवा वै हविर्भूत्वाऽब्रुवन् किस्मिन्निदं म्रक्ष्यामह इति। सोऽग्नि-रब्रवीत् मयि तनूः सं निधद्ध्वम्, अहं वस्तं जनयिष्यामि यस्मिन्म्रक्ष्वध्व इति। ते देवा अग्नौ तनूः संन्यदधत। तस्मादाहुः अग्निः सर्वा देवता इति। सो (अग्निः) ङ्गारेणापोऽभ्यपातयत् तत एकतोऽजायत। स द्वितीयमभ्यपातयत् ततो द्वितीयोऽजा-यत। स तृतीयमभ्यपातयत् ततस्त्रितोऽजायत। यदद्भ्योऽजायन्त तद् आप्याना-माप्यत्वम्" (तै. ब्रा. ३. २. ८. १०-११) इति। मैत्रायण्यामपि एतदेव पठ्यते---"सो (अग्निः) ऽपोऽङ्गारेणाभ्यपातयत्, तत एकतोऽजायत, द्वितीयं ततो द्वितस्तृतीयं ततस्त्रितः" (मै०सं० ४.१.६) इति। यदा पूर्वं कदाचिद् देवाः हविः-सम्पादने व्रीह्यवघातादिजनितं पापमाप्त्ये त्रिते स्थापयितुमैच्छन्, तदाऽयं देवान् प्रार्थया-मास "यदाविर्यदपीच्यं देवासो अस्ति दुष्कृतम्। त्रिते तद्विश्वमाप्त्य आरे अस्मद् दधातन" (ऋ. ८।४७।१३) इति। अर्थात् हे देवासः! यत्पापमाविर्भूतं यच्चान्तर्हितं विद्यते तदुभयं मयि त्रिते मा भूत्, किन्तु तद् दूरे स्थापयत इत्यर्थः। कामं प्रार्थिता अपि देवा यदा आप्त्येष्वेव तदघं पातितवन्तस्तदा इमे आप्त्या देवैः प्रदत्तं व्रीह्यवघातादि-जनितं पापं सूर्याभ्युदितादिषु परम्परया निमृष्टवन्तः। यथा चामनन्ति आथर्वणिकाः--"त्रिते देवा अमृजतैतदेनस्त्रित एतन्मनुष्येषु ममृजे।" (अथर्व. सं. ६.११३.१) इति। अर्थात् पूर्वं खलु देवा व्रीह्यवघातादिना हविः सम्पाद्य बीजवधादिपापलेपः कुत्र मार्जनीय इति विचार्य अग्निवचनेन स्ववीर्यम् अग्नौ स्थापितवन्तः। ततः सोऽग्निः सर्वदेववीर्यधारिणा अङ्गारेण अब्देवतामभिलक्ष्य तद्वीर्यमपातयत्। तस्मादुत्पन्नानाम् एकतादिनामकानां देवविशेषाणाम् आपो मातरः – इति आप्यानामेकत्वमेषां युक्तम्। मन्त्रेऽत्र त्रिष्वपि आप्त्येषु त्रितस्यैव प्राधान्यादस्यैवोल्लेख उपलभ्यते। इमे पुनराप्त्याः स्वात्मनि समवेतं पापं कुत्र स्थापितवन्तः? इत्यत्र भवति ब्राह्मणम्---"ते देवा आप्त्येष्वमृजत। आप्त्या अमृजत सूर्याभ्युदिते। सूर्याभ्युदितः सूर्याभिनिम्रुक्ते। सूर्या-भिनिम्रुक्तः कुनखिनि। कुनखी श्यावदति। श्यावदन्नग्रदिधिषौ। अग्रदिधिषुः परिवित्ते। परिवित्तो वीरहणि। वीरहा ब्रह्महणि। तद् ब्रह्महणं नात्यच्यवत" (तै. ब्रा. कां. ३, प्र. २, अ. ८) इति। ते एकतादय आप्यास्तत् पापं सूर्याभ्युदिते सूर्याभिनिम्रुक्ते च अर्थात् उदयास्तमयसमययोः सुप्ते पुरुषेऽपातयन्। यथाचोक्तमभि-युक्तैः---"सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च। अंशुमानभिनिम्रुक्ताभ्युदितौ तौ यथाक्रमम्" (अमरकोषः २।७।५४-५५) इति। एतौ च तदेनः कुत्सितनखवति

जनेऽपातयताम्, स च कृष्णदशने जने तद् ग्रमार्जयत्, सोऽपि ग्रग्रदिधिषौ। ज्येष्ठायामनूढायां कनिष्ठाम् ऊढ्वाऽवस्थितोऽग्रदिधिषुर्भवतीति प्राचीना मर्यादा। परं मनुस्त्वाह---"ज्येष्ठायां यद्यनूढायां कन्यायामुह्यतेऽनुजा। सा चाग्रे दिधिषूर्ज्ञेया पूर्वा तु दिधिषुर्मता" (ग्र०३) इति। ज्येष्ठायामनूढायामूढाऽनुजा ग्रग्रे दिधिषूः इति मनुवचनस्वारस्यम्। कोषकारस्तु 'स तु द्विजोऽग्रे दिधिषूः सैव यस्य कुटुम्बिनी' (ग्रमर. ६२।८३)। ग्रर्थात् द्विवारं विवाहितायाः पतिरग्रदिधिषुरिति कोषकारः।सचायं। स्वकिल्बिषं परिवित्ते मुमोच। ऊढवति कनिष्ठे विवाहविरहितो ज्येष्ठः परिवित्तः परिकीर्त्तितः। उक्तं च मनुना--"दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते। परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः॥" (मनु. ३।१७१) इति। ग्रसौ परिवित्तश्च तदघं वीरघातके ['पुत्रो वै वीरः' (श. ३.३.१.१२)] पुत्रमारके पुरु-ऽपीपतत्। स च पुनः ब्रह्मघातिनि जनेऽपातयत्। किन्त्वतः परं ब्रह्महत्यायाः पापातिशयात् तत् पापं ब्रह्महणं नात्यक्रामत्---इत्यस्ति ब्राह्मणवाक्यस्वारस्यम्।

सोऽयमाप्त्येषु वरीयान् त्रितः त्वष्टृतनयस्य त्रिशिरसो वधार्थमिन्द्रेण याचित ग्रात्मनो बलवीर्यवृद्धये यज्ञभागं वव्रे। इन्द्रश्चास्मै यज्ञभाजं चकार। तेन वृद्धवीर्यस्त्रितः त्रिशीर्षाणं मूर्च्छितं कृतवान्। सोऽयमितिहासो दाशतय्यामेवं सूचितः---"ग्रस्य त्रितः क्रतुना वव्रे ग्रन्तरिच्छन् धीतिं पितुरेवैः परस्य। सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण ग्रायुधानि वेति॥ (१०.८.७) "स पित्र्याण्यायुधानि विद्वानिन्द्रेषित ग्राप्त्यो ग्रभ्ययुध्यत्। त्रिशीर्षाणं सप्तरश्मिं जघन्वान् त्वाष्ट्रस्य चिन्निःससृजे त्रितो गाः" (ऋ. १०.८.८) इति च। ग्रत एव ग्राप्त्येभ्य एभ्यः पात्यङ्गुलिप्रक्षालनं प्राप्यते यजुषि "त्रिताय त्वा द्विताय त्वैकताय त्वा" (यजुः सं० १।२३) इति। भवति चात्र कात्यायनश्रौतसूत्रमपि "पात्यङ्गुलिप्रक्षालनमाप्त्येभ्यो निनयति, ग्रभितप्य प्रत्यगसं स्यन्दमानं त्रिताय त्वेति प्रतिमन्त्रमिति।" (कात्या. श्रौ. सू. २।५।२६) इति।

एवं सोऽयं त्रितो यज्ञभाग् देवः सिध्यति। स एव त्रितो नाम महर्षिरपि मन्त्रद्रष्टा बभूव। ग्रसौ ऋग्वेदस्य प्रथममण्डले पञ्चाधिकैकशतं सूक्तम्, ग्रष्टममण्डले सप्तचत्वारिंशत्तमं सूक्तम्, नवममण्डले त्रयस्त्रिंशत्तमं, चतुस्त्रिंशत्तमं द्व्यधिकैकशतं च सूक्तम्, दशमे मण्डले चाद्यानि सप्त सूक्तानि ददर्शेत्यस्य मन्त्रद्रष्टृत्वमप्यवितथम्। ग्रस्येतिहासमामनन्ति शाट्यायनिनः---"एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो बभूवुः। ते कदाचिन्मरुस्थलेऽरण्ये वर्त्तमानाः पिपासया सन्तप्तगात्राः सन्त एकं कूपमविन्दन्। तत्र त्रित एको जलपानाय कूपं प्राविशत्। स्वयं निपीय पानीयमितरयोश्च कूपादुदकमुद्धृत्य प्रादात्। तौ तदुकं पीत्वा त्रितं कूपे पातयित्वा तदीयं धनं सर्वमपहृत्य कूपञ्च रथचक्रेण पिधाय प्रास्थिषाताम्। ततः कूपे पतितः स त्रितः कूपादुत्तरीतुमशक्नुवानः 'सर्वे देवा मामुद्धरन्तु' इति मनसि चकार। ततश्च स तत्र तेषां स्तावकं सूक्तमपि दृष्टवान्। तदानीं बृहतः पतिर्देवस्तत्र तमुज्जहार। सोऽयं

सङ्केत उपलभ्यते ऋक्संहितायामपि--"त्रितः कूपेऽवहितो देवान् हवत ऊतये। तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी" (ऋ. १.१०५.१७) इति। देवेन्द्रेणापि कूपे पतितस्य त्रितस्यास्योद्धरणार्थं यत्नोऽक्रियतेति स्वयमिन्द्र एव कथयति--"अहमिन्द्रो रोधो वक्षो अथर्वणस्त्रिताय गा अजनयमहेरधि" (ऋ. १०.४८.२) इति।

त्रितस्यास्य मन्त्रद्रष्टुर्महर्षेः सोमेन वर्धमानः इन्द्रः अर्बुदाभिधमसुरमपि अस्य सपत्नं न्यवधीदित्यपि श्रूयते तत्रैव---"अस्य सुवानस्य मन्दिनस्त्रितस्य न्यर्बुदं वावृधानो अस्तः" (ऋ. २.११.२०) महर्षिः सव्य आङ्गिरसोऽपि इन्द्रेण कृतमर्बुद-वधं वर्णयति---'महान्तं चिदर्बुदं नि क्रमीः पदा सनादेव दस्युहत्याय जज्ञिषे" (ऋ. १.५१.६) इति। मरुतोऽपि देवास्त्रितस्य सपत्नान् समघ्नन्नित्यपि प्राप्यते दाशतय्याम्--"यद्वा निदे नवमानस्य रुद्रियास्त्रितं जराय जुरतामदाभ्याः" (ऋ. २.३४.१०)। रुद्रिया मरुतः त्रितम् ऋषिं हिंसतां विनाशाय अभूवन्निति सायणः। नवममण्डलेऽपि तथैव पठ्यते--"अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम्।" (८।७।२४) इति। अर्थात् शत्रून् संप्रहरतस्त्रितस्य परेषां शोषकं बलं मरुतः अनु-आवन् साहाय्यार्थमन्वगच्छन्। तदीयं कर्म चारक्षन् इत्यर्थः।

अनेनैव त्रितेनैकात्म्यमाप्तो वरुणः परमात्मा अत्र स्तूयते--

अमृतासुः, अमृताः अमरधर्माणः असवः प्रकाशाः प्राणा वा यस्य सः तादृशः। अस दीप्तौ अथवा असु क्षेपणे धातोः 'शृस्वृस्निहि'०। (उ. १.१०) इत्यनेन औणादिक उप्रत्ययः। पीयूषवर्षिण्या दीप्त्या पीयूषकल्पया प्राणशक्त्या वा विलसितः इत्यर्थः। यद्वा अमृतैः इन्द्रादिदेवैः रक्षितः असवः प्राणाः यस्य सः। कूपे पतितं त्रितेनाभिन्नतां गतं वरुणं देवा उज्जह्रुरिति "अहमिन्द्रो रोधो वक्षो०" (ऋ. ११.४८.२), तथा "त्रितः कूपेऽवहितो देवान् हवत ऊतये०" (ऋ. १.१०५.१७) इत्यादयः ऋङ्मन्त्राः प्रमाणम्। अत एव **सुजन्मा**, शोभनं जन्म यस्य सः। त्वष्टुः पुत्रं त्रिशीर्षाणं हन्तुमिन्द्रेण देवाधिदेवेनापि यः प्रार्थितः, सपणबन्धश्च यस्तस्येन्द्रस्य साहाय्यं कृतवानिति धन्यतममस्य जन्मग्रहणम्। एवमेव अर्बुदासुरवधावसरे यस्य सोमेन समृद्धवीर्यः सुरेन्द्रस्तमर्बुदं न्यवधीदिति किं कथनीयमस्य सुजन्मत्वम्। **वर्धमानः**, एधमानः। जगति प्रादुर्भूय सर्वत्र प्रसरणशीलः इत्यर्थः। यद्यप्ययमात्मा न म्रियते जायते वा कदाचित् तथापि लोकसृष्ट्यनुरोधेनायं सुजन्मा वर्धमानश्च प्रोक्तः। अत-एव यजुषि पठ्यते--'अजायमानो बहुधा विजायते' (३१.१९) इत्यादि। पुनः कीदृशो वरुणः परमात्मा? **ऋधङ्मन्त्रः**, ऋधक् सत्यमित्यन्यत्र सायणः (ऋ. ७.६१.३)। ऋधक् सत्येऽपि, वियोग-शीघ्र-सामीप्य-लाघवेष्वित्यन्ये' इति सिद्धान्तकौमुद्याः अव्ययप्रकरणे तत्त्वबोधिनी। सत्यसङ्कल्प इत्यर्थः। यद्वा आमनन्ति नैरुक्ताः। "ऋधक् पृथग्भावस्य प्रवचनं भवति। अथापि ऋध्नोत्यर्थे दृश्यते। ऋध्नुवन्।" (निरु.४।२५) समृद्धवचनः इत्यर्थः। 'वाग्घि मन्त्रः' (श. १.४.४.११) सत्यवचनः। यद्वा 'ब्रह्म वै मन्त्रः' (श. ७.१.१.५) समृद्धज्ञानवैभवः। मन्त्रः--इत्यत्र मत्रि गुप्तभाषणे धातोर्वञ्।

ऋधङ् मन्त्रः, समृद्धगुह्यवादः इत्यर्थः। यथाम्नायते मन्त्रशब्दो मेदिन्याम् "मन्त्रो वेदविशेषे स्याद् देवादीनाञ्च साधने। गुह्यवादेऽपि च पुमान्" इति। पुनः विशिनष्टि। **अह इव भ्राजमानः**। दिवस इव द्योतमानः। पूर्वोक्तया सत्यनिष्ठया, समृद्धज्ञान-महिम्ना चात्मा द्योतते इति भावः। अदब्धासुः दभ्नोति वधकर्मेति निघण्टुः (२।१९)। दभ्धातोः क्तः प्रत्ययः, नञ् समासश्च। अदब्धाः न केनापि हिंसिताः असवः प्राणाः यस्य सः। अदम्यप्राणसामर्थ्य इत्यर्थः"। यद्वा 'प्राणा वै भुजः' (श. ७.५.१,२१) कूपपातेऽपि तज्जनितविशिष्टाघातादिना अदब्धप्राणः अत्रुटितबाहु-रित्यर्थः। अथवा 'प्राणा उ वा वायुः' (श. ८.४.१.३)। कूपस्य अपिहितत्वेन अवरुद्धेऽपि श्वासप्रश्वासक्रमे अदब्धाः अनवरुद्धाः असवः प्राणवायवः यस्य सः। वरुणेनाभिन्नतां प्राप्तस्य त्रितस्य कूपपातकथा तु पूर्वं व्याख्याता एव। एतादृशः स **योनिम् आबभूव**। 'संवत्सरो वाव योनिः' (श. ८.४.१.१८) संवत्सरोपलक्षिते निखिलेऽपि कालचक्रे व्याप्तो बभूव। अत एवाम्नायते 'योनिरेव वरुणः' (श. १२.९.१.१७)। योनिर्जगदुद्भवसाधनमित्यपि कश्चिन्मनुते। तथाविधः यः **त्रितः**' तॄ प्लवनसन्तरणयोः धातोः औणादिकः कितच्प्रत्ययः। त्रि इत्युपपदे तनुविस्तारे धातोर्वा डः प्रत्ययः। त्रितस्तीर्णतमः इति निरुक्तम् (४।६)। यस्त्रीणि आध्यात्मिका-धिदैविकाधिभौतिकसुखानि तनोति तादृशः, यद्वा त्रितः त्रिस्थानः (निरु० ९.४५) लोकत्रयं व्याप्य त्रिषु अपि स्थानेषु अप्रतिहतप्रभावोऽस्तीत्यर्थः। अपि चायं वरुण-स्त्रितेन अभिन्नताङ्गतो वर्णित एव पूर्वम्। सोऽयं **धर्त्ता**, धृञ् धारणे धातोः कर्त्तरि तृच्-प्रत्ययः। सर्वविश्वधारकः। अत एव सः **त्रीणि भुवनानि दाधार** धरति पालयतीत्यर्थः।

आ यो धर्माणि प्रथमः ससाद
ततो वपूंषि कृणुषे पुरूणि।
धास्युर्योनिं प्रथम आ विवेश
यो वाचमनुदितां चिकेत ॥२॥

पदपाठः

आ। यः। धर्माणि। प्रथमः। ससाद। ततः। वपूंषि। कृणुषे। पुरूणि। धास्युः। योनिम्। प्रथमः। आ। विवेश। यः। वाचम्। अनुदिताम्। चिकेत ॥२॥

यो वरुणो व्यापकः परमात्मा, कीदृशः? **प्रथमः** आद्यः यद्वा प्रतमः प्रकृष्ट-तमः। यद्वा सर्वदेवप्रधानभूतः अथवा सृष्टिनिदानम्। प्रथ-आख्याने धातोः 'प्रथेरमच्' (उ. ५।६८) इत्यमच् प्रत्ययः। "प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्य-वत्" इति मेदिनी। ईदृशः स **धर्माणि** धरति विश्वम्-इति धर्मम्। धृञ् धारणे धातोः 'अर्त्तिस्तुसु'० (उ. १।१४०) इत्यादिना मन् प्रत्ययः। जगदाचारान् कृत्यानि वा 'धर्मोऽस्त्री पुण्य आचारे स्वभावोपमयोः क्रतौ। अहिंसोपनिषन्न्याये ना

धनुर्यम-सोमपे" इति मेदिनी। **आससाद** प्राप्नोत्। यद्वा दधार। अत एव 'वरुणाय धर्मस्य पतये' (मैत्रा. २।६।६) इति वाक्यं सङ्गच्छते। ऐतरेयारण्यकेऽप्येवमाम्नायते– 'वरुणोऽस्य प्रजां धर्मेण दाधार' (२।१।७) इति। सर्वजगन्निदानभूतः स विश्वसृष्टिधर्मान् अभिव्याप्य तान् सर्वत्र प्रचारयामासेत्यर्थः। **तत**. तदनन्तरं स **पुरूणि** बहूनि **वपूंषि** डुवप् बीजसन्ताने धातोः 'अर्त्तिपृवपियजि० (उ. २।११७) इत्यादिना उप्रत्ययः। रूपनामसु पाठात् बहूनि रूपाणि **कृणुषे** कृणुते। पुरुषव्यत्ययश्छान्दसः। स्थूल-सूक्ष्म-कारणशरीराणि धारयतीत्यर्थः। स एकः सन् जगति नानाशरीराणि तनुते। यश्च **अनुदितां वाचम्** अकथितां वाणीम् अपि **आचिकेत** सम्यक् जानाति अन्तय मित्वाद् यः सर्वेषां हार्दं विजानातीत्यर्थः। यद्वा यः अव्यक्तां वाचं वदति। यतो मनुष्या हि केवलं व्यक्तां वैखरीमेव वाचमुच्चारयन्ति। अव्यक्ता गुहानिहिता मध्यमा वाचस्तु ब्रह्मज्ञानिनो विज्ञा एव वदन्तीति। श्रुतिरत्र प्रमाणम्–"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" इति। **यश्च प्रथमः धास्युः** सर्वजगद्धारणसामर्थ्यशीलः परमात्मा। धास्यति इति धास्युः। डुधाञ् धारणपोषणयोः धातोः बाहुलकात् औणादिको युच्-प्रत्ययः, सुडागमश्च। **योनिम्** योनिर्गृहमिति निघण्टुः (३।४) आत्मकेन्द्रस्थलम् **आविवेश** प्रविष्टवान्। अत एव योनिवरुणयोरैकात्म्यमामनुते याज्ञवल्क्यः–'योनिरेव वरुणः' (श. १२.६.१.१७) इति। स हि सर्वं विश्वं समुत्पाद्य तत्र रममाणोऽपि स्वस्मिन् आत्मनि अवतिष्ठते, न विक्रिमते–इति भावः।

यस्ते शोकाय तन्वं रिरेच
क्षरद्धिरण्यं शुचयोऽनु स्वाः।
अत्रा दधेते अमृतानि नामास्मे
वस्त्राणि विश एरयन्ताम् ॥३॥

पदपाठः

यः। ते। शोकाय। तन्वम्। रिरेच। क्षरत्। हिरण्यम्। शुचय। अनु। स्वाः। अत्र। दधेते इति। अमृतानि। नाम। अस्मे इति। वस्त्राणि। विशः। आ। ईरयन्ताम् ॥३॥

हे वरुण परमात्मन्! यः खलु पुरुषः **शोकाय ते**, शुच शोके धातोर्घञ्। तव चिन्तनाय, यद्वा शोचतिर्ज्वलतिकर्मा (निघ. १।१६) तेजस्विने त्वत्कृते **तन्व** शरीरम्, यद्वा 'आत्मा वै तनुः' (श. ६।७।२।६) स्वकीयमात्मानं, आत्माभिमानित्वमित्यर्थः **रिरेच**, रिचिर् विरेचने धातोर्लिट्, परिहरति। तथा यः स्वाः **शुचयः**, शुचिर् पूतीभावे धातोः 'इगुपधात् कित्' (उ. ४।१२०) इति इन् किच्च। शुचिः शोचतेर्ज्वलतिकर्मणः (निरु. ६।१) स्वकीयाः पवित्रदीप्तीः आत्मवृत्तीः इत्यर्थः, **क्षरद्धिरण्यमनु**, 'ज्योतिर्हिरण्यम्' (श. ४।३।१।२१) परितः प्रसरत्प्रकाशं त्वामनु प्रेरयति, यद्वा हिरण्यं

वरुणस्यैव रूपं, यथा चाम्नायते तै० ब्राह्मणे–'वरुणस्य वा अभिषिच्यमानस्याप इन्द्रियं वीर्यं निरघ्नन्, तद्धिरण्यमभवत्' (तै०ब्रा०.८।१।६।१) इति। हे वरुण ! त्वत्स्वरूपमनु प्रेरयति। **अत्र** अस्मिन् पुरुषे सर्वे देवाः **अमृतानि** सुखानि यद्वा 'अमृतं वै प्राणाः' (गो. उ. १.१३) प्राणसामर्थ्यम्, **दधेते** स्थापयन्ति। **अस्मे** च अस्मै पुरुषाय च **विश:** 'विड् वै विश्वे देवाः' (कपिष्ठ०क.सं० ४६।३) सर्वे देवाः **वस्त्राणि** वस्त्रोपलक्षितानि सर्वाणि सुखानि **एरयन्तां नाम**, प्रेरयन्तु। यद्वा अस्मे अस्मात् पुरुषात् सर्वे देवाः वस्त्राणि आवरणानि एरयन्ताम् अपाकुर्वन्तु अपहरन्तु इत्यर्थः। यथा चाम्नायते ईशावास्योपनिषदि अपि–"तत् त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये" इति।

प्र यदेते प्रतरं पूर्व्यं गुः
सदःसद आतिष्ठन्तो अजुर्यम्।
कविः शुषस्य मातरा रिहाणे
जाम्यै धुर्यं पतिमेरयेथाम् ॥४॥

पदपाठः

प्र। यत्। एते। प्रऽतरम्। पूर्व्यम्। गुः। सदःऽसदः। आऽतिष्ठन्तः। अजुर्यम्। कविः। शुषस्य। मातरा। रिहाणे इति। जाम्यै। धुर्यम्। पतिम्। आ। ईरयेथाम् ॥४॥

यदेते सदःसदः, सीदन्ति यस्मिन् यस्मिन् तत् तद् गृहम्। शरीरात्मकं प्रतिगृहम्, अत्र सदःपदस्य वीप्सायां द्वित्वम्। **आतिष्ठन्तः** स्थितिं कुर्वन्तः, प्रतिशरीरं प्रवेशं लभमानाः जीवात्मानः इत्यर्थः, **अजुर्यम्** नञ्-उपपदात् जॄ वयोहानौ धातोः क्विपि अजुर्, 'बहुलं छन्दसि' इति उकारादेशः, 'तत्र साधुः' इति यच्च। शरीरात्मजीर्णावस्थारहितम्, विकारशून्यमित्यर्थः। **प्रतरं** प्रकृष्टतरं, प्रकर्षेण दुःखात्तारकम्, यद्वा प्रतरति सांसारिकदुःखानि येन तम्। प्रपूर्वकात् तॄ प्लवनसन्तरणयोः धातोः 'ऋदोरप्' इत्यप् प्रत्ययः। तथा **पूर्व्यं** पूर्व्यमिति पुराणनामसु पाठात् (निघ० ३।२७) सर्वप्राचीनम्, नित्यमित्यर्थः। **कविः** कविम्, क्रान्तदर्शिनम्, यद्वा 'असौ वा आदित्यः कविः' (श. ६।७।२।४) आदित्यवत् सर्वसाक्षिणमित्यर्थः। विभक्तिव्यत्ययश्छान्दसः। ईदृशं परमात्मानं वरुणं **प्रगुः** प्रकर्षेण गच्छन्ति, प्राप्नुवन्तीति भावः। प्रपूर्वकात् इण् गतौ धातोः लुङ्। 'इणो गा लुङि' इति गादेशः 'गातिस्थाघु०' इति सिचो लुक्। अडभावश्छान्दसः। लडर्थे लुङ् च। शरीरात्मभेदेनात्र बहुवचनम्। **रिहाणे** आस्वादयन्त्यौ परस्परं सङ्गते इत्यर्थः, **मातरा** मातृवत् हितकारिण्यौ द्यावापृथिव्यौ एनं जीवात्मानं **जाम्यै** जमतीति गतिकर्मसु पठितम् (निघ० २।१४), या प्रापणे धातोः बाहुलकात् औणादिको मिः प्रत्ययः, धातोरादेशश्च जकारादेशः। ततः 'इणजादिभ्यः' (पा. ३।३।१०) इतीण् प्रत्ययः। गन्तुं, कुत्र गमनाय ? **धुर्यं** 'अग्निर्वा एष धुर्यः' (श. १.१.२.१०) ब्रह्मस्वरूपिणम् अग्निम्। पुनः कीदृशं ? **पतिम्** सर्वेषां पालकं वरुणं

प्रति गन्तुं 'वरुणः सम्राट् सम्राट्पतिः' इति तै० ब्राह्मणम् (२।५।७।३) **एरयेथाम्** प्रेरयेताम्। वचनव्यत्ययश्छान्दसः। यद्वा मातरा इति सम्बोधनम। हे मातरा! युवां प्रेरयेथाम्।

तदू षु ते महत् पृथुज्मन्
नमः कविः काव्येना कृणोमि।
यत् सम्यञ्चावभियन्तावभि
क्षामत्रा मही रोधचक्रे वावृधेते ॥५॥

पदपाठः

तत्। ऊँ इति। सु। ते। महत्। पृथुऽज्मन्। नमः। कविः। काव्येन। कृणोमि। यत्। सम्यञ्चौ। अभिऽयन्तौ। अभि। क्षाम्। अत्र। मही इति। रोधचक्रे इति रोधऽचक्रे। ववृधेते इति ॥५॥

तत् उ तस्मादेव कारणात् हे **पृथुज्मन्**! ज्मेति पृथिवीनाम (निघ० १।१) पृथु विस्तृतं पृथिवीव स्वरूपं यस्य तत्सम्बुद्धौ। हे बहुविस्तृतस्वरूपपरमात्मन्! हे बहुगतिशील! इत्यपि कश्चित्। **कविः** अहं कवयिता, परमात्मतत्त्ववेत्ता वा अहं **काव्येन** 'त्रयी वै विद्या काव्यम्' (श. ८।५।२।४) वेदमन्त्रेणेत्यर्थः, **ते** तव परमात्मनो वरुणस्य **सुमहत्** प्रभूतं **नमः** प्रणमनम्, यद्वा अन्ननामसु (निघ. २।७) पाठात् ते तुभ्यं नमः पुरोडाशाद्यन्नप्रदानम् अथवा 'यज्ञो वै नमः' (श. २।४।२।२४) तव यजनं **कृणोमि** करोमि। नमनं नमः। कृणोमीत्यत्र डुकृञ् करणे धातोः विकरण-व्यत्ययेन श्नुः। **यत्** यतः तवैव महिम्ना **मही रोधचक्रे** महान्ति रोधनशीलानि परिवर्तनशीलानि चक्राणि आवर्त्तनानि ययोस्ते, **सम्यञ्चौ** परस्परं मिलितौ, सम्यक् सम्मिल्य इत्यर्थः, **अभियन्तौ** अभितः गच्छन्तौ सदैव प्रवर्त्तमानौ इत्यर्थः। लिङ्ग-व्यत्ययश्छान्दसः। **अत्र क्षां**, क्षा इति पृथ्वीनाम (निघ० १।१), क्षा क्षियतेर्निवास-कर्मणः इति निरुक्तञ्च (२।६)। इह भूमिम्, लक्षणया भूमिवासिनो लोकान् **वावृधाते** विशेषेण वर्धयतः। वृधु वृद्धौ धातोर्यङ्लुगन्ताल्लट्। अर्थात् हे वरुण, तव प्रभावेणैव अहारात्रोपलक्षितं निखिलं कालचक्रं पृथिव्यां प्रवर्त्तमानं विद्यते—इति।

सप्त मर्यादाः कवयस्ततक्षु-
स्तासामिदेकामभ्यंहुरो गात्।
आयोर्ह स्कम्भ उपमस्य नीडे
पथां विसर्गे धरुणेषु तस्थौ ॥६॥

पदपाठः

सप्त। मर्यादाः। कवयः। ततक्षुः। तासाम्। इत्। एकाम्। अभि। अंहुरः। गात्। आयोः। ह। स्कम्भः। उपमस्य। नीडे। पथाम्। विऽसर्गे। धरुणेषु। तस्थौ ॥६॥

कवयः क्रान्तदर्शिनो विद्वांसः। 'ये विद्वांसस्ते कवयः' इति शातपथी श्रुतिः (७।२।२।४), **सप्त मर्यादाः**, मर्यैः मनुष्यैः आदीयते इति मर्यादा। सप्त सङ्ख्याकाः लोकसञ्चालनव्यवस्थाः। तासु कतिचन मनुनाऽपि प्रोक्ताः–"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः। महान्ति पातकान्याहुः संसर्गश्चापि तैः सह" (मनुः ११।५४) इति। यद्वा 'पानमक्षाः स्त्रियो मृगया दण्डः पारुष्यमन्यदूषणमिति' सप्त मर्यादाः। अथवा यास्काचार्येण निरुक्ते (६।२७) निरुक्ताः 'स्तेयं, गुरुतल्पारोहणं, ब्रह्महत्या, सुरापानम्, दुष्कृतकर्मणः पुनः पुनः सेवा, पातकेऽनृतोद्यम् इत्याद्याः सप्त मर्यादाः। **ततक्षुः** समस्तेषु लोकव्यवहारेषु चायं चायं सप्त व्यवस्थाः निर्धारितवन्तः इत्यर्थः। तक्षू तनूकरणे धातोर्लिटि। यदि कश्चन मर्यः तासां सप्त मर्यादानां मध्ये **एकाम् इत्** एकामपि **अभिगात्** उल्लङ्घ्य गच्छति, **अंहुरः** स पापीयान्। यस्त्वेवं करोति स पापी भवतीत्यर्थः। किञ्च **आयोः** तस्य मनुष्यस्य स्कम्भः स्कम्भयिता निरोधकोऽग्निः **उपमस्य** समीपभूतस्य आयोः **नीडे** स्थाने **पथाम्** आदित्यरूपस्य स्वस्य रश्मीनां **विसर्गे** विसर्जनस्थानेऽन्तरिक्षे वर्त्तमानेषु **धरुणेषु** उदकेषु **तस्थौ** विद्युदात्मना तिष्ठति। अनेनास्य लोकत्रयवर्त्तित्वमिति सायणः (१०।५।६), यद्वा आयोः स्कम्भ दीर्घायुषः आधारभूतः उपर्युक्तमर्यादानां पालकः पुरुषः पथां विसर्गे प्रलयकालपर्यन्तम् उपमस्य नीडे, परमात्मनः समीपस्थाने आदित्यमण्डले तथा धरुणेषु ध्रुवलोकेषु तस्थौ तिष्ठति। इत्यपि कश्चित् व्याचख्यौ।

मन्त्रस्यास्य पूर्वार्धभागः पाठभेदेन ऋग्वेदेऽपि पठ्यते (ऋ. १०।५।६)

उतामृतासुर्व्रत एमि कृण्वन्न-
सुरात्मा तन्वस्तत् सुमद्गुः।
उत वा शक्रो रत्नं दधात्यूर्जया
वा यत् सचते हविर्दाः ॥७॥

पदपाठः

उत। अमृतऽअसुः। व्रतः। एमि। कृण्वन्। असुः। आत्मा। तन्वः। तत। सुमत्ऽगुः। उत। वा। शक्रः। रत्नम्। दधाति। ऊर्जया। वा। यत्। सचते। हविःऽदाः ॥७॥

व्रतः, 'अग्निहोत्रं वाव व्रतम्' (कपिष्ठल० ३६।४) विभक्तिव्यत्ययश्छान्दसः। अग्निहोत्रं कर्म यद्वा 'एतत्खलु वै व्रतस्य रूपं यत् सत्यम्' (श. १२.४.२.४) व्रतः **सत्यं कृण्वन्** कुर्वन् सञ्चिन्वन् इत्यर्थः, उत अत एव **अमृतासुः** अमरप्राणः, यद्वा 'यद् ब्रह्म तदमृतम्' (जै.उ. १.८.१.१०) ब्रह्ममयप्राणो भूत्वा **तद् एमि** तद् वरुणब्रह्माभिमुखम् एमि अहं गच्छामि, तत् प्राप्नोमीत्यर्थः। तद् ब्रह्मैव **तन्वः** अस्य शरीरस्य **असुः** प्राणः, जीवातुभूतः इत्यर्थः। कीदृशोऽहम् एमि? **सुमद्गुः** सुमत् स्वयमिति यास्कः (निरु. ६।२२), गच्छतीति गुः। स्वयं गमनशीलः, यद्वा सुमत् शोभनमित्यन्यत्र सायणः (ऋ. ८।८७।४) शोभनगन्ता, पुनः कीदृशः? **आत्मा**, **'आत्मा यजमानः' (तै. ब्रा.**

१०.६४.१) देवानां यजनकर्त्ता, अत एवामनन्ति कौषीतकीयाः 'आत्मा वै यज्ञस्य होता' (९।६) इति। यद्वा 'आत्मा वै स्तोत्रियः' (ऐ. ब्रा. ३।२३) स्तवनकर्त्ता अहमेमीत्यर्थः। **शक्रः** इन्द्रः, यद्वा शक्रः शक्नोति कर्त्तुमकर्त्तुमन्यथापि कर्त्तुमिति शक्रः सर्वसमर्थः इत्यर्थः। शक्लृ शक्तौ धातोः 'स्फायितञ्जि०' (उ. २।१३) इत्यादिना उणादिसूत्रेण रक्प्रत्ययः। एतद्गुणविशिष्टो **वरुणः** परमात्मा **रत्नं**, रत्नमिति धननाम (निघ. २।१०), रमन्ते लोकानां मनांसि यस्मिंस्तत् रत्नम्। रमु क्रीडायां धातोः 'रमेस्त च' (उ० ३।१४) सूत्रेण नः। तकारश्चान्तादेशः। तस्मिन् याजके स्तवनकर्त्तरि वा पुरुषे बहूनि धनानि **दधाति** आदधाति, तस्मै प्रयच्छतीत्यर्थः। **उत** वा तथा **यत्** यदा **हविर्दाः** हवींषि ददातीति हविर्दाः। हविष् इत्युपपदे डुदाञ् दाने धातोः क्विप्। स हविर्दाता यजमानः **ऊर्जया** अन्ननामसु पाठात् (निघ. २।७) अन्नेन पुरोडाशादिना **सचते**, सेवते। सचन्ते सेवन्ते इति निरुक्तम् (७।२३)। षच् सेचने सेवने चेति धातोर्लटि रूपम्। हविर्दात्रे यज्ञसम्पादकीययजमानाय वरुणः रत्नानि प्रयच्छति, यदा हि सः पुरोडाशादिभिः तम् उपास्ते इत्यर्थः।

उत पुत्रः पितरं क्षत्रमीडे
ज्येष्ठं मर्यादमह्वयन्त्स्वस्तये।
दर्शन्नु ता वरुण यास्ते विष्ठा
आवर्व्रततः कृणवो वपूंषि ॥८॥

पदपाठः

उत। पुत्रः। पितरम्। क्षत्रम्। ईडे। ज्येष्ठम्। मर्यादम्। अह्वयन्। स्वस्तये। दर्शन्। नु। ताः। वरुण। याः। ते। विऽस्थाः। आऽवर्व्रततः। कृणवः। वपूंषि ॥८॥

उत तथा हे **वरुण** परमात्मन्! **पुत्रः** पुत्रस्थानीयोऽहं याजकः **क्षत्रं** उदकनामसु पाठात् (निघ. १.१२) जलस्वरूपं जलाधिपतिमित्यर्थः, यद्वा 'क्षत्रं वरुणः' (कौ० ७।१०) त्वां वरुणं, अथवा क्षतात् त्राणकारिणं **पितरं** पालकं पितृरूपं त्वाम् **ईडे** स्तवीमि। कस्मात्? **स्वस्तये**, आत्मश्रेयसे। यतः सर्वे **मर्यादम्**, मर्यादारक्षकं **ज्येष्ठं** सर्वोत्कृष्टमेव **अह्वयन्** आह्वयन्ति। अतस्त्वामीडे इति पूर्वेण सम्बन्धः। **हे वरुण** परमेश्वर त्वम् **आवर्व्रततः** अनन्तयोनिषु पुनः पुनः आवर्त्तनं कुर्वतः जीवात्मनः कृते **वपूंषि** शरीराणि **कृणवः** कुरुषे। 'बहु स्याम्' इति श्रुत्यनुरोधेन त्वमेव एकः सन्नपि नानायोनिषु जनुर्लभसे इत्यर्थः। किं कुर्वन्? **ते** तव **याः विष्ठाः** स्थितिसाधिकाः व्यवस्थाः सन्ति **ताः नु** क्षिप्रमेव **दर्शन्** दर्शयन् वपूंषि कृणवः इति पूर्वेणान्वयः। विष्ठा, विपूर्वकात् ष्ठा गतिनिवृत्तौ धातोः क्तः। ततः स्त्रियां टाप्।

अर्धमर्धेन पयसा पृणक्ष्यर्धेन शुष्म वर्धसे असुर।
अवि वृधाम शग्मियं सखायं वरुणं पुत्रमदित्या इषिरम्।
कविशस्तान्यस्मै वपूंष्यवोचाम रोदसी सत्यवाचा ॥९॥

पदपाठः

अर्धम् । अर्धेन । पयसा । पृणक्षि । अर्धेन । शुष्म । वर्धसे । असुर । अविम् । वृधाम । शग्मियम् । सखायम् । वरुणम् । पुत्रम् । अदित्याः । इषिरम् । कविऽशस्तानि । अस्मै । वपूंषि । अवोचाम । रोदसी इति । सत्यऽवाचा ॥९॥

असुर हे असूढबल ! वर्णव्यत्ययेन ढस्य रः । मुह वैचित्ये धतोः क्तः । नञ्-समासश्च । क्वचित् असूर इत्यपि पाठः । **अर्धेन पयसा** आत्मनः अर्धेन 'प्राणः पयः' इति श० ब्राह्मणम् (६।५।४।१५), प्राणेन केनचन स्वकीय.शेनेत्यर्थः । यद्वा पयः ज्वलतो नाम (निघ० १.१७) आत्मतेजसा अथवा 'रसो वै पयः' (श.ब्रा. ४।४।४।८) आत्मरसेन जलेन वा । पा पाने धातोः बाहुलकात् औणादिकः असुन् प्रत्ययः । **अर्धम्** अपूर्णमिदं जगत् **पृणक्षि** संयुनक्षि पूरयसीत्यर्थः । पृची (रुधा.) सम्पर्के धातोः लोट् **अर्धेन च** अवशिष्टांशेन **शुष्म** बलम् (निघ. २।९) शुष शोषणे धातोः 'अविसिविसिशुषिभ्यः कित्' (उ. १.१४४) इत्यनेन मन् किच्च । बलवर्धकमन्नादिकमित्यर्थः **वर्धसे** समृद्धं कुरुषे । अत एव **अविं** जगद्रक्षकं स्वामिनं 'अविर्नाथे रवौ मेषे शैले मूषिककम्बले' इति मेदिनी । पुनः कीदृशं ? **शग्मियं**, शग्ममिति सुखनाम (निघ. ३।६) कर्मनाम च (निघ. २।१) आनन्दस्वरूपिणम्, यद्वा कर्मरूपिणं, **सखायम्**, मित्रवत् हितैषिणम्, **अदित्याः** अखण्डितायाः देवमातुः **इषिरं** पुत्रं, प्रेरणाप्रदातारम् । इषिरः प्रेरकः इत्यन्यत्र सायणः (ऋ. ३-५-४) । **पुत्रम्** आत्मजं त्वां **वरुणं वृधामः** हविष्यान्नैः स्तवनैर्वा वर्धयामः । तथा **रोदसी** द्यावाभूम्योर्मध्ये **सत्यवाचा** मन्त्रवाण्या **कविशस्तानि** कविभिः क्रान्तदर्शिविद्वद्भिः प्रोक्तानि **वपूंषि**, वपुरिति रूपनाम (निघ. ३।७) अस्य रूपाणि **अस्मै** एतदर्थम् **अवोचाम** वर्णयामः इत्यर्थः ।

इति प्रथमं सूक्तम् ।

द्वितीयं सूक्तम्

नवर्चस्यास्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः । वरुणो देवता । प्रथमाद्यष्टर्चां त्रिष्टुप्, नवम्याश्च भुरिक्परातिजागता त्रिष्टुप् छन्दसी ।

'तदिद् आस' इति सूक्तस्य विनियोगः पूर्वसूक्तेन सह उक्तः ।

तथा सर्वफलकामोऽनेन सूक्तेन इन्द्राग्नी यजते उपतिष्ठते वा । तदुक्तं कौशिकेन-'तदिदास' (अ. ५।२) 'धीती वा' (अ. ७।१) इतीन्द्राग्नी' (कौ.सू. ५९।१७) इति ।

तदिदास भुवनेषु ज्येष्ठं
यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति
शत्रूननु यदेनं मदन्ति विश्व ऊमाः ॥१॥

पदपाठः

तत् । इत् । आस । भुवनेषु । ज्येष्ठम् । यतः । जज्ञे । उग्रः । त्वेषऽनृम्णः । सद्यः । जज्ञानः । नि । रिणाति । शत्रून् । अनु । यत् । एनम् । मदन्ति । विश्वे । ऊमाः ॥१॥

व्याख्यातोऽयं मन्त्रः विंशे काण्डे (अथर्व. २०।१०७।४)

वावृधानः शवसा भूर्योजाः
शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं
ते नवन्त प्रभृता मदेषु ॥२॥

पदपाठः

ववृधानः । शवसा । भूरिऽओजाः । शत्रुः । दासाय । भियसम् । दधाति । अविऽअनत् । च । विऽअनत् च । सस्नि । सम् । ते । नवन्त । प्रऽभृता । मदेषु ॥२॥

व्याख्यातोऽयं मन्त्रो विंशे काण्डे (अथर्व. २०।१०७।५)

त्वे क्रतुमपि पृञ्चन्ति भूरि
द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा
समदः सु मधु मधुनाभि योधीः ॥३॥

पदपाठः

त्वे इति । क्रतुम् । अपि । पृञ्चन्ति । भूरि । द्विः । यत् । एते । त्रिः । भवन्ति । ऊमाः । स्वादोः । स्वादीयः । स्वादुना । सृज । सम् । अदः । सु । मधु । मधुना । अभि । योधीः ॥३॥

व्याख्यातोऽयं मन्त्रः विंशे काण्डे (अथर्व. २०।१०७।६)

यदि चिन्नु त्वा धना जयन्तं
रणेरणे अनुमदन्ति विप्राः ।
ओजीयः शुष्मिन्त्स्थिरमा तनुष्व
मा त्वा दभन् दुरेवासः कशोकाः ॥४॥

पदपाठः

यदि । चित् । नु । त्वा । धना । जयन्तम् । रणेऽरणे । अनुऽमदन्ति । विप्राः । ओजीयः । शुष्मिन् । स्थिरम् । आ । तनुष्व । मा । त्वा । दभन् । दुःऽएवासः । कशोकाः ॥४॥

व्याख्यातोऽयं मन्त्रः विंशे काण्डे (अथर्व. २०।१०७।७)

त्वया वयं शाशद्महे रणेषु
प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः
सं ते शिशामि ब्रह्मणा वयांसि ॥५॥

पदपाठः

त्वया । वयम् । शाशद्महे । रणेषु । प्रऽपश्यन्तः । युधेन्यानि । भूरि । चोदयामि । ते । आयुधा । वचःऽभिः । सम् । ते । शिशामि । ब्रह्मणा । वयांसि ॥५॥

व्याख्यातोऽयं मन्त्रो विंशे काण्डे (अथर्व. २०।१०७।८) ।

नि तद् दधिषेऽवरे परे च
यस्मिन्नाविथावसा दुरोणे ।
आ स्थापयत मातरं
जिगत्नुमत इन्वत कर्वराणि भूरि ॥६॥

पदपाठः

नि । तत् । दधिषे । अवरे । परे । च । यस्मिन् । आविथ । अवसा । दुरोणे । आ । स्थापयत । मातरम् । जिगत्नुम् । अतः । इन्वत । कर्वराणि । भूरि ॥६॥

व्याख्यातोऽयं मन्त्रोः विंशे काण्डे (अथर्व. २०।१०७।९) ।

स्तुष्व वर्ष्मन् पुरुवर्त्मानं
समृभ्वाणमिनतममाप्तमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः
प्र सक्षति प्रतिमानं पृथिव्याः ॥७॥

पदपाठः

स्तुष्व । वर्ष्मन् । पुरुऽवर्त्मानम् । सम् । ऋभ्वाणम् । इनऽतमम् । आप्तम् । आप्त्यानाम् । आ । दर्शति । शवसा । भरिऽओजाः । प्र । सक्षति । प्रतिऽमानम् । पृथिव्याः ॥७॥

व्याख्यातोऽयं मन्त्रो विंशे काण्डे (अथर्व. २०।१०७।१०)

इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय
शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजा
तुरश्चिद् विश्वमर्णवत् तपस्वान् ॥८॥

पदपाठः

इमा । ब्रह्म । बृहत्ऽदिवः । कृणवत् । इन्द्राय । शूषम् । अग्रियः । स्वःऽसाः । महः । गोत्रस्य । क्षयति । स्वऽराजा । तुरः । चित् । विश्वम् । अर्णवत् । तपस्वान् ॥८॥

व्याख्यातोऽयं मन्त्रो विंशे काण्डे (अथर्व. २०।१०७।१११)

एवा महान् बृहद्दिवो अथर्वावोचत्
स्वां तन्वमिन्द्रमेव ।
स्वसारौ मातरिभ्वरी अरिप्रे
हिन्वन्ति चैने शवसा वर्धयन्ति च ॥९॥

पदपाठः

एव । महान् । बृहत्ऽदिवः । अथर्वा । अवोचत् । स्वाम् । तन्वम् । इन्द्रम् । एव । स्वसारौ । मातरिभ्वरी इति । अरिप्रे इति । हिन्वन्ति । च । एने इति । शवसा । वर्धयन्ति । च ॥९॥

व्याख्यातोऽयं मन्त्रोः विंशे काण्डे (अथर्व. २०।१०७।१२)

इति द्वितीयं सूक्तम् ।

तृतीयं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य बृहद्दिवोऽथर्वा ऋषिः । प्रथमा-द्वितीययोर्ऋचोर्विहव्योऽग्निः, तृतीया-चतुर्थ्योर्देवाः, पञ्चम्या द्रविणोदादयः, षष्ठी-नवमी-दशमीनां विश्वेदेवाः, सप्तम्याः सोमः, अष्टम्येकादश्योश्चेन्द्रो देवताः । प्रथमर्चस्तृतीयादिसप्तानामेकादश्याश्च त्रिष्टुप्, द्वितीयाया भुरिक्त्रिष्टुप्, दशम्याश्च विराड्जगती छन्दांसि ।

दर्शपूर्णमासयोः समिदाधाने 'ममाग्ने वर्चः' इति सूक्तस्य विनियोगः । तदुक्तं कौशिकेन । 'ममाग्ने वर्चः' इति समिध आधाय (कौ. सू. १।३३) इति ।

तथा वर्चस्यकर्मणि अस्य सूक्तस्य विनियोगः । "पूर्वस्य 'ममाग्ने वर्चः' इति वर्चस्यानि" (कौ.सू. १२।१०) इत्यादि सूत्रम् । एतद्विस्तरः 'ये त्रिषप्ताः' (अ. १।१) इति सूक्ते द्रष्टव्यः ।

तथा पुष्टिकर्मणि अस्य सूक्तस्य विनियोगः । तत्र "ममाग्ने वर्चः' इति सात्त्रिकान्" (कौ.सू. २२।१४) इत्यादि सूत्रम् ।

तथा विभागकर्मणि कलहाभावम् इच्छन् पिता अनेन सूक्तेन तैलिकस्य रज्जुम् अभिमन्त्र्य धारयति हस्तेन । "ममाग्ने वर्चः" इति विभुङ्क्षमाणः प्रमत्तरज्जुं धारयति' (कौ.सू. ३८।२६) इति सूत्रात् ।

विभुङ्क्षमाणः विभागं करिष्यन् । प्रमत्तरज्जुश्चाक्रिकाणाम् अवलम्बनरज्जुः ।

तथा आभिचारिके कर्मणि अनेन सूक्तेन बृहस्पतिशिरसम् औदनं पृषातकेनोपसिञ्चेत् । तदुक्तं कौशिकेन—"ममाग्ने वर्चः—इति बृहस्पतिशिरसं पृषातकेनोपसिच्य" (कौ.सू. ४९।१५) इति ।

तथा 'कौवेरीं धनकामस्य धनक्षये च' (न.क. १६।३) इति विहितायां कौवेर्यां महाशान्तौ एतत् सूक्तं योजयेत् । तदुक्तं नक्षत्रकल्पे—'ममाग्ने वर्चः' इति कौवेर्याम्'' (न.क. ६८।१४) इति ।

तथा हस्त्यश्वदीक्षाख्ये कर्मणि अनेन सूक्तेन जुहुयात् । तदुक्तं परिशिष्टे—"ममाग्ने वर्चः—इति जुहुयात्" (अ.प. १६) इति । अन्यत्रापि व्रतग्रहणादौ अस्य सूक्तस्य विनियोगः ।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम ।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण
पृतना जयेम ॥१॥

पदपाठः

मम । अग्ने । वर्चः । विऽहवेषु । अस्तु । वयम् । त्वा । इन्धानाः । तन्वम् । पुषेम । मह्यम् । नमन्ताम् । प्रऽदिशः । चतस्रः । त्वया । अधिऽअक्षेण । पृतनाः । जयेम ॥१॥

हे **अग्ने** ! **विहवेषु** विविधमाहूयन्ते येषु शूरा इति विहवाः सङ्ग्रामाः । यद्वा विविधं यागार्थं देवा आहूयन्त एष्विति विहवा यज्ञाः । सङ्ग्रामेषु यज्ञेषु वा **वर्चः** दीप्तिः त्वदनुग्रहात् **मम अस्तु** भवतु । **वयं** च **त्वा** त्वाम् **इन्धानाः** समिद्भिर्दीपयन्तः **तन्वं** तव शरीरं **पुषेम** हविर्भिर्वर्धयेम । अपि च **मह्यं** मदर्थम् । **चतस्रः प्रदिशः** प्रकृष्टा दिशः । तद्वासिनो जना इत्यर्थः । **नमन्तां** स्वत एव प्रह्वीभवन्तु । नमतेः कर्मकर्तरि लोटि 'न दुहस्नुनमां यक्चिणौ' (पा. ३।१।८९) इति यक्प्रतिषेधः । **त्वया** अस्माभिर्हविर्भिः प्रवर्धितेन **अध्यक्षेण** ईश्वरेण सता **पृतनाः** शत्रुसेनाः **जयेम** अभिभवेम । ऋग्वेदेऽपि प्राप्यतेऽयं मन्त्रः पाठभेदतः । (ऋ. १०।१२८।१) ।

अग्ने मन्युं प्रतिनुदन् परेषां त्वं नो
गोपाः परि पाहि विश्वतः ।
अपाञ्चो यन्तु निवता दुरस्यवोऽमैषां
चित्तं प्रबुधां विनेशत् ॥२॥

पदपाठः

अग्ने । मन्युम् । प्रतिऽनुदन् । परेषाम् । त्वम् । नः । गोपाः । परि । पाहि । विश्वतः । अपाञ्चः । यन्तु । निऽवता । दुरस्यवः । अमा । एषाम् । चित्तम् । प्रऽबुधाम् । वि । नेशत् ॥२॥

हे **अग्ने** ! **परेषां** शत्रूणां **मन्युं** क्रोधं **प्रतिनुदन्** प्रतिमुखं प्रेरयन् तिरस्कुर्वन् **अदब्धः** केनाप्यहिंसितो **गोपाः** गोपायिता । ईदृशः त्वं **नः** अस्मान् **परि पाहि** परितः सर्वतो रक्ष । तथा **दुरस्यवः** दुःखं प्रदातुं वाञ्छन्ति ते दुरस्यवः, कष्टदायिनः शत्रवः, **निवता** नम्राः सन्तः **अपाञ्चः यन्तु** दूरं यान्तु, अपि च **प्रबुधां** प्रबुध्यमानानाम् **एषां** शत्रूणां **चित्तं** ज्ञानसाधनं मनः **अमा** सह युगपदेव **विनेशत्** विनश्यतु । प्रत्येकाभिप्रायेणैकवचनम्, 'णश अदर्शने' इत्यस्माच्छान्दसो लुङ् । पुषादित्वात् च्लेरङादेशः । ऋग्वेदे पाठभेदेन पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।६) ।

मम देवा विहवे सन्तु सर्व इन्द्रवन्तो
मरुतो विष्णुरग्निः ।
ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः
पवतां कामायास्मै ।।३।।

पदपाठः

मम । देवाः । विऽहवे । सन्तु । सर्वे । इन्द्रऽवन्तः । मरुतः । विष्णुः । अग्निः । मम । अन्तरिक्षम् । उरुऽलोकम् । अस्तु । मह्यम् । वातः । पवताम् । कामाय । अस्मै ।।३।।

सर्वे देवाः **विहवे** सङ्ग्रामे यज्ञे वा **मम सन्तु** ममैव साधका भवन्तु । के पुनस्ते ! **इन्द्रवन्तः** इन्द्रेण युक्ताः, **मरुतो विष्णुरग्निः** च । तथा **अन्तरिक्षं मम उरुलोकं** विस्तीर्णप्रकाशकम् **अस्तु** । लोकृ दर्शने भावे घञ्, लोक आलोकः प्रकाशः । **मह्यं** मम, षष्ठयर्थे चतुर्थी । **अस्मै कामाय** इमां कामनां पूरयितुं **वातः** वायुः **पवताम्** अनुगुणं प्रवातु । 'पूङ् पवने' । भौवादिकः ।

स्वल्पेन पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।२)

मह्यं यजन्तां मम यानीष्टाकूतिः
सत्या मनसो मे अस्तु ।
एनो मा नि गां कतमच्चनाहं
विश्वे देवा अभि रक्षन्तु मेह ।।४।।

पदपाठः

मह्यम् । यजन्ताम् । मम ।। यानि । इष्टा । आऽकूतिः । सत्या । मनसः । मे । अस्तु । एनः । मा । नि । गाम् । कतमत् । चन । अहम् । विश्वे । देवाः । अभि । रक्षन्तु । मा । इह ।।४।।

मह्यं मदर्थं **यजन्ताम्** ऋत्विजो देवान् हविर्भिर्यजन्तु । यद्वा षष्ठ्यर्थे चतुर्थी । मह्यं मदीया ऋत्विज इत्यर्थः । **मम** स्वभूतानि हव्यानि **यानि** हवींषि

चरुपुरोडाशादीनि सन्ति तैर्हविर्भिरित्यर्थः। तथा मे मनसः आकूतिः सङ्कल्पनमभीष्टस्य प्रार्थनं सत्या यथार्थम् अस्तु। अपि च अहं कतमच्चन किमपि पुनः एनः पापं निगां मा नियतं निकृष्टतरं वा गच्छेयम्। पापं मा कार्षमित्यर्थः। अपि च विश्वे सर्वे देवाः इन्द्रादिदेवाः इह अत्र कर्मणि मा माम् अभिरक्षन्तु अभितः पान्तु। पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।४)।

मयि देवा द्रविणमा यजन्तां मय्याशी-
रस्तु मयि देवहूतिः।
दैवा होतारः सनिषन् न एतदरिष्टाः
स्याम तन्वा सुवीराः ॥५॥

पदपाठः

मयि। देवाः। द्रविणम्। आ। यजन्ताम्। मयि। आऽशीः। अस्तु। मयि। देवऽहूतिः। दैवाः। होतारः। सनिषन्। नः। एतत्। अरिष्टाः। स्याम। तन्वा। सुऽवीराः ॥५॥

देवाः सर्वे द्रविणं धनं मयि स्तोतरि आ यजन्तां गमयन्तु। मह्यं ददत्वित्यर्थः। तथा आशीः आशंसनीयं यज्ञफलं च मयि एव अस्तु। देवानां हूतिराह्वानमस्मिन्निति देवहूतिः यज्ञः। स चापि मयि अस्तु। अपि च देवानामिमे दैवाः। 'देवाद्यञञौ' इति यञ्। होतारः साधुहोमनिष्पादका ऋत्विजः न एतत् सनिषन् सम्भक्ताः स्युः, अर्थात् अस्माकं समीपे तिष्ठन्तु। वयं च तन्वा शरीरेण अरिष्टाः अहिंसिताः सुवीराः सुपुत्राश्च स्याम भवेम। पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।३)।

दैवीः षडुर्वीरुरु नः कृणोत विश्वे
देवास इह मादयध्वम्।
मा नो विददभिभा मो अशस्तिर्मा
नो विदद्वृजिना द्वेष्या या ॥६॥

पदपाठः

दैवीः। षट्। उर्वीः। उरु। नः। कृणोत। विश्वे। देवासः। इह। मादयध्वम्। मा। नः। विदत्। अभिऽभाः। मो इति। अशस्तिः। मा। नः। विदत्। वृजिना। द्वेष्या। या ॥६॥

षट् उर्वीः हे षट् सङ्ख्याका उर्व्यः! एताश्चान्यत्राम्नायन्ते—'षण्मोर्वीरंहसः पान्तु द्यौश्च पृथिवी चाहश्च रात्रिश्चापश्चौषधयश्च' इति। ईदृश्यो दैव्यः दिव्याः। ता यूयम् उरु विस्तीर्णं धनं नः अस्माकं कृणोत कुरुत। हे विश्वे सर्वे देवासः देवाः! यूयं च इह अस्मिन् धने प्राप्तव्ये विषये मादयध्वम् अस्मान् सुखयत। यथा वयं तद्धनं

लब्ध्वा सुखिनो भवेम तथा यूयं प्रयतध्वमित्यर्थः। अपि च **अभिभाः** तिरस्कारः, **न मा विदत्** अस्मान् न प्राप्नुयात्, **अशस्तिः** निन्दा अपि **मा उ** नास्मान् स्पृशेत्, **या द्वेष्या वृजिना** यानि घृणितपापानि **नः मा विदत्** तान्यपि अस्मान् न प्राप्नुयुः। पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (१०।१२८।५)।

तिस्रो देवीर्महि नः शर्म यच्छत
प्रजायै नस्तन्वे यच्च पुष्टम्।
मा हास्महि प्रजया मा तनूभिर्मा
रधाम द्विषते सोम राजन् ॥७॥

पदपाठः

तिस्रः। देवीः। महि। नः। शर्म। यच्छत। प्रजायै। नः। तन्वे। यत्। च। पुष्टम्। मा। हास्महि। प्रऽजया। मा। तनूभिः। मा। रधाम। द्विषते। सोम। राजन् ॥७॥

तिस्रः देवीः 'तिस्रो देवीरिडा मही सरस्वती' (मैत्रा. ४) इति प्रामाण्यात् इडा पृथ्वी सरस्वती चेति तिस्रो देव्यः। अथवा 'प्राणो वा अपानो व्यानस्तिस्रो देव्यः' (ऐ.ब्रा. २।४) इत्यनुसारं प्राणापानव्यानात्मिकास्तिस्रो देव्यः **नः** अस्मभ्यं **महि शर्म** प्रभूतं सुखं **यच्छत** ददतु। **यत् च पुष्टम्** यानि च पौष्टिकानि अन्नादीनि सन्ति तान्यपि **नः तन्वे** अस्माकं वपुषे **प्रजायै** सन्तत्यै च ददतु। **प्रजया** वयं यजमानाः कदापि सन्तत्या अथवा 'प्रजा वै मतयः' (तै.ब्रा. ५।६।८) मतिभिः **मा हास्महि** विमुक्ता न भवेम। **तनूभिः** शरीरैरपि **मा** न क्षीणाः स्याम। **सोम राजन्** हे राजन् सोम! वयं **द्विषते मा रधाम** शत्रुजनवशीभूता न भवेम। रध्यतिर्वशगमने इति यास्कः।

उरुव्यचा नो महिषः शर्म यच्छत्वस्मिन्
हवे पुरुहूतः पुरुक्षु।
स नः प्रजायै हर्यश्व मृडेन्द्र मा
नो रीरिषो मा परा दाः ॥८॥

पदपाठः

उरुऽव्यचाः। नः। महिषः। शर्म। यच्छतु। अस्मिन्। हवे। पुरुऽहूतः। पुरुऽक्षु। सः। नः। प्रऽजायै। हरिऽअश्व। मृड। इन्द्र। मा। नः। रिरिषः। मा। परा। दाः ॥८॥

उरुव्यचाः विस्तीर्णव्यापनः **महिषः** महान् पूज्यो वा **पुरुहूतः** बहुभिर्यजमानैराहूतः **पुरुक्षु** बहुनिवासः। क्षियतेः 'मितद्रवादिभ्य उपसङ्ख्यानम्' (वा.३।२।२८०) इति डुप्रत्ययः यद्वा पुरुभिर्बहुभिः शब्द्यमानः स्तूयमानः। पूर्ववत् डुप्रत्ययः।

औणादिके कर्मणि क्विपि वा 'अनित्यमागमशासनम्' इति तुगभावः। ईदृशः इन्द्रः **अस्मिन् हवे** यज्ञे। हूयन्ते अस्मिन् हवींषीति हवो यज्ञः। जुहोतेरधिकरणेऽप्। यद्वा अस्मिन् हवे त्वद्विषये आह्वाने। 'भावेऽनुपसर्गस्य' इति ह्वयतेरप् सम्प्रसारणं च। **नः** अस्मभ्यं **शर्म** सुखं **यच्छतु** ददात्वित्यर्थः। हे **हर्यश्व** हरी अश्वौ यस्य तादृश हे इन्द्र! **सः** त्वं **नः** अस्माकं प्रजायै। द्वितीयार्थे चतुर्थी। प्रजां पुत्रपौत्रादिकां **मृड** सुखय। **नः** अस्मान् **मा रीरिषः** मा हिंसीः। **मा च परा दाः**। परादानं परित्यागः। मा परित्याक्षीरित्यर्थः। पाठभेदतः ऋग्वेदे पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।८)

धाता विधाता भुवनस्य यस्पति-
र्देवः सविताभिमातिषाहः।
आदित्या रुद्रा अश्विनोभा देवाः पान्तु
यजमानं निर्ऋथात् ॥९॥

पदपाठः

धाता। विऽधाता। भुवनस्य। यः। पतिः। देवः। सविता। अभिमातिऽसहः। आदित्याः। रुद्राः। अश्विना। उभा। देवाः। पान्तु। यजमानम्। निःऽऋथात् ॥९॥

धातऋणां **धाता** स्रष्टा, **भुवनस्य** च कृत्स्नस्य भूतजातस्य **विधाता** रचयिता यः देवः **सविता** देवः **पतिः** पालयिता अस्ति, तथा यः **अभिमातिषाहः** अभिमातीनां शत्रूणां सोढा विनाशक इत्यर्थः, वर्त्तते तथा **आदित्याः** द्वादशादित्याः, **रुद्राः** एकादश रुद्राश्च उभौ अश्विनीकुमारौ **यजमानं निर्ऋथात्** निकृष्टात् पापात् **पान्तु** रक्षन्तु। पाठभेदतः ऋग्वेदेऽप्यस्त्ययं मन्त्रः (ऋ. १०।१२८।७)

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव
बाधामह एनान्।
आदित्या रुद्रा उपरिस्पृशो न
उग्रं चेत्तारमधिराजमक्रत ॥१०॥

पदपाठः

ये। नः। सऽपत्नाः। अप। ते। भवन्तु। इन्द्राग्निऽभ्याम्। अव। बाधामहे। एनान्। आदित्याः। रुद्राः। उपरिऽस्पृशः। नः। उग्रम्। चेत्तारम्। अधिऽराजम्। अक्रत ॥१०॥

नः अस्माकं **ये सपत्नः** शत्रवः **ते अप भवन्तु** अपगता भवन्तु। स्वस्थानादपगताः प्रच्युता भवन्तु, एतान् सपत्नान् **इन्द्राग्निभ्यां** हविर्भिः स्तुत्या च प्रसन्नाभ्याम्, अर्थात् इन्द्राग्निदेवतयोः साहाय्येन वयम् **अवबाधामहे** निकृष्टतरं विनाशयामः। अपि च

रुद्राः एकादश रुद्राः, द्वादश **आदित्याः उपरिस्पृशः** च उच्चस्थाननिवासिनः सर्वं एव देवाः नः अस्मान् **उग्रम्** उद्गूर्णबलं **चेत्तारं** चेतितारम्। छान्दस इडभावः। सर्वस्य ज्ञातारम् अधिराजं सर्वेषामधीश्वर, छान्दसमेकवचनम्। **अक्रत** अकार्षुः। करोतेश्छान्दसे लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। पाठभेदतः ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १०।१२८।९)

पदपाठः

अर्वाञ्चमिन्द्रममुतो हवामहे यो
गोजिद्धनजिदश्वजिद्यः।
इमं नो यज्ञं विहवे शृणोत्वस्मा-
कमभूर्हर्यश्व मेदी ॥११॥

अर्वाञ्चम्। इन्द्रम्। अमुतः। हवामहे। यः। गोऽजित्। धनऽजित्। अश्वऽजित्। यः। इमम्। नः। यज्ञम्। विऽहवे। शृणोतु। अस्माकम्। अभूः। हरिऽअश्व। मेदी ॥११॥

यः गोजित् यः कश्चन गवां भूमेर्वा विजेता, **धनजित्** धनसम्पत्तीनां जेता, **अश्वजित्** अश्वादिपशुधनविजेता अस्ति तदर्थं वयम् **अमुतः** अस्मात् स्थानात् **अर्वाञ्चम् इन्द्रम्** अत्र समीपवर्त्तिनम् इन्द्रं **हवामहे** आह्वयामः। सः **नः** अस्माकम् **इमं यज्ञम्** इमं यज्ञमुदिश्य अस्माभिः कृतां आह्वानप्रार्थनां **विहवे** विविधाह्वान-व्यस्तेऽपि काले **शृणोतु** आकर्णयतु। **हर्यश्व** हे हरिताश्व इन्द्र ! त्वम् अस्माकं यजमानानां **मेदी** स्नेही, ञि मिदा स्नेहने। धातोः रूपम् **अभूः** भूयाः।

इति तृतीयं सूक्तम्।

चतुर्थं सूक्तम्

दशर्चस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः। कुष्ठो यक्ष्मनाशनञ्च देवते। प्रथमादिचतुर्ऋचां सप्तम्यादितृचस्य चानुष्टुप्, पञ्चम्या भुरिगनुष्टुप्, षष्ठ्या गायत्री, दशम्याश्च उष्णिग्गर्भा निचृदनुष्टुप् छन्दांसि।

'यो गिरिष्वजायथाः' इति सूक्तेन राजयक्ष्मकुष्ठरोगादिशान्त्यर्थं कुष्ठाख्यौषधिमिश्रितं नवनीतम् अभिमन्त्र्य प्रतिलोमं व्याधितशरीरं प्रलिम्पेत्। 'कुष्ठलिङ्गाभिर्नवनीतमिश्रेणाप्रतीहारं प्रलिम्पति' (कौ.सू. २८।१३) इति सूत्रात्।

यो गिरिष्वजायथा वीरुधां बलवत्तमः।
कुष्ठेहि तक्मनाशन तक्मानं नाशयन्नितः ॥१॥

पदपाठः

यः। गिरिषु। अजायथाः। वीरुधाम्। बलवत्ऽतमः। कुष्ठ। आ। इहि। तक्मऽनाशन। तक्मानम्। नाशयन्। इतः ॥१॥

हे तक्मनाशन ! रोगविनाशक कुष्ठ ! एतन्नामकौषध ! यस्त्वं गिरिषु पर्वतेषु अजायथाः उदभवः, वीरुधां समस्तलताविशेषाणाञ्च बलवत्तमः विशेषशक्तिसम्पन्नः असि । अतः इतः एतद्रोगिणः पार्श्वे अस्य तक्मानं रोगविशेषं न शयन् उन्मूलयन् एहि आगच्छ ।

सुपर्णसुवने गिरौ जातं हिमवतस्परि ।
धनैरभि श्रुत्वा यन्ति विदुर्हि तक्मनाशनम् ॥२॥

पदपाठः

सुपर्णऽसुवने । गिरौ । जातम् । हिमऽवतः । परि । धनैः । अभि । श्रुत्वा । यन्ति । विदुः । हि । तक्मऽनाशनम् ॥२॥

हिमवतः हिमालयपर्वतस्य परि परिसरे सुपर्णसुवने शोभनपत्रपुष्पादिविलसिते सुन्दरवने अर्थात् सुन्दरवनवति गिरौ तत्र हिमालये तक्मनाशनं तक्मादिरोगविनाशकमिदमौषधं श्रुत्वा आकर्ण्य धनैः द्रव्यसाहाय्येन लोकाः अभियन्ति गच्छन्ति, गत्वा च तत्र विदुः हि एतदौषधं जानन्ति, ज्ञात्वा चानयन्ति ।
चिकित्साशास्त्रिणो गायन्त्यस्य गुणानेवम्––

कुष्ठं कटूष्णं तिक्तं स्यात् कफमारुतरक्तजित् ।
त्रिदोषविषकण्डूंश्च कुष्ठरोगांश्च नाशयेत् ॥इति॥

राजनिघण्टुकारोऽपि लिखति––

कुष्ठमुष्णं कटु स्वादु शुक्लं तिक्तकं लघु ।
हन्ति वातास्रविसर्प-कासकुष्ठमरुत्कफान् ॥इति॥

अश्वत्थो देवसदनस्तृतीयस्यामितो दिवि ।
तत्रामृतस्य चक्षणं देवाः कुष्ठमवन्वत ॥३॥

पदपाठः

अश्वत्थः । देवऽसदनः । तृतीयस्याम् । इतः । दिवि । तत्र । अमृतस्य । चक्षणम् । देवाः । कुष्टम् । अवन्वत ॥३॥

इतः अस्माद् भूलोकात् तृतीयस्यां दिवि तृतीयद्युलोके देवसदनः देवनिवासस्थानभूतः अश्वत्थः अश्वत्थवृक्षो वर्त्तते । तत्र वृक्षे देवाः इन्द्रादयो देवाः देवकल्पा मुनयो वा अमृतस्य चक्षणं अमृतवच्चमत्कारप्रदर्शकं कुष्ठम् कुष्ठनामकमौषधम् अवन्वत अलभन्त ।

हिरण्ययी नौरचरद्धिरण्यबन्धना दिवि ।
तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ॥४॥

पदपाठः

हिरण्ययी । नौः । अचरत् । हिरण्यऽबन्धना । दिवि । तत्र । अमृतस्य । पुष्पम् । देवाः । कुष्ठम । अवन्वत ॥४॥

हिरण्ययी सुवर्णमयी सुवर्णरचितेत्यर्थः, तथा **हिरण्यबन्धना** सुवर्णगुणैरेव दृढीकृता **नौः** नौका रथमित्यर्थः। **अचरत्** तत्र प्राचलत्। **तत्र च देवाः** सुरलोकवासिनो देवाः **अमृतस्य पुष्पम्** पीयूषप्रभावतुल्यं **कुष्ठम् अवन्वत**। एतन्नामकमौषधमलभन्त।

हिरण्ययाः पन्थान आसन्नरित्राणि हिरण्यया।
नावो हिरण्ययीरासन् याभिः कुष्ठं निरावहन् ॥५॥

पदपाठः

हिरण्ययाः। पन्थानः। आसन्। अरित्राणि। हिरण्यया। नावः। हिरण्ययीः। आसन्। याभिः। कुष्ठम्। निःऽआवहन् ॥५॥

कुष्ठौषधानयनसमये **पन्थानः** तदानयनमार्गाः **हिरण्ययाः** सुवर्णमयाः **आसन्** अवर्त्तन्त। **नावः** तदानयननौकाः अपि **हिरण्ययाः** काञ्चनविच्छुरिताः **आसन्**, **अरित्राणि** केनिपातकाः नौकाचालनकाष्ठदण्डविशेषाः 'अरित्रं केनिपातकः' इत्यमरः (१।१०।१३) **नावः हिरण्ययाः** सुर्वणनिर्मिताः **नौकाः आसन् याभिः** नौकाभिः **कुष्टं** कुष्ठनामकमौषधं **निरावहन्** नितराम् आनिन्युः। यद्वा 'मेध्यं वै हिरण्यम्' (काठ. २०।८) सर्वमेतत् तदानयनसाधनं परमं पवित्रम् आसीत्।

इमं मे कुष्ठ पूरुषं तमावह तं निष्कुरु।
तमु मे अगदं कृधि ॥६॥

पदपाठः

इमम्। मे। कुष्ठम्। पूरुषम्। तम्। आ। वह। तम्। निः। कुरु। तम्। ऊं इति। मे। अगदम्। कृधि ॥६॥

कुष्ठ हे कुष्ठौषध! **मे** मदीयम् **इमं तं** रोगशय्यामधिशयानं **पूरुषं** रोगिणं जनम् **आवह** सम्यक्तया धारय, इमम् आत्मीयं मन्यस्वेत्यर्थः। तमिम रोगिणं **निष्कुरु** नीरोगं विधेहि। तथा **मे** मम **तम् उ** तमिमं रोगग्रस्तं जनम् **अगदं** रोगरहितं **कृधि** कुरु।

देवेभ्यो अधि जातोऽसि सोमस्यासि सखा हितः।
स प्राणाय व्यानाय चक्षुषे मे अस्मै मृड ॥७॥

पदपाठः

देवेभ्यः। अधि। जातः। असि। सोमस्य। असि। सखा। हितः। सः। प्राणाय। विऽआनाय। चक्षुषे। मे। अस्मै। मृड ॥७॥

हे कुष्ठौपध! त्वं **देवेभ्यो** देवानां हिताय। **अधिजातः असि** समुद्भूतोऽसि, त्वं च **सोमस्य** औषधराजस्य **हितः** हितैषी **सखा** सहचरः **असि**। सोमसख्येन कुष्ठस्य विशिष्टं प्रभावशालित्वं ध्वन्यते। एतादृशः **स** त्वं **मे** मम व्याधितस्य **प्राणाय व्यानाय** श्वासोच्छ्वासप्रक्रियायै **अस्मै चक्षुषे** च अस्यै दृष्ट्यै च **मृड** मृडय, सुखय।

उदङ् जातो हिमवतः स
प्राच्यां नीयसे जनम् ।
तत्र कुष्ठस्य नामान्युत्तमानि
वि भेजिरे ॥८॥

पदपाठः

उदङ् । जातः । हिमऽवतः । सः । प्राच्याम् । नीयसे । जनम् । तत्र । कुष्ठस्य । नामानि । उत्ऽतमानि । वि । भेजिरे ॥८॥

सः कुष्ठः औषधविशेषः **हिमवतः** हिमालयात् **उदङ् जातः** उत्तरस्यां दिशि समुत्पन्नः । ततः **सः जनं** विभक्तिव्यत्ययश्छान्दसः, जनैः इत्यर्थः, **प्राच्यां** पश्चिमायां दिशि **नीयसे** । आनीयत इत्यर्थः । **तत्र** च प्राच्यां दिशि नीयमानस्य अस्य **कुष्ठस्य उत्तमानि** श्रेष्ठतराणि अनेकानि **नामानि** नामधेयानि **भेजिरे** अभूवन् इत्यर्थः । यथा चाम्नायते कोषकारैरपि—"व्याधिः कुष्ठं पारिभाव्यं व्याप्यं पाकलमुत्पलम्" इति (अमरः २।४।१२६)

उत्तमो नाम कुष्ठास्युत्तमो नाम ते पिता ।
यक्ष्मं च सर्वं नाशय तक्मानं चारसं कृधि ॥९॥

पदपाठः

उत्ऽतमः । नाम । कुष्ठ । असि । उत्ऽतमः । नाम । ते । पिता । यक्ष्मम् । च । सर्वम् । नाशय । तक्मानम् । च । अरसम् । कृधि ॥९॥

हे **कुष्ठौषध** ! त्वम् **उत्तमः** श्रेष्ठतमः **असि नामेति** प्रसिद्धौ । तथा **ते** तव **पिता** जनकोऽपि **उत्तमो** वर्त्तते । अर्थात् यस्मात् स्थानात् तवोत्पत्तिरभूत् तदपि स्थानं पवित्रमेवाविद्यत । अतः उच्चकुलोत्पन्नत्वात् स्वयमपि च सर्वोत्तमत्वात् **सर्वं** समूलमित्यर्थः **यक्ष्मं** राजयक्ष्माणं रोगं **नाशय**, उन्मूलय, **च** तथा **तक्मानम्**—इत्याख्यमपि रोगं ज्वरमित्यपि कश्चित् । **अरसं** नीरसं क्षीणप्रायमित्यर्थः । **कृधि** कुरु ।

शीर्षामयमुपहत्यामक्ष्योस्तन्वोरपः ।
कुष्ठस्तत् सर्वं निष्करद्दैवं समह वृष्ण्यम् ॥१०॥

पदपाठः

शीर्षऽआमयम् । उपऽहत्याम् । अक्ष्योः । तन्वः । उरपः । कुष्ठः । तत् । सर्वम् । निः । करत् । दैवम् । समह । वृष्ण्यम् ॥१०॥

कुष्ठः एतन्नामक औषधविशेषः **शीर्षामयं** शिरोरोगम् **अक्ष्योः** नेत्रयोः **उपहत्यां** घातकीं रुजं, किमन्यत् **तन्वः** समस्तशरीरस्यैव **रपः**, रपो रिप्रमिति पापनाम्नी भवतः (निरु. ४।२१) पापम् रोगमित्यर्थः, **तदिदं सर्वं निष्करत्** दूरमपहरतु । **हे समह**, मघमिति धननाम । मघेन सह वर्त्तते इति समघः । छान्दसो वर्ण-

विकारः। तत्सम्बुद्धौ हे धनिन् कुष्ठ, यद्वा मह पूजायाम् महयति पूजयतीति महो धनम्। पचाद्यच्। त्वं मह्यं दैवं दिव्यं वृष्ण्यं बलं देहीति शेषः।

पञ्चमं सूक्तम्

नवर्चस्यास्य सूक्तस्याथर्वा ऋषिः। लाक्षा देवता। अनुष्टुप् छन्दः।

शस्त्राद्यभिघाते 'रात्री माता' इति सूक्तेन दुग्धे लाक्षां क्वाथयित्वा अभिमन्त्र्य पाययति। तथा च सूत्रम्–'लाक्षालिङ्गाभि र्दुग्धे फाण्टान् पाययति'। (कौ. २८।१४) इति।

रात्री माता नभः पितार्यमा ते पितामहः।
सिलाची नाम वा असि सा देवानामसि स्वसा ॥११॥

पदपाठः

रात्री। माता। नभः। पिता। अर्यमा। ते। पितामहः। सिलाची। नाम। वै। असि। सा। देवानाम्। असि। स्वसा ॥११॥

हे लाक्षे ओषधे! तव **माता**, उत्पादयित्री मानकर्त्री वा। निर्मिमीते इति माता। माङ् माने धातोः 'नप्तृ नेष्टृ त्वष्टृ'. (उ. २।९५) इति सूत्रेण निपातितः। **रात्री** अस्तीति शेषः, **नभः** आकाशः **पिता** जनयिता पालयिता वा, **अर्यमा** आदित्यश्च **ते पितामहः** पितुरपि पिता वर्तते। **देवानाञ्च** इन्द्रादिदेवानाञ्च त्वं **स्वसा** भगिनी वर्त्तसे। एतेनास्याः लाक्षायाः गुणोत्कृष्टत्वं ध्वनितं भवति। **सा** ईदृशी त्वं **सिलाची** इति नामधारिणी **असि** भवसि। कोषकारास्तु अस्याः लाक्षा, राक्षा, जतु, यावः, अलक्तः, द्रुमाभयः–(अमर. २।६।१२५) इति नामधेयान्यामनन्ति।

यस्त्वा पिबति जीवति त्रायसे पुरुषं त्वम्।
भर्त्री हि शश्वतामसि जनानाञ्च न्यञ्चनी ॥१२॥

पदपाठः

यः। त्वा। पिबति। जीवति। त्रायसे। पुरुषम्। त्वम्। भर्त्री। हि। शश्वताम्। असि। जनानाम्। च। निऽअञ्चनी ॥१२॥

हे लाक्षे, **यो** व्याधितो जनः **त्वा** त्वां **पिबति** त्वद्रसपानं क्वाथपानं वा विदधति स **जीवति** जीवन् तिष्ठति न म्रियते इत्यर्थः। यतस्त्वं **पुरुषं** त्वत्सेविनं जनं **त्रायसे** रोगेभ्यो रक्षसि। **हि** निश्चयेन त्वं **शश्वताम्** शश्वत् इति बहुनाम (निघं. ३।१) बहूनां **जनानां** पुरुषाणां रोगिणामित्यर्थः, **भर्त्री** भरणकारिणी। चकारः, समुच्चयार्थः। **न्यञ्चनी च** पुरुषाणां रोगाणामधोविधायिनी उन्मूलनकर्त्री इत्यर्थः। **असि** भवति। अत्र एवोक्तं राजनिघण्टौ––

लाक्षा तिक्ता कषाया स्यात्
श्लेष्मपित्तार्त्तिरोषनुत् ।
विषरक्तप्रशमनी विषमज्वरनाशनी ॥इति॥

वृक्षंवृक्षमारोहसि वृषण्यन्तीव कन्यला ।
जयन्ती प्रत्यातिष्ठन्ती स्परणी नाम वा असि ॥३॥

पदपाठः

वृक्षम्ऽवृक्षम् । आ । रोहसि । वृषण्यन्तीऽइव । कन्यला । जयन्ती । प्रतिऽआतिष्ठन्ती । स्परणी । नाम । वै । असि ॥३॥

हे लाक्षे ! **वृषण्यन्ती** वृषणं वीर्यसेचकं पतिमात्मन इच्छन्ती **कन्यला** इव कौमार्यमुल्लङ्घयन्ती कन्या इव त्वं **वृक्षं वृक्षम्** प्रत्येकं वृक्षम् **अधिरोहसि**। यथा पतिमाप्तुकामा विवाहिता कन्या वृक्षकाष्ठनिर्मित पर्यङ्कमधिरोहति तद्वत् त्वमपि प्रतिवृक्षमधिरोहसि । **जयन्ती** तत्र वृक्षेषु आत्मनो विजयमनुभवन्ती अत एव **प्रत्यातिष्ठन्ती** तत्र स्थिरत्वं लभमाना **स्परणी** इति नाम्ना त्वम् **असि** भवसि । एतन्नाम्ना अभिधीयसे इत्यर्थः ।

यद् दण्डेन यदिष्वा यद् वारुर्हरसा कृतम् ।
तस्य त्वमसि निष्कृतिः सेमं निष्कृधि पूरुषम् ॥४॥

पदपाठः

यत् । दण्डेन । यत् । इष्वा । यत् । वा । अरुः । हरसा । कृतम् । तस्य । त्वम् । असि । निःऽकृतिः । सा । इमम् । निः । कृधि । पूरुषम् ॥४॥

हे लाक्षे ! **यद् अरुः** क्षतं **दण्डेन** काष्ठखण्डादिना **कृतमस्ति यत् च इष्वा** बाणेन विहितं विद्यते **यद्वा हरसा** क्रोधनामसु पाठात् (निघं. २।१३) क्रोधवशात् केनाप्याघातेन कृतं वर्त्तते **तस्य** क्षतस्य त्वमेव **निष्कृतिः** उपचारकारिणी **असि** भवसि । अतः सा एवंभूता **त्वम् इमम्** व्रणिनं पुरुषं **निष्कृधि** निर्व्रणं कुरु । उरुः इत्यत्र ऋगतौ धातोः 'अर्तिपृवपि०' (उ०२।११७) सूत्रेण औणादिक उस्प्रत्ययः । 'व्रणोऽस्त्रियामीर्ममरुः क्लीबे' इत्यमरः (२।६।५४)

भद्रात् प्लक्षान्निस्तिष्ठस्यश्वत्थात् खदिराद्धवात् ।
भद्रान्न्यग्रोधात् पर्णात् सा न एह्यरुन्धति ॥५॥

पदपाठः

भद्रात् । प्लक्षात् । निः । तिष्ठसि । अश्वत्थात् । खदिरात् । धवात् । भद्रात् । न्यग्रोधात् । पर्णात् । सा । नः । आ । इहि । अरुन्धति ॥५॥

एषा लाक्षा **भद्रात्**। कदम्बकात् यथाह कोषकारः–"भद्रः शिवे खञ्जरीटे वृषभे तु कदम्बके" (मेदिनीकोशः) **प्लक्षात्** पर्कटीवृक्षात् 'पाकड' इति भाषायाम् "प्लक्षो जटी पर्कटी स्यात्" इत्यमरः। यद्वा 'लाहीपीपल' इति लोके प्रसिद्धाद् कंदरालवृक्षात् (अमर० २।४।४३) **अश्वत्थात्** पिप्पलात् **खदिरात्** दन्तधावनाख्यवृक्षात् 'खदिरो दन्तधावनः' इत्यमरः (२।४।४९), **धवात्** वृक्षविशेषात् यथाह मेदिनीकोषकारः–"धवः पुमान्नरे धूर्त्ते पत्यौ वृक्षान्तरेऽपि च" इति। **न्यग्रोधात्** वटादपि च **पर्णात्** त्रिपर्णवृक्षात् 'पर्णस्त्रिपर्णे' इति हैमः पलाशाद्वा कीदृशात् भद्रात् त्रिदलत्वात् शोभनदर्शनात् **निस्तिष्ठसि** निर्गतासि। अतः **अरुन्धति** अरुन्धतीति नाम्नापि अभिधीयमाने हे लाक्षे ! सा त्वं नः अस्माकं पार्श्वे **एहि** आगच्छ।

हिरण्यवर्णे सुभगे सूर्यवर्णे वपुष्टमे।
रुतं गच्छासि निष्कृते निष्कृतिर्नाम वा असि ॥६॥

पदपाठः

हिरण्यऽवर्णे। सुऽभगे। सूर्यऽवर्णे। वपुःऽतमे। रुतम्। गच्छासि। निःऽकृते। निःऽकृतिः। नाम। वै। असि ॥६॥

हिरण्यवर्णे हे काञ्चनाभे, हे **सुभगे** ! सुन्दरदीप्तिमति, हे **सूर्यवर्णे** ! सूर्यवत् प्रकाशशीले, हे **वपुष्टमे** ! सुघटितावयवे शोभनरूपवति, हे **निष्कृते** ! रोगापहारिणि ! त्वं व्याधितं नीरोगं विधातुं **रुतं** रुग्णं जनं, रुजोभङ्गे धातोः क्तप्रत्यये पृषोदरादित्वाज्जलोपे च रूपसिद्धिः। **गच्छासि** प्रयासि। तं स्वस्थं विधातुं तदन्तिके गच्छसीत्यर्थः। अत एव **निष्कृतिर्नाम** वा असि त्वम् निष्कृतिः इति नाम्नापि व्यपदिश्यसे।

हिरण्यवर्णे सुभगे शुष्मे लोमशवक्षणे।
अपामसि स्वसा लाक्षे वातो हात्मा बभूव ते ॥७॥

पदपाठः

हिरण्यऽवर्णे। सुऽभगे। शुष्मे। लोमशऽवक्षणे। अपाम्। असि। स्वसा। लाक्षे। वातः। ह। आत्मा बभूव। ते ॥७॥

हिरण्यवर्णे हे काञ्चनवर्णे, **सुभगे** हे सौभाग्यशालिनि, **शुष्मे** हे बलवति ! **लोमशवक्षणे**, हे लोमवहनशीले ! रोमवतीत्यर्थः, त्वम् **अपाम्** रसानां **स्वसा** भगिनी असि, वृक्षस्थरसानां साहचर्यात् अस्याः भगिनीत्वमुपचर्यते। अतः हे लाक्षे ! **ते** तव **आत्मा** हृदयम् स्वभाव इत्यर्थः, **वातः** वातुलः वायुप्रबलः **बभूव**। वर्त्तते इत्यर्थः।

सीलाची नाम कानीनोऽजबभ्रु पिता तव।
अश्वो यमस्य यः श्यावस्तस्य
हास्नास्युक्षिता ॥८॥

पदपाठः

सिलाचो । नाम । कानीनः । अजऽबभ्रु । पिता । तव । अश्वः । यमस्य । यः । श्यावः । तस्य । ह । अस्ना । असि । उक्षिता ।।८।।

हे लाक्षे ! त्वदीयं नाम **सिलाची** अपि अस्ति । **तव पिता** पूर्वमुक्तः आकाशः **अजबभ्रु** अत्र विसर्गलोपश्छान्दसः । अजवत् "अजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे" इति हैमः । विष्णुवद् यद्वा ब्रह्मवत् बभ्रुः 'बभ्रुर्विशाले नकुले कृशानावजे मुनौ" इति विश्वकोषः । विशालो वर्त्तते । अत एव बहुविस्तृतत्वात् तव प्रसवयिता आकाशः **कानीनः** व्यासः अस्ति विस्तारशीलो वर्त्तते अर्थात् व्यासमुनिवत् तव गुणानां विस्तारको वर्त्तते । अत्र लक्षणया व्यासगतगुणा लक्ष्यन्ते । कानीनः इत्यत्र 'कन्यायाः कनीन च' (पा. ४।१।११६) इत्यनेन अण् प्रत्ययः । यद्वा अकृष्टभूमिः कन्या तज्जातः कानीनो वृक्षः । समास-व्यासौ संक्षेप-विस्तारवाचकौ । कानीनः कर्णो वा कर्णवत् तेजस्वी च **यमस्य** 'एष वै यमो य एषः (सूर्यः) तपति', (श. १४.१.३.४) सूर्यस्य यः **अश्वः** व्यापकः, अशू व्याप्तौ धातोः 'अशूप्रुषिलटि' (उ. १।१५१) इति सूत्रेण औणादिकः क्वन् प्रत्ययः । यद्वा 'वीर्यं वा अश्वः' (तै. सं. २।४।६।४) वीर्यवान् शक्तिशाली इत्यर्थः अथवा घोटकवद् आशुगामी **श्यावः** अत्र श्यावशब्देन श्यावाश्व-नामकः सामगेयभागो गृहीतो भवति । यतः तदेव सूर्यसम्बन्धि स्वर्ग्यं साम । आम्नायते च जै० ब्राह्मणे–'अथ श्यावाश्वं स्वर्ग्यं साम' (२।१६५) तस्य स्वर्गीयस्य परमोत्कृष्टस्य साम्नः **अस्ना** आस्येन 'पद्दन्नोमास्हृन्निशसन्०' (पा. ६।१।६३) इत्यादिना सूत्रेण आस्यशब्दस्य आसन् इति आदेशः । ह इति पादपूरणार्थः । **उक्षिता असि** प्रसिक्ता वर्त्तसे । एतेन अस्याः परमं पवित्रत्वं व्यज्यते ।

अश्वस्यास्नः सम्पतिता सा
वृक्षाँ अभि सिष्यदे ।
सरा पतत्रिणी भूत्वा सा
न एह्यरुन्धति ।।९।।

पदपाठः

अश्वस्य । अस्नः । सम्ऽपतिता । सा । वृक्षान् । अभि । सिष्यदे । सरा । पतत्रिणी । भूत्वा । सा । नः । आ । इहि । अरुन्धति ।।९।।

अश्वस्य सर्वव्यापकस्य स्वर्गीयस्य श्यावाश्वसाम्नः **अस्नः** आस्यात् **सम्पतिता** आविर्भूता नीचैरागतेत्यर्थः, सा त्वं हे लाक्षे ! **वृक्षान् अभिसिष्यदे** पूर्वोक्तान् अश्वत्थ-प्लक्षादिवृक्षान् प्रति स्यन्दमाना, स्रवन्ती सती समवेता भवसीत्यर्थः । हे **अरुन्धति** लाक्षे ! **सा** त्वं **पतत्रिणी भूत्वा** खगीव **सरा** प्रसरिणी उड्डीय वेगवती भूत्वा **नः** अस्माकं समीपे **इहि** आगच्छ ।

इति प्रथमोऽनुवाकः ।

षष्ठं सूक्तम्

चतुर्दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । प्रथमर्चो ब्रह्मादित्यः, द्वितीयायाः कर्माणि, तृतीया-चतुर्थ्योः रुद्रगणः, पञ्चम्यादिचतसृणां सोमारुद्रौ, नवम्या हेतिः, दशम्या अग्निः, एकादश्यादिचतसृणाञ्च सर्वात्मा रुद्रो देवताः । प्रथवा—नवम्योस्त्रिष्टुप्, द्वितीयाया अनुष्टुप्, तृतीयाथा जगती, चतुर्थ्याः पञ्चपदानुष्टुबुष्णिक्त्रिष्टुब्गर्भा जगती, पञ्चम्यादितृचस्य त्रिपदा विराड्गायत्री, अष्टम्या एकावसाना द्विपदार्च्य-नुष्टुप्, दशम्याः प्रस्तारपङ्क्तिः, एकादश्यादितृचस्य पङ्क्तिः, चतुर्दश्याश्च स्वराट्-पङ्क्तिश्छन्दांसि ।

रोगिण आरोग्यविज्ञानकर्मणि 'ब्रह्म जज्ञानम्' इति सूक्तेन तिस्रः स्नाव-रज्जूरभिमन्त्य अङ्गारेषु निदधाति । यदि अङ्गारस्थास्ता ऊर्ध्वं गच्छन्ति ततो जीविष्यतीति ज्ञेयम् । तदुक्तं कौशिकेन 'ब्रह्म जज्ञानम्' इति जीवितविज्ञानम् । तिस्रः स्नावरज्जूरङ्गारष्ववधाय । उत्कुचतीषु कल्याणम्' (कौ. सू. १५.१२.१४) इति ।

तथा साङ्ग्रामिकविज्ञानकर्मणि अनेन सूक्तेन तिस्रः स्नावरज्जूरभिमन्त्य एका रज्जुः आत्मसेना द्वितीया मध्ये मृत्युस्तृतीया रज्जुः परसेनेति सङ्कल्प्य अङ्गारेषु निदधाति । यस्या उपरि मृत्युर्गच्छति तस्याः पराजयो जायते । या मृत्योरुपरि पतति तस्या जयो भवति । या संमुखा याति तस्या अपि जयो भवति ।

तथा तत्रैव कर्मणि रज्जुम् एकाम् अभिमन्त्य अङ्गारेषु निदधाति । एवम्, इषीकाः । तद् उक्तं कौशिकेन—साङ्ग्रामिकमेता व्यादिशति मध्ये मृत्युरितरे सेने । पराजेष्यमाणां मृत्युरतिवर्त्तते । जेष्यन्ती मृत्युम् । अग्रेषूत्कुचत्सु मुख्या हन्यन्ते मध्येषु मध्या, अन्तेष्ववरे । एवम् इषीकाः । (कौ. सू. १५.१५.१८) इति ।

सलिलगणे अस्य सूक्तस्य पाठः । तद् 'आपो हि ष्ठा' (अ. १,५) इति सूक्ते द्रष्टव्यम् ।

तथा प्रवत्स्यन् अनेन सूक्तेन हवींषि जुहुयात् । आज्यपालाशादि-समित्पुरोडाशपयउदौदनपायसपशुव्रीहियवतिलधानाकरम्भशष्कुल्यः इत्येतानि हवींषि विकल्पेन जुहुयाद् इत्यर्थः । तदुक्तं कौशिकेन—'द्वितीयेन प्रवत्स्यन् हविषाम् उपदधीत (कौ. सू. १८।२७) इति ।

तथा स्त्रीप्रसवदोषे सूतिकारोगे च अनेन सूक्तेन भक्तम् अभिमन्त्य ददाति । तथा सक्तुमन्थम् अभिमन्त्य पाययति । अनेनैव सूक्तेन उपस्थानम् आदित्यस्य । तदुक्तं कौशिकेन—'ब्रह्म जज्ञानम्' इति सूतिकारिष्टकौ प्रपादयति । मन्था-चमनोपस्थानम् आदित्यस्य ।' (कौ. सू. २८.१५.१६) इति ।

ब्रह्म जज्ञानं प्रथमं पुरस्ताद् वि
सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः
सतश्च योनिमसतश्च वि वः ॥१॥

पदपाठः

ब्रह्म । जज्ञानम् । प्रथमम् । पुरस्तात् । वि । सीमतः । सुऽरुचः । वेनः । आवः । सः । बुध्न्याः । उपऽमाः । अस्य । विऽस्थाः । सतः । च । योनिम् । असतः । च वि । वः ॥१॥

व्याख्यातोऽयं मन्त्रः पूर्वं सायणेनैव (अथर्व. ४।१।१) इति ।

अनाप्ता ये वः प्रथमा
यानि कर्माणि चक्रिरे ।
वीरान् नो अत्र मा दभन् तद् व
एतत् पुरो दधे ॥२॥

पदपाठः

अनाप्ताः । ये । वः । प्रथमाः । यानि । कर्माणि । चक्रिरे । वीरान् । नः । अत्र । मा । दभन् । तत् । वः । एतत् । पुरः । दधे ॥२॥

व्याख्यातोऽयं मन्त्रः पूर्वं सायणेनैव (अथर्व० ४।७।७) इति ।

सहस्रधार एव ते समस्वरन्
दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न नि मिषन्ति भूर्णयः
पदेपदे पाशिनः सन्ति सेतवे ॥३॥

सहस्रऽधारे । एव । ते । सम् । अस्वरन् । दिवः । नाके । मधुऽजिह्वाः । असश्चतः । तस्य । स्पशः । न । नि । मिषन्ति । भूर्णयः । पदेऽपदे । पाशिनः । सन्ति । सेतवे ॥३॥

सहस्रधारे, बहूदकधारा यस्माद् द्रवन्ति तत्तथोक्तमन्तरिक्षम्, तस्मिन् वर्तमानाः **एव ते** सोमरश्मयः **समस्वरन्** । पृथिवीं वृष्ट्या संयोजयन्तीत्यर्थः । किञ्च **दिवः** द्युलोकस्य **नाके** समुच्छ्रिते देशे वर्तमानाः **मधुजिह्वाः** मध्वग्राः । सोमतेजसाग्रेभ्यो हि मधूत्पन्नं भवति । अतो मधुजिह्वाः । **असश्चतः** संगतवर्जिताः पृथक्पृथग्दिव्यवस्थिताः अस्य सोमस्य स्वभूताः **स्पशः** सारभूता रश्मयः **भूर्णयः** क्षिप्रगामिनः सन्तः **न निमिषन्ति** निमेषं न कुर्वन्ति । किन्तु **पाशिनः** विघ्नकारिणो ज्ञातुं सर्वदा जाग्रतीत्यर्थः । अथवा राजभृत्या यथा दुष्टान् विचारयितुं सर्वदा जागरणं

कुर्वन्ति तद्वदेते रश्मयः पदे पदे प्रतिपदं सेतवे विघ्नकारकान् बद्धुं बाधकाः सन्ति भवन्ति। स्वल्पेन पाठभेदेन ऋग्वेदेऽपि प्राप्यतेऽयं मन्त्रः (ऋ. ६।७३।४)।

पर्यू षु प्र धन्वा वाजसातये परि वृत्राणि सक्षणिः।
द्विषस्तदध्यर्णवेनेयसे सनिस्रसो नामासि
त्रयोदशो मास इन्द्रस्य गृहः ॥४॥

पदपाठः

परि। ऊं इति। सु। प्र। धन्व। वाजऽसातये। परि। वृत्राणि। सक्षणिः। द्विषः। तत्। अधि। अर्णवेन। ईयसे। सनिस्रसः। नाम। असि। त्रयःऽदशः। मासः। इन्द्रस्य। गृहः ॥४॥

हे रुद्रगणाः! यूयं **वाजसातये** अन्नप्राप्त्यै **वृत्राणि** जलरोधकान् वार्दलान् यद्वा वृत्रासुरसैनिकान् **परि उ सु प्रधन्व,** परितः सम्यक् प्रद्रावयथ। दूरं गमयथ इत्यर्थः। **तत्** तदा **द्विषः** तान् मेघरूपशत्रून्, वृत्रसैनिकान् वा **अर्णवेन** समुद्रेण समुद्रवत् अपारेण आत्मबलेनेत्यर्थः यद्वा 'प्राणो वा अर्णवः'। (श. ।५।२।५१) प्राणशक्त्या **अधि ईयसे** स्वाधिकारे कुरुथ। अत एव **सनिस्रसः नाम असि।** आक्रमणनिपुणाः इति यूयं कथ्यध्वे। **इन्द्रस्य गृहः** निवासस्थानं **त्रयोदशमासः** अधिमासो वर्त्तते। रुद्रैः सह इन्द्रस्य सहावस्थानात् सेयमुक्तिः सङ्गच्छते। यथाऽऽम्नायते तैत्तिरीयारण्यके "इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु" (तै.आ. ४।६।१) इति। इमे रुद्रगणाः त्रयोदशमासोपलक्षिते निखिलेऽपि कालचक्रे अवस्थानं कुर्वन्तस्तिष्ठन्तीत्यर्थः। अधिमासः पुरुषोत्तममासः, पुरुषोत्तमश्चोपेन्द्रः, इन्द्रावरजः इत्यर्थः। अनुजेन सह इन्द्रावस्थानमुचितमेव।

न्वेतेनारात्सीरसौ स्वाहा।
तिग्मायुधौ तिग्महेती सुशेवौ
सोमारुद्राविह सु मृडतं नः ॥५॥

पदपाठः

नु। एतेन। अरात्सीः। असौ। स्वाहा। तिग्मऽआयुधौ। तिग्महेती इति तिग्मऽहेती। सुऽशेवौ। सोमारुद्रौ। इह। सु। मृडतम्। नः ॥५॥

एतेन प्रकारेण अभिचारकर्मणा वा स त्वं याजकः **नु** क्षिप्रमेव **अरात्सीः** साफल्यम् अलभथाः। अतः **स्वाहा** इदं दीयमानं हविः तुभ्यं सुहुतं भवेत्। **तिग्मायुधौ** तीक्ष्णशस्त्रौ, **तिग्महेती** हेतिरिति वज्रनाम (निघं. २।२०) तीक्ष्णवज्रवन्तौ, अत एव **सुशेवौ** 'सुशेवः सुसुखतमः' इति निरुक्तम् (३।३), शोभनसुखैश्वर्यसम्पन्नौ **सोमारुद्रौ** इमौ युग्मदेवौ **नः** अस्मान् **सुमृडतं** सम्यक् सुखयताम्। **अरात्सीः** इति राधसाधसंसिद्धौ धातोर्लुङि मध्यमपुरुषैकवचनम्।

अवैतेनारात्सीरसौ स्वाहा ।
तिग्मायुधौ तिग्महेती सुशेवौ
सोमारुद्राविह सु मृडतं नः ॥६॥

पदपाठः

अव । एतेन । अरात्सीः । असौ । स्वाहा । तिग्मऽआयुधौ । तिग्महेती इति तिग्मऽहेती । सुऽशेवौ । सोमारुद्रौ । इह । सु । मृडतम् । नः ॥६॥

एतेन प्रकारेण असौ स त्वं याजकः अव अरात्सीः । शत्रून् अवदीर्य साफल्यम् अलभथाः । शेषं समानम् ।

अपैतेनारात्सीरसौ स्वाहा ।
तिग्मायुधौ तिग्महेती सुशेवौ
सोमारुद्राविह सु मृडतं नः ॥७॥

पदपाठः

अप । एतेन । अरात्सीः । असौ । स्वाहा । तिग्मऽआयुधौ । तिग्महेती इति तिग्मऽहेती । सुऽशेवौ । सोमारुद्रौ । इह । सु । मृडतम् । नः ॥७॥

एतेन कर्मणा असौ त्वं शत्रून् अव अरात्सीः अपहृत्य साफल्यमप्राप्नोः । शेषं समानम् ।

मुमुक्तमस्मान् दुरितादवद्याज्जुषेथां यज्ञ-
ममृतमस्मासु धत्तम् ॥८॥

पदपाठः

मुमुक्तम् । अस्मान् । दुःऽइतात् । अवद्यात् । जुषेथाम् । यज्ञम् । अमृतम् । अस्मासु । धत्तम् ॥८॥

हे सोमारुद्रौ ! अस्मान् यजमानान् अवद्यात् निन्दितात् दुरितात् पापकर्मणः मुमुक्तम् मोचयतम्, तथा अस्माकं यज्ञं यजनं जुषेथाम् सेवथाम् अस्मासु याजकेषु च अमृतम् 'अमृतमायुः' (मै. २।२।२) आयुर्जीवनम् अमरत्वमित्यर्थः धत्तम् रक्षतम् ।

चक्षुषो हेते मनसो हेते ब्रह्मणो हेते तपसश्च हेते ।
मेन्या मेनिरस्यमेनयस्ते सन्तु येऽस्माँ अभ्यघायन्ति ॥९॥

पदपाठः

चक्षुषः । हेते । मनसः । हेते । ब्रह्मणः । हेते । तपसः । च । हेते । मेन्याः । मेनिः । असि । अमेनयः । ते । सन्तु । ये अस्मान् । अभिऽअघायन्ति ॥९॥

चक्षुषः हेते हे नेत्रयोः वज्रायुध ! **मनसः हेते** हे चेतसो वज्रायुध ! **ब्रह्मणः हेते** हे प्राणशक्तेः वज्रायुध ! 'तद्यद्वै ब्रह्म स प्राणः' (जै. उ. १.११-१-२) इति श्रुतेः । यद्वा हे मन्त्रशक्तेः वज्रायुध ! **तपसश्च हेते** हे तपोबलस्य वज्रायुध ! **त्वं मेन्याः** वज्रनामसु (वैदिकको. ४।२९) पाठात् शस्त्रशक्तेः अपि **मेनिः** शस्त्रशक्तिः असि । अतः **ये** शत्रवः **अस्मान् अभ्यघायन्ति,** अघं पापमाचरन्तीति अघायन्ति, हन्तुमिच्छन्तीत्यर्थः । **ते** शत्रवः **अमेनयः** शस्त्ररहिताः **सन्तु** भवन्तु । तेषां शस्त्राणि मोघानि भवन्तु इत्यर्थः ।

योऽस्मांश्चक्षुषा मनसा चित्त्याकूत्या च यो
अघायुरभिदासात् ।
त्वं तानग्ने मेन्यामेनीन् कृणु स्वाहा ॥१०॥

पदपाठः

यः । अस्मान् । चक्षुषा । मनसा । चित्त्या । आऽकूत्या । च । यः । अघऽयुः । अभिऽदासात् । त्वम् । तान् । अग्ने । मेन्या । अमेनीन । कृणु । स्वाहा ॥१०॥

यः अघायुः पापी **अस्मान्** हन्तुकामो जनः **चक्षुषा** क्रूरदृष्टया **मनसा** दुर्भावनापूर्णेन चेतसा **चित्त्या** कलुषितचित्तवृत्त्या, **यश्च** दुष्टो जन **आकूत्या** मानसिकसङ्कल्पेन **अभिदासात्** नाशयेत् हन्तुमिच्छतीत्यर्थः । दसु उपक्षये धातोर्लेटि । अकारस्य आकारो व्यत्ययेन । हे **अग्ने** ! **तान्** पापिनो लोकान् **त्वं मेन्या** आत्मीयेन वज्रायुधेन **अमेनीन्** निःशस्त्रान् **कृणु** कुरु । **स्वाहा** इदं हविः त्वदर्थे सुहुतं भवेत् ।

इन्द्रस्य गृहोऽसि ।
तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः
सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥११॥

पदपाठः

इन्द्रस्य । गृहः । असि । तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन । ॥११॥

हे अग्ने ! **त्वम् इन्द्रस्य** ऐश्वर्यसम्पन्नस्येन्द्रस्य **गृहोऽसि** निवासस्थानभूतोऽसि । निवासस्थानवत् सहायकोऽसीत्यर्थः । अत एव मैत्रायण्यामाम्नायते 'अग्निना वा अनीकेन इन्द्रो वृत्रमहन्' (मै. १.१०.५) इति । ऐतरेयारण्यकेऽपि इन्द्राग्न्योरभेदः प्रतिपादितः । "अग्निर्णेता स वृत्रहा इति" (ऐ. आ. १.२.१) इति । हे अग्ने ! त्वं **सर्वगुः** सर्वगामी, **सर्वपूरुषः** सर्वपुरुषस्वरूपः, **सर्वात्मा** सर्वात्मभूतः **सर्वतनूः** सर्वशरी-

रान्तर्वर्त्ती चासि सर्वव्यापकत्वेनैवाग्निं ब्रह्म व्याचख्यौ शातपथी श्रुतिः "अग्निरेव ब्रह्म" (१०।४।१।५) इति । अतः यन्मे अस्ति यत्किमपि मदीयं वर्त्तते तेन सह अहं तं तादृशं त्वामग्निदेवं प्रपद्ये प्राप्तोऽस्मि । तं त्वा प्रविशामि तादृशे त्वयि विलीनो भवामि च । त्वया सहैकात्म्यं प्राप्नोमीत्यर्थः ।

इन्द्रस्य शर्मासि । तं त्वा प्रपद्ये तं त्वा प्रविशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१२॥

पदपाठः

इन्द्रस्य । शर्म । असि । तम । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ॥१२॥

हे अग्ने ! त्वम् इन्द्रस्य देवस्य शर्म गृहनामसु पाठात् (निघं. ३।४) निवासस्थानम् असि, यद्वा "वाग् वै शर्म" (ऐ. ब्रा. २।४) त्वम् इन्द्रस्य वाणी असि । शॄ (क्र्या.) हिंसायां धातोः 'सर्वधातुभ्यो मनिन्' (उ. ४।१४५) इति मनिन् प्रत्ययः । शेषं पूर्ववत् ।

इन्द्रस्य वर्मासि । तं त्वा प्र पद्ये तं त्वा प्र विशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१३॥

पदपाठः

इन्द्रस्य । वर्म । असि । तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ॥१३॥

हे अग्ने ! त्वम् इन्द्रस्य देवस्य वर्म आयुधानां निवारकं कवचं यद्वा कवचवद्रक्षकः, अथवा वरणीयं कामयितव्यं गृहम् (निघ. ३।४) विद्यते । वृञ् वरणे धातोर्मनिन् । असि विद्यसे । शेषं समानम् ।

इन्द्रस्य वरूथमसि । तं त्वा प्र पद्ये तं त्वा प्र विशामि
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ॥१४॥

पदपाठः

इन्द्रस्य । वरूथम् । असि । तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ॥१४॥

हे अग्ने ! त्वम् इन्द्रस्य देवस्य वरूथं गृहनामसु पाठात् (निघ. ३।४) वरणीयं गृहम् । धनमित्यन्यत्र सायणः (ऋ. ८।६७।३,६), रोगनिवारकं भेषजं वरूथमित्यप्यन्यत्र सायणः व्याचख्यौ (ऋ. १-२३.२१) असि वर्त्तसे । शेषं समानम् ।



सप्तमं सूक्तम्

दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । प्रथमादितृचस्य षष्ठ्यादिपञ्चर्चाञ्चारातयः, चतुर्थी-पञ्चम्योश्च सरस्वती देवताः । प्रथमाया विराड्गर्भा प्रस्तारपङ्क्तिः, द्वितीया-तृतीया-पञ्चमीनां सप्तम्यादिचतसृणाञ्चानुष्टुप्, चतुर्थ्याः पथ्याबृहती, षष्ठ्याश्च प्रस्तारपङ्क्तिश्छन्दांसि ।

निर्ऋतिकर्मणि 'आ नो भर' इति सूक्तेन शर्करामिश्रा धानाः सकृज्जुहोति । 'आ नो भर' 'इति धानाः' (कौ. सू. १८,१४) इत्यादि सूत्रम् ।

तथा अर्थोत्थापनविघ्नशमनकर्मणि अस्य सूक्तस्य विनियोगः । सूत्रादिकम्— 'अयं ते योनिः' (अ. ३.२०) इति सूक्ते द्रष्टव्यम् ।

अग्निचयने वनीवाहने क्रियमाणे इदं सूक्तं यजमानं वाचयति । तदुक्तं वैताने—'आ नो भर' इति वनीवाहने वाचयति । (वै० श्रौ० सू० २८।१७) इति । वनीवाहनम् ऋत्विजां दक्षिणार्थवचनम् ।

आ नो भर मा परिष्ठा अराते मा नो रक्षीर्दक्षिणां नीयमानाम् ।
नमो वीर्त्साया असमृद्धये नमो अस्त्वरातये ॥१॥

पदपाठः

आ । नः । भर । मा । परि । स्थाः । अराते । मा । नः । रक्षीः । दक्षिणाम् । नीयमानाम् । नमः । विऽईर्त्सायै । असम्ऽऋद्धये । नमः । अस्तु । अरातये ॥१॥

अराते ! हे कृपण ! अत्र कृपणगताः गुणाः स्तूयन्ते । हे कृपणते ! 'अरातयः अदानकर्माणः अदानप्रज्ञा वा' इति निरुक्तम् (३।११) **नः** अस्मभ्यम् **आभर** धनं देहि । **मा परिस्थाः** अस्मत्परितः मा तिष्ठ, तथा **नः** अस्माकं कृते **नीयमानां** समानीतां **दक्षिणां** यज्ञदक्षिणां **मा रक्षीः** स्वपार्श्वे मा अपस्थापय । यजमानस्य मनसि प्रवेशं लब्ध्वा तत्र कार्पण्यं मा समुत्पादयेत्यर्थः । **वीर्त्सायै** दानशीलतायाः अवरोधकारिण्यै यद्वा ईर्ष्या-संश्लिष्टायै **असमृद्धये** दरिद्रतायै तु **नमः** दूरादेव नमः, तथा **अरातये** कृपणाय शत्रुभूताय कृपणायेत्यर्थः । **नमः अस्तु** दूरादेव नमः भवतु । अरातये-इत्यत्र रा दाने धातोः क्तिन् । नञ् बहुव्रीहिः ।

यमराते पुरोधत्से पुरुषं परिरापिणम् ।
नमस्ते तस्मै कृण्मो मा वनिं व्यथयीर्मम ॥२॥

पदपाठः

यम् । अराते । पुरःऽधत्से । पुरुषम् । परिऽरापिणम् । नमः । ते । तस्मै । कृण्मः । मा । वनिम् । व्यथयीः । मम ॥२॥

अराते हे अदानशीलते ! **परिरापिणं**, परितो रपः पापं कुर्वाणं, रिपो रिप्रमिति पापनामनी भवतः (निरु. ४।२२)। सर्वदा कार्पण्यपापमाचरन्तमित्यर्थः, यद्वा रलडलयोरभेदः। परितो आत्मनो दानशीलताया मिथ्याप्रलापं घोषयन्तं बहुवादिनं यं **पुरुषं** यं कृपणं जनं पुरोधत्से सर्वपुरतः स्थापयसि समानयसीत्यर्थः, **तस्मै** यजमानाय तु **नमः कृण्मः** वयम् ऋत्विजो दूरादेव नमः कुर्मः । न तस्य यज्ञसमारोहे सम्मिलिता भवाम इत्यर्थः। हे कृपणते ! **मम** ऋत्विजः **वनिं** याचनां दक्षिणाप्राप्त्यभिलाषमित्यर्थः, वनुयाचने धातोः रूपसिद्धिः । **मा व्यथयीः** न व्यथय ।

प णो वनिर्देवकृता दिवा नक्तं च कल्पताम् ।
अरातिमनुप्रेमो वयं नमो अस्त्वरातये ॥३॥

पदपाठः

प्र। नः। वनिः। देवऽकृता। दिवा। नक्तम्। च। कल्पताम्। अरातिम्। अनुऽप्रेमः। वयम्। नमः। अस्तु। अरातये ॥३॥

नः अस्माकम् ऋत्विजां **वनिः** दक्षिणा याचनाकाङ्क्षा कीदृशी ? **देवकृता** देवयजनसम्बन्धिनी **दिवा नक्तञ्च** अहर्निशमेव **प्रकल्पताम्** तिष्ठेत्। वयं यज्ञदक्षिणां सदैव लभेमहीत्यर्थः । **वयम् अरातिं** कार्पण्यशीलं जनम् **अनु** अनुकूलं कर्त्तुं **प्र इमः** गच्छाम। **अरातये** कृपणाय न रातिः दानप्रवृत्तिर्यस्य स तस्मै **नमः अस्तु**। स्वानुकूलं विधातुं तं प्रणमाम इत्यर्थः।

सरस्वतीमनुमतिं भगं यन्तो हवामहे ।
वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु ॥४॥

पदपाठः

सरस्वतीम्। अनुऽमतिम्। भगम्। यन्तः। हवामहे। वाचम्। जुष्टाम्। मधुऽमतीम्। अवादिषम्। देवानाम्। देवऽहूतिषु ॥१॥

यन्तः यज्ञं सम्पादयितुं गच्छन्तो वयम् ऋत्विजः **सरस्वतीं** वाचामधीश्वरीं देवीम् **अनुमतिम्** 'इयं वा (पृथ्वी) अनुमतिः' (मै.४।३।८) यजनभूमिम्। यद्वा सरस्वतीं 'अमावास्या वै सरस्वती'। (तै. सं. ३।५।१।४) अमावास्यां तिथिं तथा अनुमतिं 'या वा पौर्णमासी सा अनुमतिः" (ऐ. ब्रा. ७।११) पूर्णिमातिथिं तथा **भगं** 'यज्ञो भगः' (श. ६।३।१।१९) भगवन्तं यज्ञं यद्वा ऐश्वर्यं **हवामहे** आह्वयामः। वयं **देवहूतिषु** देवानामाह्वानेषु यद्वा देवाह्वानवत्सु यज्ञेषु। अत्र देवहूतिपदयोः समासः। हूतिः, ह्वेञ् स्पर्धायां शब्दे च धातोः, स्त्रियां क्तिन्। **देवानां जुष्टां**, जुषी प्रीतिसेवनयोः धातोः क्तः प्रत्ययः। स्त्रियां टाप् च। यज्ञभाजां प्रीतिकरीं **मधुमतीं** प्रशस्तमाधुर्यगुणयुक्तां **वाचं** वाणीम् **अवादिषम्** अवदाम। यज्ञे वयं देवाह्वाने मधुरान् आह्वानकारिणो मन्त्रान् उच्चारयाम इत्यर्थः।

यं याचाम्यहं वाचा सरस्वत्या मनोयुजा ।
श्रद्धा तमद्य विन्दतु दत्ता सोमेन बभ्रुणा ।।५।।

पदपाठः

यम् । याचामि । अहम् । वाचा । सरस्वत्या । मनःऽयुजा । श्रद्धा । तम् । अद्य । विन्दतु । दत्ता । सोमेन । बभ्रुणा ।।५।।

अहं मनोयुजा मनोविचारसमवेतया **सरस्वत्या,** सृ गतौ धातोः'सर्वधातुभ्योऽसुन्' इत्यसुन् प्रत्यये सरस् इति रूपम्, ततो मतुप्, स्त्रियां ङीप् च । 'सरस् इत्युदक नाम सर्त्तेस्तद्वतीति' निरुक्तम् (९.२६) अत्र जलशब्देन तद्गतार्द्रत्वं गृह्यते । आर्द्रया स्निग्धया इत्यर्थः, **वाचा** वाण्या **यं** यजमानं दक्षिणां **याचामि, तं** जनं **अद्य बभ्रुणा** भरणकर्त्रा बभ्रुवर्णेन वा । भवति चात्र ब्राह्मणम् 'सोमो वै बभ्रुः' (श. ७।२।४।२६) इति सोमेन प्रसिद्धेन सोमपदार्थेन यद्वा बभ्रुणा भरणकारकेन **सोमेन** 'प्राणः सोमः' (श. ७।३।१।२) प्राणेन **दत्ता** प्रदत्ता वितरिता **श्रद्धा** दृढविश्वासभावना आदरभावना वा 'श्रद्धाऽऽदरे च काङ्क्षायाम्' इति मेदिनी । **विन्दतु** लभताम् । सोमेन समुत्साहितो यजमानः सश्रद्धम् ऋत्विग्भ्यो दक्षिणां ददात्वित्यर्थः ।

मा वनिं मा वाचं नो वीर्त्सीरुभाविन्द्राग्नी
आ भरतां नो वसूनि ।
सर्वे नो अद्य दित्सन्तोरातिं प्रति हर्यत ।।६।।

पदपाठः

मा । वनिम् । मा । वाचम् । नः । वि । ईर्त्सीः । उभौ । इन्द्राग्नी इति । आ । भरताम् । नः । वसूनि । सर्वे । नः । अद्य । दित्सन्तः । अरातिम् । प्रति । हर्यत ।।६।।

कृपणते ! नः अस्माकं वनिं याचनां, वन याचने धातोः रूपसिद्धिः । **मा वि ईर्त्सीः** मा स्तम्भय, याचनावरोधं न कुरु इत्यर्थः । **वाचम्** वाणीम् अपि मा स्तम्भय । **उभौ इन्द्राग्नी** इन्द्रश्चाग्निश्चेतीमौ युग्मदेवौ **नः** अस्माकं **वसूनि,** धनानि यद्वा 'प्राणा वै वसवः' (तै. ब्रा. ३।२।३।३) प्राणान् अथवा "पशवो वै वसु" (तां. ब्रा. ७।१०।१७) पशुधनानि **आ भरताम्** धारयताम् अस्मभ्यं प्रयच्छतामित्यर्थः । **अद्य** साम्प्रतं यज्ञदक्षिणाप्रदानसमये **सर्वे** देवाः **नः** अस्मभ्यं **दित्सन्तः** दक्षिणां दातुमिच्छन्तः **अरातिं** कार्पण्यं **प्रतिहर्यत** अपहरन्तु, दूरं कुर्वन्तु इत्यर्थः ।

परोपेह्यसमृद्धे वि ते हेतिं नयामसि ।
वेद त्वाहं निमीवन्तीं नितुदन्तीमराते ।।७।।

पदपाठः

पर । अप । इहि । असम्ऽऋद्धे । वि । ते । हेतिम् । नयामसि । वेद । त्वा । अहम् । निऽमीवन्तीम् । नितुऽदन्तीम् । अराते ॥७॥

हे **असमृद्धे** हे दरिद्रते ! **पर अपइहि** दूरमपसर । वयमृत्विजः **ते हेतिं** वज्रनामसु पाठात् (निघ. २।२०) त्वदीयं वज्रं **विनयामसि** प्रतिगमयामः, विफलं कुर्मः इत्यर्थः । हे **अराते** अदानशीलत्वात् हे शत्रुभूते कृपणते ! **अहम् निमीवन्तीं** हिंसां सम्भजमानां नि+मीञ् हिंसायां धातोः सम्पदादित्वाद् भावे क्विपि निकृष्टतया हिंसनं निमयनं सा हिंसा विद्यते यस्याः सा । निर्बलविधायिनीम् अत एव **नितुदन्तीम्** नितरां पीडयित्रीं त्वा त्वां वेद सम्यक् जानामि ।

उत नग्ना बोभुवती स्वप्नया सचसे जनम् ।
अराते चित्तं वीर्त्सन्त्याकूतिं पुरुषस्य च ॥८॥

पदपाठः

उत । नग्ना । बोभुवती । स्वप्नऽया । सचसे । जनम् । अराते । चित्तम् । विऽईर्त्सन्ती । आकूतिम् । पुरुषस्य । च ॥८॥

अराते ! हे शत्रुभूते अदानशीलते ! उत तथा त्वं **नग्ना** दिगम्बरा त्यक्तलज्जेत्यर्थः, **बोभुवती** भृशं भवन्ती **जन** पुरुष **स्वप्नया** स्वप्नवृत्या मिथ्यारूपेणेत्यर्थः **सचसे** सेवसे । त्वं व्यर्थमेव स्वप्नवत् पुरुषं प्रलम्भयसि । किं कुर्वती ? **पुरुषस्य** जनस्य **चित्तं** हृदयम् **आकूतिं च** मनोभावनां च **विईर्त्सन्ती** अवरुद्धां विदधती इति । अर्थात् मानवानां मनोभावनायाः दानशीलतायाः अवरोधं कुर्वती कृपणता स्वप्नवत् मिथ्यासुखानि प्रदर्श्य निर्लज्जा भूत्वा न लोकान् प्रलम्भयेत्—इत्यर्थः ।

या महती महोन्माना विश्वा आशा व्यानशे ।
तस्यै हिरण्यकेश्यै निर्ऋत्या अकरं नमः ॥९॥

पदपाठः

या । महती । महाऽउन्माना । विश्वा । आशा । विऽआनशे । तस्यै । हिरण्यऽकेश्यै । निःऽऋत्यै । अकरम् । नमः ॥९॥

या निर्ऋतिः पापदेवता कृपणतारूपेत्यर्थः, **महती** विशाला वर्त्तते, **महोन्माना** महाप्रमाणवती 'माने प्रमाणे प्रस्थादौ मानश्चित्तोन्नतौ ग्रहे' इति हैमः । मनु अवबोधने धातोर्घञ्, मानम्, तथा **या** हि **विश्वा आशा** सर्वासु दिक्षु **व्यानशे** व्याप्ता विद्यते । **तस्यै निर्ऋत्यै** पापदेवतायै, कीदृश्यै ? **हिरण्यकेश्यै** सुवर्णकेशायै **नमः अकरम्** नमस्कारं करोमीत्यर्थः ।

हिरण्यवर्णा सुभगा हिरण्यकशिपुर्मही ।
तस्यै हिरण्यद्रापयेरात्या अकरं नमः ॥१०॥

पदपाठः

हिरण्यऽवर्णा । सुऽभगा । हिरण्यऽकशिपुः । मही । तस्यै । हिरण्यऽद्रापये । अरात्यै । अकरम् । नमः ॥१०॥

सा कृपणताप्रवृत्तिः **हिरण्यवर्णा** सुवर्णवर्णा सुवर्णवल्लोभनीयेत्यर्थः **सुभगा** सुन्दरयत्नवती 'भगं श्रीयोनिवीर्येच्छाज्ञानवैराग्यकीर्त्तिषु । महात्म्यैश्वर्ययत्नेषु धर्मे मोक्षेऽथ वा रवौ' इति मेदिनी । यद्वा सुन्दरकीर्त्तिमती । कृपणता सर्वत्र प्रसिद्धिमायातीति तस्याः कीर्त्तिमत्वमुपयुक्तमेव । पुनः कीदृशी ? **हिरण्यकशिपुः** सुवर्णान्नवती यद्वा सुवर्णवसना 'कशिपु त्वन्नमाच्छादनं द्वयम्' इत्यमरः (३।३।१३०)। **मही** विस्तीर्णा च विद्यते । ईदृग्विधायै **हिरण्यद्रापये** सुवर्णकवचधारिण्यै सुवर्णप्रभूतायै इत्यर्थः । कार्पण्येन लोका धनवन्तो जायन्ते एव । **तस्यै अरात्यै** कृपणतायै शुत्रुभूतायै **नमः अकरम्** नमनं कुर्मः ।

इति दशमः प्रपाठकः

अष्टमं सूक्तम्

नवर्चस्यास्य सूक्तस्याथर्वा ऋषिः । प्रथमा-द्वितीययोर्ऋचोरग्निः, तृतीयाया विश्वेदेवाः, चतुर्थ्यादिषण्णाञ्चेन्द्रो देवताः । प्रथमा-पञ्चम्यष्टमीनामनुष्टुप्, द्वितीयायास्त्र्यवसाना षट्पदा जगती, तृतीया-चतुर्थ्योर्भुरिक्पथ्यापङ्क्तिः सप्तम्या द्व्युष्णिग्गर्भा पथ्यापङ्क्तिः, नवम्याश्च त्र्यवसाना षट्पदाद्व्युष्णिग्गर्भा जगती छन्दांसि ।

अभिचारकर्मणि 'वैकङ्कतेन' इति सूक्तेन जुहोति । "वैकङ्कतेन इति मन्त्रोक्तम्" (कौ. सू. ४८।८) इति सूत्रात् ।

वैकङ्कतेनेध्मेन देवेभ्य आज्यं वह ।
अग्ने ताँ इह मादय सर्व आ यन्तु मे हवम् ॥१॥

पदपाठः

वैकङ्कतेन । इध्मेन । देवेभ्यः । आज्यम् । वह । अग्ने । तान् । इह । मादय । सर्वे । आ । यन्तु । मे । हवम् ॥१॥

हे **अग्ने** ! **वैकङ्कतेन** विकङ्कतापरनामधेयेन वृक्षसम्पादितेन स्रुवा, 'विकङ्कतः स्रुवावृक्षो ग्रन्थिलो व्याघ्रपादपि' इत्यमरः (२।४।३७)। विपूर्वको गत्यर्थः ककिधातुः, तस्माद् अतच्-प्रत्ययः । प्रजापतेराहुत्या विकङ्कतस्योत्पत्तिमाह **तित्तिरिः**–'प्रजापतिर्वा अजुहोत् सा यत्राहुतिः प्रत्यतिष्ठत् ततो विकङ्कत उदतिष्ठत्,

ततः प्रजा असृजत" (तै० सं० ३।५।७।३) इति। इध्मेन काष्ठेन देवेभ्यः दिव्यगुण-विशिष्टेभ्य इन्द्रादिदेवेभ्यः आज्य घृतोपलक्षितं हविर्द्रव्यं वह नय प्रापयेत्यर्थः। तान् देवांश्च इह यज्ञे मादय आनन्दं प्रापय। मदीहर्षे धातोर्णिजन्ताल्लोट्। ते सर्वे च देवाः मे मम हवम् आहूयन्ते देवा यस्मिन्, तं यज्ञं प्रति आयन्तु आगच्छन्तु। आकारलोपश्छान्दसः।

इन्द्रा याहि मे हवमिदं करिष्यामि तच्छृणु।
इम ऐन्द्रा अतिसरा आकूतिं सं नमन्तु मे॥
तेभिः शकेम वीर्यं जातवेदस्तनूवशिन् २॥

पदपाठः

इन्द्र। आ। याहि। मे। हवम्। इदम्। करिष्यामि। तत्। शृणु। इमे। ऐन्द्राः। अतिऽसराः। आऽकूतिम्। सम्। नमन्तु। मे। तेभिः। शकेम। वीर्यम्। जातऽवेदः। तनूऽवशिन्॥२॥

हे इन्द्र! इदं यज्ञकर्म करिष्यामि अहं सम्पादयिष्ये, अतः मे मम हवं यज्ञं प्रति आयाहि आगच्छ, तन्मे वचः शृणु आकर्णय। इमे एते ऐन्द्राः इन्द्र-सम्बन्धिनः अतिसराः अत्यन्तसरणशीलाः, अग्रगामिन इत्यर्थः, देवाः मे मदीयाम् आकूतिं मनोभावनां सं नमन्तु प्रणमन्तु मम मनोविचारान् विज्ञाय ते मदग्रे प्रणताः भूत्वा मे मनोरथान् पूरयन्त्वित्यर्थः। तनूवशिन् देहवशकारिन् हे जातवेदः जनानां वेदितः! तमेतं शब्दं यास्को व्याचष्टे—"जातवेदाः कस्मात्? जातानि वेद, जातानि वैनं विदुर्जाते जाते विद्यते इति वा, जातवित्तो वा जातधनो वा, जात-विद्यो वा, जातप्रज्ञानो वा, यज्जातः पशून् विन्दतेति तज्जातवेदसो जातवेदस्त्वमिति मैत्रायणीयब्राह्मणम्। तस्मात् सर्वान् ऋतून् पशवोऽग्निमभिसर्पन्तीति च" (निरु० ७।१९) इति। ईदृग्गुणविशिष्ट! हे अग्ने! तेभिः तैरतिसरैः साहाय्य-भूतैर्वयं वीर्यं सामर्थ्यं शकेम प्राप्नुयाम इत्यर्थः।

यदसावमुतो देवा अदेवः सञ्चिकीर्षति।
मा तस्याग्निर्हव्यं वाक्षीद्धवं देवा अस्य
मोप गुर्ममैव हवमेतन॥३॥

पदपाठः

यत्। असौ। अमुतः। देवाः। अदेवः। सन्। चिकीर्षति। मा। तस्य। अग्निः। हव्यम्। वाक्षीत्। हवम्। देवाः। अस्य। मा। उप। गुः। मम। एव। हवम्। आ। इतन॥३॥

देवाः हे दिव्यगुणशालिनो देवाः ! **असौ** अस्माकमरातिः **अदेवः सन्** 'यशो देवाः, (श. ब्रा. २।१।४।६), यशोविहीनः सन् **अमुतः** अस्मात् यज्ञात् यत्किमपि **चिकीर्षति** कर्त्तुमिच्छति तस्य शत्रोः **हव्यं** हविर्द्रव्यम् **अग्निः** हव्यवाहको देवः **मा वाक्षीत्** देवानां समीपे न नयतु। नैव तान् हविर्द्रव्यं प्रापयेदित्यर्थः। येन देवाः अस्य अदेवस्य **हवं** यज्ञस्थलं **मा उप गुः** न गच्छेयुः **मम एव** मदीयमेव **हवञ्च** यज्ञं प्रति **एतन** आगच्छेयुः। अत्र इणगतौ धात्तोर्लङि तनवादेशश्छान्दसः।

अति धावतातिसरा इन्द्रस्य वचसा हत।
अविं वृक इव मथ्नीत स वो जीवन्
मा मोचि प्राणमस्यापि नह्यत ॥४॥

पदपाठः

अति। धावत। अतिऽसराः। इन्द्रस्य। वचसा। हत। अविम्। वृकः। इव। मथ्नीत। सः। वः। जीवन्। मा। मोचि। प्राणम्। अस्य। अपि। नह्यत ॥४॥

इन्द्रस्य अतिसरा इन्द्राग्रगामिनो हे देवाः ! **अतिधावत** अत्यन्तमग्रे पलायध्वम्, प्रपलाय्य च **वचसा इन्द्रस्य** कथनेन मदीयेन प्रार्थनावचनेन वा **हत** अस्मच्छत्रुं मारयध्वम्। **मथ्नीत** च विलोडयत। कथमिव ? **वृकः अविमिव** यथा वृकः 'भेडिया' इति भाषायां प्रसिद्धः ईहामृगः, **अविं** मेषं मथ्नाति तद्वत्। **जीवन् सः** जीवितः सन् सः दुष्टः **वः** युष्माकं बन्धनात् **मा मोचि** मुक्तो न भवेत्। **अस्य** दुष्टस्य **प्राणमपि** प्राणानपि **नह्यत** बध्नीत, स निष्प्राणो भवेदित्यर्थः।

यममी पुरोदधिरे ब्रह्माणमपभूतये।
इन्द्र स ते अधस्पदं तं प्रत्यस्यामि मृत्यवे ॥५॥

पदपाठः

यम्। अमी। पुरः। दधिरे। ब्रह्माणम्। अपऽभूतये। इन्द्र। सः। ते। अधःऽपदम्। तम्। प्रति। अस्यामि। मृत्यवे ॥५॥

अमी अस्मत्सपत्नाः, **यं ब्रह्माणं** यज्ञसम्पादकम् ऋत्विजम् **अपभूतये** अस्माकं दुर्गतेः निमित्तं **पुरोदधिरे** अग्रे अकुर्वन् पौरोहित्यं कर्त्तुं स्व्यकुर्वन्, हे **इन्द्र** ! **सः** पुरोहितः **ते** तव **अधस्पदं** चरणयोरधोभागे भवेदिति शेषः। स ते पदाघातेन नश्येदित्यर्थः। अहं तु **तं** दुष्टं **मृत्यवे** मरणाय **प्रत्यस्यामि** प्रक्षिपामि।

यदि प्रेयुर्देवपुरा ब्रह्म वर्माणि चक्रिरे।
तनूपानं परिपाणं कृण्वाना यदुपोचिरे
सर्वं तदरसं कृधि ॥६॥

पदपाठः

यदि । प्रऽईयुः । देवऽपुराः । ब्रह्म । वर्माणि । चक्रिरे । तनूऽपानम् । परिऽपानम् । कृण्वानाः । यत् । उपऽऊचिरे । सर्वम् । तत् । अरसम् । कृधि ॥६॥

ये जनाः **परिपाणं** परितः पानं सोमपानं यत्र क्रियते तं सोमयागं तथा **तनूपानम्** अङ्गानां रक्षणं यत्र भवेत्, तादृशं यज्ञं **कृण्वानाः** कुर्वन्तः, यद्वा अभिचारकर्मणि परितः शरीररक्षार्थं क्रियमाणमनुष्ठानादिकर्म सम्पादयन्तो **ब्रह्म वर्माणि चक्रिरे** मन्त्रान् कवचवत् धारयामासुः, **यदि देवपुराः** देवान् पुरःस्थापकाः ऋत्विजो लोकाः अपि **प्र ईयुः** प्रकर्षेण आगच्छेयुः, शत्रुभिः संमिल्य अस्माकमुपरि आक्रमणं कुर्युश्चेत् इत्यर्थः, **तदपि** ते **यत्** किमपि **उप ऊचिरे** अस्माकं प्रतिकूलं मन्त्रान् उच्चारयेयुः **तत्सर्वं** तेषां मन्त्रोच्चारणं हे अग्ने ! **अरसं** नीरसं निष्फलमित्यर्थः, **कृधि** कुरु ।

यानसावतिसरांश्चकार कृणवच्च यान् ।
त्वं तानिन्द्र वृत्रहन् प्रतीचः पुनरा कृधि
यथामुं तृणहां जनम् ॥७॥

पदपाठः

यान् । असौ । अतिऽसरान् । चकार । कृणवत् । च । यान् । त्वम् । तान् । इन्द्र । वृत्रऽहन् । प्रतीचः । पुनः । आ । कृधि । यथा । अमुम् । तृणहान् । जनम् ॥७॥

वृत्रहन्, वृत्रं हन्तीति तत्सम्बुद्धौ । वृतुवर्त्तने धातोः 'स्फायितञ्जि०' (उ० २।१३) सूत्रेण रक् प्रत्यये वृत्रशब्दरूपसिद्धिः । तदुपपदात् हन्हिंसागत्योः धातोः 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (पा. ३।२।८७) इत्यनेन क्विप् । हे इन्द्रदेव ! **असौ** अस्माकं सपत्नः **यान्** जनान् **अतिसरान्** अस्मान् हन्तुं पूर्वं पुरोगामिनः **चकार** अकरोत्, **यांश्च कृणवत्** साम्प्रतं कुर्वन् वर्त्तते तान् सर्वान् **त्वं पुनः** भूयः **प्रतीचः** प्रतिगतमञ्चतीति प्रत्यङ् तान् । प्रतिपूर्वकात् अञ्चुगतिपूजनयोः धातोः 'ऋत्विक्०' इति क्विन् । 'अनिदिताम्' इति नलोपे द्वितीयाबहुवचने शस्प्रत्यये 'अचः' इत्यल्लोपे 'चौ' इति च दीर्घे रूपम् । पश्चाद्गामिनः **आकृधि** आसमन्ताद् विधेहि । तान् अस्मत्तः प्रत्यावर्त्तयेत्यर्थः । **यथा** येन **अमुं** जनं तं शत्रुजनं **तृणहां** नाशयेयम्, वयं नाशयाम इत्यर्थः ।

यथेन्द्र उद्वाचनं लब्ध्वा चक्रे अधस्पदम् ।
कृण्वेऽहमधरांस्तथामूञ्छश्वतीभ्यः समाभ्यः ॥८॥

पदपाठः

यथा । इन्द्रः । उत्ऽवाचनम् । लब्ध्वा । चक्रे । अधःऽपदम् । कृण्वे । अहम् । अधरान् । तथा । अमून् । शश्वतीभ्यः । समाभ्यः ॥८॥

इन्द्रः वृत्रहा देवेन्द्रो **यथा** येन प्रकारेण **उद्वाचनम्** उच्चैः मन्त्रोच्चारणं **लब्ध्वा** प्राप्य श्रुत्वेत्यर्थः, **अधस्पदं चक्रे** शत्रुं चरणाघातैरपातयत्, जघानेति यावत्, **तथा** तथैवाहमपि **अमून्** तान् शत्रून् **शश्वतीभ्यः समाभ्यः** सनातनीभ्यः शरद्भ्यः, शश्वच्छब्दात् स्त्रियां ङीप् । सर्वकालायेत्यर्थः । 'हायनोऽस्त्री शरत्समाः' इत्यमरः (१.४.२०) । अधरान् नीचैरधोमुखानित्यर्थः । कृण्वे कुर्वे । डुकृञ् करणे धातोर्विकरणव्यत्ययेन श्नुः ।

अत्रैनानिन्द्र वृत्रहन्नुग्रो मर्मणि विध्य ।
अत्रैवैनानभि तिष्ठेन्द्र मेद्यहं तव ।
अनु त्वेन्द्रा रभामहे स्याम सुमतौ तव ॥९॥

पदपाठः

अत्र । एनान् । इन्द्र । वृत्रऽहन् । उग्रः । मर्मणि । विध्य । अत्र । एव । एनान् । अभि । तिष्ठ । इन्द्र । मेदी । अहम् । तव । अनु । त्वा । इन्द्र । आ । रभामहे । स्याम । सुऽमतौ । तव ॥९॥

वृत्रहन् इन्द्र हे वृत्रघातिन् इन्द्रदेव ! **अत्र** अस्मिन् अभिचारकर्मणि सङ्ग्रामे वा **उग्रः** उद्गूर्णबलसम्पन्नस्त्वम् **एनान्** अरातीन् **मर्मणि** हृदयादिमर्मस्थले **विध्य** ताडय । एतेषां मर्माणि छित्वा एनान् घातयेत्यर्थः । **अत्रैव** अस्मिन्नेवावसरे **एनान् अभितिष्ठ** एतेषां संमुखे प्रहर्त्तुं स्थितो भव । **अहं** याजकः **तव** इन्द्रस्य बलिष्ठस्य **मेदी** स्निग्ध आत्मीयो जनः, अस्मीति शेषः । मेदः स्नेहः अस्यास्तीति इनिः प्रत्ययः । हे **इन्द्र ! त्वाम् अनु आरभामहे** त्वामनुकूलं विचार्यैव एतत् कर्म आरब्धं कुर्मः । अतो वयं **तव** इन्द्रस्य **सुमतौ** शोभनमतौ यद्वा 'प्रजा वै मतयः' (तै. आ. ५।६।८) त्वत्प्रजासु कुटुम्बिषु **स्याम** भवेम । सदैव त्वमात्मीयेषु अस्मान् गणयेत्यर्थः ।



नवमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । वास्तोष्पतिर्देवता । प्रथमापञ्चम्योर्ऋचोर्दैवीबृहती, द्वितीया-षष्ठचोर्दैवीत्रिष्टुप्, तृतीया-चतुर्थ्योर्दैवीजगती, सप्तम्याः पञ्चपदा विराडुष्णिग्बृहतीगर्भा पञ्चपदा जगती, अष्टम्याश्च त्र्यवसाना चतुष्पदा (पुरस्कृति) त्रिष्टुब्बृहतीगर्भातिजगती छन्दांसि ।

'दिवे स्वाहा' इति सूक्तेन सर्वरोगभैषज्यार्थम् आज्यं हुत्वा सयवे केवले वा उदपात्रे चतुरः सम्पातान्, द्वौ पृथिव्याम् आनीय सम्पतितमृत्सहितोदकेन सूक्ताभि-

मन्त्रितेन व्याधितमाप्लावयेत् । सूत्रितं हि--'दिवे स्वाहा' (अ. ५।९), 'इमं यवम्' (अ. ६।९१) इति । चतुर उदपात्रे सम्पातान् आनयति । द्वौ पृथिव्याम् । तौ प्रत्याहृत्याप्लावयति । सयवे च'' (कौ. सू. २८, १७–२०) इति ।

दिवे स्वाहा ॥१॥

पदपाठः

दिवे । स्वाहा ॥१॥

सर्वरोगभैषज्यकामो यजमानः 'आरोग्यं भास्करादिच्छेत्' इति मन्यमानो दिवं सूर्यस्य भास्करस्य स्थानं विज्ञाय दिवे स्वाहाकारं प्रयच्छति । भूतानामधिपतये **दिवे स्वाहा** सुहुतं भवेत् । भवति चात्र ब्राह्मणम्--'असावेव द्युलोको भूतानां पतिः' (जै. ब्रा. २।४१) इति । 'सूर्यो दिवा' (अधिपतिः)' (तै. सं. ३।४।५।१) इति च । यद्वा भैषज्यकामो दिवं प्राणरूपमात्मरूपं वा मत्वा तस्यै आहुतिं प्रयच्छति । यतः 'द्यौरेवात्मा' (श. ९।३।३।१५) 'प्राणो वै दिवः' (श. ६।७।४।३) इति चामनुते याज्ञवल्क्यः ।

पृथिव्यै स्वाहा ॥२॥

पदपाठः

पृथिव्यै । स्वाहा ॥२॥

सर्वरोगभैषज्यकामो जनः पृथिवीमपि सवितृरूपामवगत्य **पृथिव्यै स्वाहा** इति तस्यै आहुतिं ददाति । 'इयं वै सविता' (तै. ब्रा. ३।९।१३।२) इति श्रुतेः । यद्वा पृथिव्यां यमस्याधिपत्यं जानानो यजमानो रोगान्मुक्तिं कामयमानोऽस्यै पृथिव्यै आहुतिं प्रयच्छति । आम्नायते च तैत्तिरीयसंहितायाम्–'यावती वै पृथिवी तस्यै यम आधिपत्यं परीयाय' (५।२।३।१) इति । अथवा पृथिवीं श्रीरूपिणीं मत्वा रोगी स्वाहाकारं करोति । यथा चोक्तं शतपथे--'श्रीर्वा इयं तस्माद् योऽस्यै भूयिष्ठं विन्दते स एव श्रेष्ठो भवति' (११।१।६।२६) इति ।

अन्तरिक्षाय स्वाहा ॥३॥

पदपाठः

अन्तरिक्षाय स्वाहा ॥३॥

मन्त्रद्रष्टा महर्षिः यजमानो वा अन्तरिक्षं ब्रह्मरूपिणं ज्ञात्वा तस्मै आहुतिं प्रयच्छति--**अन्तरिक्षाय** ब्रह्मणे **स्वाहा** इदं सुहुतं स्यात् । 'तद् (ब्रह्म) इदमन्तरिक्षम्' (जै. उ. २।३।३।६) इति भवति हि श्रुतिः । यद्वा भैषज्यकामो यजमानोऽन्तरिक्षं प्राणस्वरूपं जानन् प्राणरक्षार्थं तस्मै जुहोति । आमनन्ति चैवं तैत्तिरीयाः–''प्राणो वा अन्तरिक्षम्' (तै. सं. ५।६।८।५) इति ।

अन्तरिक्षाय स्वाहा ॥४॥
दिवे स्वाहा ॥५॥
पृथिव्यै स्वाहा ॥६॥

पदपाठः

अन्तरिक्षाय । स्वाहा ॥४॥ दिवे । स्वाहा ॥५॥ पृथिव्यै । स्वाहा ॥६॥

एतैस्त्रिभिर्मन्त्रैः प्रतिलोमक्रमेण पुनस्ताभ्य एव तिसृभ्यो देवताभ्य आहुतिं प्रयच्छति भैषज्यकामो यजमानः ।

सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा
पृथिवी शरीरम् ।
अस्तृतो नामाहमयमस्मि स आत्मानं
नि दधे द्यावापृथिव्यां गोपीथाय ॥७॥

पदपाठः

सूर्यः । मे । चक्षुः । वातः । प्राणः । अन्तरिक्षम् । आत्मा । पृथिवी । शरीरम् । अस्तृतः । नाम । अहम् । अयम् । अस्मि । सः । आत्मानम् । नि । दधे । द्यावापृथिव्याम् । गोपीथाय ॥७॥

आत्मनो विराड्रूपत्वं प्रदर्शयति श्रुतिः । **मे** आत्मनः **सूर्यः** आदित्यः **चक्षुः** नेत्रस्थानीयोऽस्ति, **वातः** पवनः **प्राणो** वर्त्तते, **अन्तरिक्षम्** मध्यस्थानीयोऽन्तरिक्षलोकः आत्मभूतो विद्यते, **पृथिवी** भूलोकः **शरीरम्** पाञ्चभौतिकं शरीरमस्ति । **अहम्** अत एवाहमात्मा **अतृस्तो नाम** अपरिच्छिन्नत्वात् केनापि अहिंसितो वर्त्ते । स्तृञ् हिंसायां (स्वा०) धातुः । न स्तृतः अस्तृतः । एतादृशः **अयमहमस्मि** एषोऽहमात्मा विद्ये । **सः** तादृशोऽहं **गोपीथाय** गो पृथ्वी तद्गतसर्वजनरक्षणाय, गो इत्युपपदे पा रक्षणे धातोः 'निशीथगोपीथावगथः' (उ. २।१६६) इत्यनेन थक्प्रत्ययः । **द्यावापृथिव्यां** मातृपितृभूताभ्यां द्यावाभूमिभ्यां प्रति **आत्मानं निदधे** अहमात्मानं समर्पये ।

उदायुरुद्बलमुत्कृतमुत्कृत्यामुन्मनीषामुदिन्द्रियम् ।
आयुष्कृदायुष्पत्नी स्वधावन्तौ गोपा
मे स्तं गोपायतं मा ।
आत्मसदौ मे स्तं मा मा हिंसिष्टम् ॥८॥

पदपाठः

उत् । आयुः । उत् । बलम् । उत् । कृतम् । उत् । कृत्याम् । उत् । मनीषाम् । उत् । इन्द्रियम् । आयुःऽकृत् । आयुष्पत्नीत्यायुःऽपत्नी । स्वधावन्तौ । गोपा । मे । स्तम् । गोपायतम् । मा । आत्मऽसदौ । मे । स्तम् । मा । मा । हिंसिष्टम् ॥८॥

हे वास्तोष्पते ! मम **आयुः** जीवनम् **उत्** उत्कृष्टं भवतु, **बलं** सामर्थ्यम् **उत्** उत्कृष्टं स्यात्, **कृतं** विहितं कर्मापि **उत्** उत्कृष्टमेव भवेत्, **कृत्यां** मम क्रियाम् **उत्** उत्तमां विधेहि त्वम् । **मनीषाम् उत्** मनोऽभिलाषम् इच्छां वा उन्नमय, **इन्द्रियम् उत्** इन्द्रियसामर्थ्यम् इन्द्रियसमूहं वा उन्नमय, **आयुष्कृत्** आयुर्वृद्धिकरोऽग्निः 'अग्निर्वा आयुः' (श. ६।७।३।७), यद्वा 'असौ द्युलोक आयुः' (ऐ. ब्रा. ४।१५) इति प्रमाणात् असौ द्युलोकः, **आयुष्पत्नी** आयुषः पालयित्री पृथ्वी चेमौ देवौ **स्वधावन्तौ** शोभनान्नजलादिभिः पूर्णौ **मे** मम **गोपा** रक्षकौ **स्तम्** स्ताम् । **मा** मां **गोपायतं** रक्षतां च । **मे** मम **आत्मसदौ** आत्मनि निवासकारिणौ इमौ स्तं भवेताम्, **मा** माञ्च **मा हिंसिष्टम्** न नाशयताम् ।



दशमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । वास्तोष्पतिर्देवता । प्रथमादिषड् ऋचां यवमध्या त्रिपदा गायत्री, सप्तम्या यवमध्या ककुप्, अष्टम्याश्च पुरोधृतिद्व्यनुष्टुब्गर्भा पराष्टिस्त्र्यवसाना चतुष्पदातिजगती छन्दांसि ।

'अश्मवर्म मेसि' इति सूक्तेन पत्तन-ग्राम-गृह-स्वस्त्ययनार्थं षड् अश्मनः सम्पातवतः कृत्वा अभिमन्त्र्य चतुर्षु पत्तनादिकोणेषु चतुरो निखनति, एकं मध्ये निखनति, एकं पत्तनाद्युपरि निदधाति । तदुक्तं कौशिकेन––"'अश्मवर्म' इति षड् अश्मनः सम्पातवतः स्रक्तिषूपर्यधस्तान् निखनति" (कौ. सू. ५१।४) इति । 'यो मा दिशाम्'' इति सप्तमी ऋक् पूर्वासाम् ऋचां प्रत्येकं द्वितीया कार्या । एवं षड्भिः षट् सम्पाताः कार्या इत्यर्थः ।

अश्मवर्म मेसि यो मा प्राच्या दिशोघायुरभिदासात् ।
एतत् स ऋच्छात् ॥१॥

पदपाठः

अश्मऽवर्म । मे । असि । यः । मा । प्राच्याः । दिशः । अघऽयुः । अभिऽदासात् । एतत् । सः । ऋच्छात् ॥१॥

हे **अश्मवर्म !** अश्मानः पाषाणा एव सन्ति वर्माणि शरीररक्षकाणि यस्य तत्सम्बुद्धौ । अशूङ् व्याप्तौ सङ्घाते च धातोः 'अन्येभ्योऽपि०' (पा०अ० ३।२।७५) इति सूत्रेण मनिन् । 'स्थिरो वा अश्मा' इति शतपथब्राह्मणम् (६।१।२।५)। अश्मा मेघः इति च निघण्टुकारः (१।१०)। 'तस्य (वृत्रस्य) एतच्छरीरं यद् गिरयो

यदश्मानः' इत्यपि शातपथी श्रुतिः (३।४।३।१३)। वृणोति देहमिति वर्म। वृञ् वरणे धातोर्मनिन्। त्वं मे मम राज्ञः **असि** वर्त्तसे, **यः** कश्चन **अघायुः** आत्मनः अघमिच्छुः। अघशब्दात् इच्छायामर्थे क्यच्। 'क्याच्छन्दसि' इत्यनेन क्यजन्ताद् उः प्रत्ययः। दुष्टो जन इत्यर्थः। **प्राच्याः दिशः** पूर्वदिशातः **मा** माम् **अभिदासात्** अभिमुखेन उपक्षिणुयात् हन्तुं प्रयतेत वा इत्यर्थः। अभिपूर्वकात् दसु उपक्षये धातोः लेट्। अकारस्याकारश्छान्दसः। **सः** दुष्टः स्वयमेव **एतत्** एतेन कर्मणा **ऋच्छात्** प्रलयं गच्छेत्। ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु (तु०) इति धातोः रूपम्। परिचरणकर्मेति निघण्टुकारः (३।५)।

अश्मवर्म मेसि यो मा दक्षिणाया दिशोऽघायुरभिदासात्
एतत् स ऋच्छात् ॥२॥

पदपाठः

अश्मऽवर्म। मे। असि। यः। मा। दक्षिणायाः। दिशः। अघऽयुः। अभिऽदासात्। एतत्। सः। ऋच्छात् ॥२॥

हे **अश्मवर्म** ! **दक्षिणायाः दिशः** दक्षिणदिशायाः० शेषं पूर्ववत्।

अश्मवर्म मेसि यो मा प्रतीच्या दिशोऽघायुरभिदासात्।
एतत् स ऋच्छात् ॥३॥

पदपाठः

अश्मऽवर्म। मे। असि। यः। मा। प्रतीच्याः। दिशः। अघऽयुः। अभिऽदासात्। एतत्। सः। ऋच्छात् ॥३॥

हे **अश्मवर्म** ! **प्रतीच्याः दिशः** पश्चिमदिशातः० शेषं पूर्ववत्।

अश्मवर्म मेसि यो मोदीच्या दिशोऽघायुरभिदासात्।
एतत् स ऋच्छात् ॥४॥

पदपाठः

अश्मऽवर्म। मे। असि। यः। मा। उदीच्याः। दिशः। अघऽयुः। अभिऽदासात्। एतत्। सः। ऋच्छात् ॥४॥

हे **अश्मवर्म** ! **उदीच्याः दिशः** उत्तरदिशातः० शेषं पूर्ववत्।

अश्मवर्म मेसि यो मा ध्रुवाया दिशोऽघायुरभिदासात्।
एतत् स ऋच्छात् ॥५॥

पदपाठः

अश्मवर्म। मे। असि। यः। मा। ध्रुवायाः। दिशः। अघऽयुः। अभिऽदासात्। एतत्। सः। ऋच्छात् ॥५॥

हे **अश्मवर्म** ! **ध्रुवायाः दिशः** 'इयं वै ध्रुवा (पृथ्वी)' (तै. सं. २।६।५।६) पृथ्वीदिक्तः, पृथिव्याः सकाशादित्यर्थः । शेषं पूर्ववत् ।

अश्मवर्म मेसि यो मोऽर्ध्वाया दिशोऽघायुरभिदासात् ।
एतत् स ऋच्छात्॥६॥

पदपाठः

अश्मऽवर्म । मे । असि । मा । ऊर्ध्वायाः । दिशः । अघऽयुः । अभिऽदासात् । एतत् । स । ऋच्छात् ॥६॥

हे **अश्मवर्म** ! **ऊर्ध्वायाः दिशः** 'अथैतदन्तरिक्षम् (ऊर्ध्वा दिक्), एषा हि दिक् बृहस्पतेः' इति शतपथब्राह्मणम् (२।३।४।३६) अन्तरिक्षलोकात् । शेषं पूर्ववत् ।

अश्मवर्म मेसि यो मा दिशामन्तर्देशेभ्योऽघायुरभिदासात् ।
एतत् स ऋच्छात् ॥७॥

पदपाठः

अश्मऽवम । मे । असि । यः । मा । दिशाम् । अन्तःऽदेशेभ्यः । अघऽयुः । अभिऽदासात् । एतत् । सः । ऋच्छात् ॥७॥

हे **अश्मवर्म** ! **दिशामन्तर्देशेभ्यः** पूर्वपश्चिमादिदिग्देशानां मध्यवर्त्तिभागेभ्यः । शेषं पूर्ववत् ।

बृहता मन उपह्वये मातरिश्वना प्राणापानौ ।
सूर्याच्चक्षुरन्तरिक्षाच्छ्रोत्रं पृथिव्याः शरीरम् ।
सरस्वत्या वाचमुपह्वयामहे मनोयुजा ॥८॥

पदपाठः

बृहता । मनः । उप । ह्वये । मातरिश्वना । प्राणापानौ । सूर्यात् । चक्षुः । अन्तरिक्षात् । श्रोत्रम् । पृथिव्याः । शरीरम् । सरस्वत्याः । वाचम । उप । ह्वयामहे । मनःऽयुजा ॥८॥

बृहता 'बृहद्वै स्वर्गो लोकः' (तै. ब्रा. १।२।२।४) इति श्रुतेः स्वर्गलोकद्वारा, यद्वा बृहता वर्धनशीलेन चन्द्रमसा अहं **मनः** मनसः अधिष्ठात्री देवताम् **उपह्वये** आह्वयामि । **मातरिश्वना** 'अयं वै मातरिश्वा योऽयं पवते' (श. ६।४।३।४) इति ब्राह्मणवाक्यात् वायुना **प्राणापानौ** श्वासोच्छ्वासौ आह्वये, पवनदेवानुग्रहेण मे श्वासोच्छ्वासप्रक्रिया न नश्येदित्यर्थः । **सूर्यात् चक्षुः** सूर्यतः चक्षुषोः ज्योतिः आमन्त्रये, **अन्तरिक्षात्** मध्यमात् लोकात् **श्रोत्रं** श्रवणशक्तिम् आह्वयामि, **पृथिव्याः** भूलोकात् **शरीरं** पाञ्चभौतिकं वपुः आह्वये, **मनोयुजा** मनःशक्तियुक्तया **सरस्वत्या वाचम्-**

धिष्ठात्र्या देवतया वाचं वाक्सामर्थ्यम् उपह्वयामहे आह्वयामः । एताः सर्वाः देवताः तत्तदिन्द्रियादिसामर्थ्यं याचामहे-इत्यर्थः ।

इति द्वितीयोऽनुवाकः ।

एकादशं सूक्तम्

एकादशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । वरुणो देवता । प्रथमर्चो भुरिक् त्रिष्टुप्, द्वितीया-चतुर्थी-पञ्चमीनां सप्तम्यादिचतसृणाञ्च त्रिष्टुप्, तृतीयायाः पङ्क्तिः, षष्ठ्याः पञ्चपदातिशक्वरी, एकादश्याश्च त्र्यवसाना षट्पदात्यष्टिश्छन्दांसि ।

सर्वसम्पत्कर्मसु 'कथं महे' इति सूक्तेन मादानककाष्ठशृतं क्षीरौदनं सम्पात्य अभिमन्त्र्य अश्नाति ।

तथा तत्रैव अनेन सूक्तेन चमसे सरूपवत्साया दुग्धे व्रीहियवावधाय मूर्छयित्वा मध्वासिच्य सम्पात्याभिमन्त्र्य आशयति । तद् उक्तं कौशिकेन – "कथं महे' इति मादानकशृतं क्षीरौदनमश्नाति । चमसे सरूपवत्साया दुग्धे व्रीहियवावधाय मूर्छयित्वा मध्वासिच्याशयति" (कौ. सू. १२।१,२) इति । मूर्छयित्वा चूर्णीकृत्येत्यर्थः ।

कथं महे असुरायाब्रवीरिह
कथं पित्रे हरये त्वेषनृम्णः ।
पृश्निं वरुण दक्षिणां ददावान्
पुनर्मघ त्वं मनसाचिकित्सीः ॥१॥

पदपाठः

कथम् । महे । असुराय । अब्रवीः । इह । कथम् । पित्रे । हरये । त्वेषऽनृम्णः । पृश्निम् । वरुण । दक्षिणाम् । ददावान् । पुनःऽमघ । त्वम् । मनसा । अचिकित्सीः ॥१॥

अत्राख्यानं श्रूयते । पूर्वं कदाचिद् वरुणो यज्ञदक्षिणायाम् अथर्वमहर्षये पृश्निं गां दत्वाऽपि पुनस्तां प्रतिग्रहीतुमैच्छत् । परन्तु महर्षिरथर्वा वरुणं न तथाकर्तुं प्रार्थितवान् । सूक्तेऽस्मिन् द्वयोरेतयोः स एव संवादो विद्यते–– अथर्वा प्रार्थयते हे वरुण ! त्वं पूर्वं महे महते असुराय असून् प्राणान् राति ददाति इत्यसुरः । असूपपदात् रा धातोः,कः प्रत्ययः । यद्वा असुषु प्राणेषु रतः इत्यसुरः, तस्मै बलिष्ठायेत्यर्थः । बलशालित्वादेवाग्निम् असुरं व्याचष्टे भगवान् तित्तिरिः "त्वमग्ने रुद्रो असुरो महो दिवः" (तै. ब्रा. ३।११।२।१) इति । प्रभूतबलशालिनो देवस्य प्रीतये इत्यर्थः । इह कथमब्रवीः यज्ञेऽत्र पूर्वं त्वं किमकथयः ? एतदेव पुनः समर्थ्यते–– इह यज्ञे त्वेषनृम्णः त्वेषं तेजोयुक्तं नृम्णं बलं धनं वा यस्य सः । त्वेषः, त्विष दीप्तौ धातोर्भावे

घञ् । कर्त्तरि अच् प्रत्ययः । नृम्णः इत्यत्र 'नृ' इत्युपपदे म्ना अभ्यासे (भ्वा.) धातोर्घञर्थे कः प्रत्ययः । नृम्णं बलमिति निघण्टुः (२।९), धननामेत्यपि निघण्टुः (२।१०), महति सामर्थ्येऽपि पित्रे लोकपालकाय हरये सूर्याय कथं किमकथयः ? हे **पुनर्मघ** मघमिति धननाम (निघ. २।१०) पुनः पुनः मघदानशील हे वरुण ! यद्वा दत्तं धनं पुनः प्रतिप्राप्तुं कृताभिलाष वरुण ! त्वं तु पूर्वं मह्यं **पृश्निं** गां **दक्षिणां** यज्ञदक्षिणायां ददावान् अददाः, अतः कथं तां नेतुमिच्छसि ? त्वं **मनसा** हृदयेन **अचिकित्सीः** आत्मनः चिकित्सां कुरु । लकारव्यत्ययश्छान्दसः । दक्षिणायां प्रदत्तं वस्तु न त्वया प्रतिग्रहीतव्यमित्यर्थः ।

न कामेन पुनर्मघो भवामि
सं चक्षे कं पृश्निमेतामुपाजे ।
केन नु त्वमथर्वन् काव्येन
केन जातेनासि जातवेदाः ॥२॥

पदपाठः

न । कामेन । पुनःऽमघः । भवामि । सम् । चक्षे । कम् । पृश्निम् । एताम् । उप । अजे । केन । नु । त्वम् । अथर्वन् । काव्येन । केन । जातेन । असि । जातऽवेदाः ॥२॥

वरुणः प्रत्युत्तरयति—अहं **कामेन** वृथाभिलाषेण **पुनर्मघः** प्रदत्तस्य गोधनस्य पुनः प्रतिग्रहीता **न भवामि**, किन्तु **पृश्निं** गाम् **एतां** त्वां परीक्षितुम् **उपाजे** अत्र समीपे समानयम् । उप+आङ् पूर्वकादजगतिक्षेपणयोर्धातोर्लट् । इत्यहं त्वां **कं** सुखपूर्वकं **सं चक्षे** कथयामि । चक्षिङ् व्यक्तायां वाचि धातोर्लट् । त्वां परीक्षितुमेतत् करोमीत्यर्थः ! हे **अथर्वन्** ! **केन काव्येन नु** 'त्रयी वै विद्या काव्यम्' (श. ८।५।२।४) इति श्रुतेः कया त्रयीविद्यया, केषां वेदानामध्ययनेनेत्यर्थः, यद्वा **केन जातेन** च केन जायमानेन ज्ञानेन च त्वं **जातवेदाः** जातप्रज्ञः अभवः । कथं त्वयीदृशं ज्ञानं समुत्पन्नमिति वरुणप्रश्नस्याभिप्रायः ।

सत्यमहं गभीरः काव्येन
सत्यं जातेनास्मि जातवेदाः ।
न मे दासो नार्यो महित्वा
व्रतं मीमाय यदहं धरिष्ये ॥३॥

पदपाठः

सत्यम् । अहम् । गभीरः । काव्येन । सत्यम् । जातेन । अस्मि । जातऽवेदाः । न । मे । दासः । न । आर्यः । महिऽत्वा । व्रतम् । मीमाय । यत् । अहम् । धरिष्ये ॥३॥

अथर्वा ब्रवीति--हे वरुण ! सत्यमहं निश्चप्रचमहमथर्वा काव्येन त्रयीविद्या-प्रभावेण गभीरः गहनज्ञानशील:, अस्मीति शेषः। तथेदमपि सत्यं तथ्यमेव यदहं जातेन अनुष्ठितेन यज्ञादिकर्मणा जातवेदाः अस्मि उत्पन्नप्रज्ञोऽस्मीत्यर्थः। अत एव यदहम् अवितथज्ञानशीलः अथर्वा धरिष्ये यद् व्रतादिकं स्वीकुर्वे तन्मे व्रतं न दासः सेवको जनः। दासः, 'दस्यतेरुपदासयति कर्माणि' इति निरुक्तम् (२।१७)। यद्वा दासतिर्दानकर्मा (निघं. ३।२०) दानी जनः, न च आर्यः श्रेष्ठः अन्यः कश्चन पुरुषः महित्वा आत्ममहिम्ना सामर्थ्येनेत्यर्थः। मीमाय नष्टं कर्त्तुं समर्थः। मीञ् हिंसायां धातोर्लिट्।

न त्वदन्यः कवितरो न मेधया
धीरतरो वरुण स्वधावन्।
त्वं ता विश्वा भुवनानि वेत्थ
स चिन्नु त्वज्जनो मायी बिभाय ॥४॥

पदपाठः

न। त्वत्। अन्यः। कविऽतरः। न। मेधया। धीरऽतरः। वरुण। स्वधाऽवन्। त्वम्। ता। विश्वा। भुवनानि। वेत्थ। सः। चित्। नु। त्वत्। जनः। मायी। बिभाय ॥४॥

आत्मश्लाघां परिहरन्नथर्वा वक्ति–हे वरुण ! यद्यप्यहं गभीरो जातप्रज्ञश्चास्मि तथा मे व्रतमपि भङ्क्तुं न कश्चन समर्थस्तथापि त्वदन्यः त्वदतिरिक्तो न कश्चन कवितरः क्रान्तदर्शी विद्वान् विद्यते, मेधया बुद्ध्याऽपि धीरतरः न, 'धीरः' इति मेधाविनो नाम। (निघ. ३।१५), डुधाञ् धारणपोषणयोर्धातोः 'सुसूधाञ्गृधिभ्यः क्रन्' (उ. २।२४) इति क्रन् प्रत्ययः। मेधावी न वर्त्तते। स्वधावन् हे अन्नपते ! वरुण ! त्वं तु ताः तानि विश्वा समस्तानि भुवनानि जगन्ति तद्वासिनां लोकानां-कार्याणीत्यर्थः, वेत्थ जानासि। स मायी असौ कश्चन छली दुष्टः, मायाशब्दात् निन्दार्थे इनिः। अपि त्वत् चित् त्वत्तः बिभाय बिभेति।

त्वं ह्यङ्ग वरुण स्वधावन्
विश्वा वेत्थ जनिमा सुप्रणीते।
किं रजस एना परो अन्य--
दस्त्येना किं परेणावरममुर ॥५॥

पदपाठः

त्वम्। हि। अङ्ग। वरुण। स्वधाऽवन्। विश्वा। वेत्थ। जनिम। सुऽप्रनीते। किम्। रजसः। एना। परः। अन्यत्। अस्ति। एना। किम्। परेण। अवरम्। असुर ॥५॥

स्वधावन्. स्वोपपदात् डुधाञ् धारणपोषणयोर्धातोरत्र क्विप् सम्पदादित्वात्। अथवा ष्वद आस्वादने धातोर्बाहुलकाद् औणादिक आप्रत्ययः, धातोर्दस्य धः। स्वधेत्यन्ननाम (निघ० २।७) उदकनाम च (निघ० १।१२)। हे प्रभूतान्नशालिन्! यद्वा जलशालिन्! जलपते वरुण! त्वं हि आतमप्रभावेण निश्चप्रचं **विश्वा जनिमा** समस्तानां जन्मग्रहण कुर्वतां लोकानां कर्माणि उत्पत्तिं वा **वेत्थ** जानासि। **असुर** हे अमरणशील! यद्वा हे अमूढ! हे बुद्धिमन्! **एना रजसः परः** अस्माल्लोकात् परस्तात् ऊर्ध्वमित्यर्थः, **अन्यत् किमस्ति** अपरं किं वस्तु विर्त्तते तथा **एना परेण अवरम्** अस्मात् परं नीचैः किं वस्तु विद्यते, **सुप्रणीते** शोभना प्रकृष्टा नीतिर्यस्य सः, तत्सम्बुद्धौ हे सुन्दर नीतिसञ्चालक! तदपि सर्वं त्वं वेत्सि। अतो निश्चयेन त्वं महानसि।

एकं रजस एना परो अन्यदस्त्येना
पर एकेन दुर्णशं चिदर्वाक्।
तत् ते विद्वान् वरुण प्र ब्रवीम्यधो-
वचसः पणयो भवन्तु नीचैर्दासा
उप सर्पन्तु भूमिम् ॥६॥

पदपाठः

एकम्। रजसः। एना। परः। अन्यत्। अस्ति। एना। परः। एकेन। दुःऽनशम्। चित्। अर्वाक्। तत्। ते। विद्वान्। वरुण। प्र। ब्रवीमि। अधःऽवचसः। पणयः। भवन्तु। नीचैः। दासाः। उप। सर्पन्तु। भूमिम् ॥६॥

एना रजसः परः अस्मात् लोकात् परस्तात्, **एकमन्यदपि** जगदस्ति। इदमेवोद्दिश्य काठकसंहितायामुक्तं महर्षिणा 'पराङ ह्यसौ लोकोऽनिरुक्तः, (२६।१) इति। **एकेन एनः** अस्मादेकस्मात् **परः** परस्तात् **अर्वाक् चित्** नीचैः **दुर्णशं**, नशद् व्याप्तिकर्मेति निघण्टुकारः (२।१८)। दुः दुःखं व्याप्तं यत्र तादृशं विद्यते। भवति चात्र ब्राह्मणम्-'यद्वा अर्वाचीनं विषुवतस्तदयं (पृथिवीलोकः), (जै. ब्रा. २।३४) इति। भूलोको हि क्लेशबहुलः इति सार्वजनीनम्। हे **वरुण**? **तदहं विद्वान्** जानानः **त्वां प्रब्रवीमि** कथयामि। साम्प्रतमिदमस्ति पृथग् वाक्यम्। **पणयः**, 'पणिः पणनात्' इति निरुक्तम् (२।१७), 'पणीन् वणिजः' इत्यपि तत्रैव व्याचष्टे यास्कः (नि. ६।२७)। **पण** व्यवहारे स्तुतौ च इत्यस्मात् धातोरौणादिकः इन् प्रत्ययः। जैमिनीयब्राह्मणं तु पणीन् असुरान् मनुते। यथा चोक्तं तत्रैव-'अथ ह वै पणयो नामासुरा देवानां गोरक्षा आसुः' (जै० २।४४०) इति। सायणस्तु नानारूपेण व्याचख्यौ शब्दमिमम्- 'पणिः व्यवहारी' (ऋ. १।३३।३), 'पणिः अयष्टा' (ऋ. १।१८४।२), 'पणिः

व्यवासहिष्णुः कृपणो वणिक्' (ऋ. १।१२४।१०), 'पणिः असुरः (ऋ. १।१५२।६) इति च। ईदृग्विधास्ते पणयः अधोवचसो भवन्तु नीचैर्मुखा जायन्ताम्। असाफल्यं लभमानास्ते नम्रवचनान्युच्चारयेयुरित्यर्थः। एवमेव दासाः कर्मकराः शूद्राः (ऋ. १०।३८।३ इति सायणः) भूमिं भूलोकं प्रति नीचैः उपसर्पन्तु अधस्ताद् भूलोकं गच्छन्तु इत्यर्थः।

त्वं ह्यङ्ग वरुण ब्रवीषि
पुनर्मघेष्ववद्यानि भूरि।
मो षु पणींरभ्येतावतो
भून्मा त्वा वोचन्नराधसं जनासः ॥७॥

पदपाठः

त्वम्। हि। अङ्ग। वरुण। ब्रवीषि। पुनःऽमघेषु। अवद्यानि। भूरि। मो इति। सु। पणीन्। अभि। एतावतः। भूत्। मा। त्वा। वोचन्। अराधसम्। जनासः ॥७॥

अथर्वा ब्रूते—अंग वरुण हे वरुणदेव! त्वं हि त्वमेव सदा **पुनर्मघेषु** प्रदत्तधनानां प्रतिग्रहणविषयेषु भूरि अनेकानि **अवद्यानि** निन्दनीयानि पापानि **ब्रवीषि** कथयसि। अतः साम्प्रतम् एतावतः **पणीन्** ईदृशान् पणीन् कृपणवणिजः मा उ सु अभिभूत् अभिमुखो मा भव, तान् मा अनुकुरुष्वेत्यर्थः। येन जनासः लोकाः त्वां वरुणम् अराधसम् अदातारम् अनाराधनीयं वा मा वोचन् न कथयेयुः।

मा मा वोचन्नराधसं जनासः
पुनस्ते पृश्निं जरितर्ददामि।
स्तोत्रं मे विश्वमा याहि
शचीभिरन्तर्विश्वासु मानुषीषु दिक्षु ॥८॥

पदपाठः

मा। मा। वोचन्। अराधसम्। जनासः। पुनः। ते। पृश्निम्। जरितः। ददामि। स्तोत्रम्। मे। विश्वम्। आ। याहि। शचीभिः। विश्वासु। मानुषीषु। दिक्षु ॥८॥

वरुणोक्तिरियम्। हे महर्षे! जनासः लोकाः मा मां साम्प्रतम् **अराधसम्** अदातारम् अनाराधनीयं वा **मा वोचन्** न वदेयुः। जनासः इत्यत्र जनशब्दात् प्रथमैकबहुवचने जसोऽसुगागमः। अतोऽहं जरितः जरते अर्चतिकर्मेति निघण्टुः (३।१४)

हे प्रशंसक महर्षे ! ते तुभ्यं पुनः भूयः पृश्निं गां ददामि प्रयच्छामि । एवं कृते त्वं शचीभिः स्वशक्तिभिः स्वरचितवेदमन्त्रगाथाभिरित्यर्थः, विश्वासु निखिलासु मानुषीषु मानवीयप्रजासु दिक्षु अन्तः सर्वत्र दिग्भागेषु च मे मम वरुणस्य विश्वंस्तोत्रं समस्तस्तुतिजातम् आयाहि सम्यक् नय, प्रकाशयेत्यर्थः ।

आ ते स्तोत्राण्युद्यतानि यन्त्वन्त
विश्वासु मानुषीषु दिक्षु ।
देहि नु मे यन्मे अदत्तो असि
युज्यो मे सप्तपदः सखासि ॥९॥

पदपाठः

आ । ते । स्तोत्राणि । उत्ऽयतानि । यन्तु । अन्तः । विश्वासु । मानुषीषु । दिक्षु । देहि । नु । मे । यत् । मे । अदत्तः । असि । युज्यः । मे । सप्तऽपदः । सखा । असि ॥९॥

अथर्वा ब्रवीति-- हे वरुण ! ते तुभ्यम् उद्यतानि उद्गीतानि स्तोत्राणि मन्त्रवाक्यानि विश्वासु समस्तासु मानुषीषु दिक्षु अन्तः मानवीयासु दिशासु आयन्तु प्रसरन्तु । किन्तु यन्मे यत् किमपि मह्यम् अदत्तः न दत्तवानसि तत् नु क्षिप्रं मे मह्यं देहि प्रयच्छ । यतस्त्वं साम्प्रतं मे मम सप्तपदः साप्तपदीनः युज्यः योक्तुमर्हः सखा सुहृद् असि भवसि, सञ्जातोऽसीत्यर्थः । युज्यः इत्यत्र युजिर् योगे धातोः औणादिकः क्यप् प्रत्ययः । यद्वा युजिर् धातोः कर्त्तरि क्विपि युज्, ततो भवार्थे यत् ।

समा नौ बन्धुर्वरुण समाजा
वेदाहं तद्यन्नावेषा समा जा ।
ददामि तद्यत् ते अदत्तो अस्मि
युज्यस्ते सप्तपदः सखास्मि ॥१०॥

पदपाठः

समा । नौ । बन्धुः । वरुण । समा । जा । वेद । अहम् । तत् । यत् । नौ । एषा । समा । जा । ददामि । तत् । यत् । ते । अदत्तः । अस्मि । युज्यः । ते । सप्तऽपदः । सखा । अस्मि ॥१०॥

हे वरुण ! सम्प्रति नौ आवां समा बन्धुः समानो बन्धुभूतो स्वः । जा 'जा अपत्यम्' इति यास्कः (निरु. ६।९) । जनी प्रादुर्भावे धातोः 'अन्येष्वपि दृश्यते' इति डः प्रत्ययः । जन्म, जनिरित्यर्थः समा समानमेव । अहं तद् वेद तत्कारणं जानाम्यहं यत् यस्मात् कारणात् नौ आवयोः समा समाना जा उत्पत्तिरस्ति । इतोऽग्रे वरुणस्य वाक्यम्- हे महर्षे ! यत यद्वस्तु ते तुभ्यं महर्षये अदत्तः न दत्तवानस्मि तत् तद्वस्तु

ददामि तुभ्यं प्रयच्छामि । यतः साम्प्रतमहं ते तव युज्यः योक्तुमर्हः त्वत्सहावस्थितो वा अस्मि वर्त्ते । अहमिदानीं त्वदीयः सप्तपदः साप्तपदीनः सखा अस्मि सुहृदस्मि । अत एवामनन्ति तैत्तिरीयाः 'सखायः सप्तपदा अभूम' (तै. ब्रा. ३।७।७।११) इति ।

देवो देवाय गृणते वयोधा
विप्रो विप्राय स्तुवते सुमेधाः ।
अजीजनो हि वरुण स्वधाव-
न्नथर्वाणं पितरं देवबन्धुम् ।
तस्मा उ राधः कृणुहि सुप्रशस्तं
सखा नो असि परमं च बन्धुः ॥११॥

पदपाठः

देवः । देवाय । गृणते । वयःऽधाः । विप्रः । विप्राय । स्तुवते । सुऽमेधाः । अजीजनः । हि । वरुण । स्वधाऽवन् । अथर्वाणम् । पितरम् । देवऽबन्धुम् । तस्मै । ऊ इति । राधः । कृणुहि । सुऽप्रशस्तम् । सखा । नः । असि । परमम् । च । बन्धुः ॥११॥

अथर्वा वरुणं ब्रूते-- **वयोधाः** अन्नप्रदाता, यद्वा प्राणप्रदाता 'प्राणो वै वयः' इति ऐतरेयोक्तेः (१।२८) **देवः** द्योतमानः स्वामी प्रभुरित्यर्थः, **गृणते** स्तुतिं कुर्वते **विप्राय** महर्षये 'एते वै विप्रा यद् ऋषयः' (श. १।४।२।७) इति श्रुतेः, अभीष्टं प्रयच्छतीति शेषः । एवमेव **सुमेधाः** शोभनबुद्धिमान् **विप्रः** महर्षिरपि **स्तुवते** स्तवन कुर्वते, यद्वा संस्तुताय **देवाय** स्वामिने, सर्वस्वं समर्पयति– इति शेषः । अतो **हि** हे **स्वधावन्** अन्नपते ! जलपते ! वा **वरुण** ! त्वं **देवबन्धुं** देवानां बन्धुभूतम् **अथर्वाणं** मामृषिं **पितरं** पाति रक्षतीति पिता तम्, पिता पाता वा पालयितेति निरुक्तम् (४।२१) । पितृवत् पालननिमित्तम् । पा रक्षणे धातोः 'नप्तृनेष्टृत्वष्टृ०' (उ. २।९५) इत्यनेन तृजन्तो निपात्यते । 'यद्वा प्राणो वै पिता' (ऐ. ब्रा. २।३८) प्राणस्वरूपम्, आत्मीयमित्यर्थः **अजीजनः** अजनयः, अकरोः इत्यर्थः । यद्वा हे **वरुण** ! त्वमथर्वाणम् अथर्वज्ञातारं मां पालयितारमकरोः । तस्मादेव **तस्मै उ** तन्महर्षये मह्यं **सुप्रशस्तं** शोभनप्रशंसायोग्यं **राधः** धनं **कृणुहि** कुरु, देहीत्यर्थः । यतः त्वं **नः** अस्माकं **सखा** समानं ख्यातीति विग्रहे समानोपपदात् ख्या प्रकथने धातोः 'समाने ख्यः स चोदात्तः' (उ. ४।१३७) इतीण् प्रत्यये यलोपे समानस्य च 'समानस्य छन्दसि०' इति सादेशे सखिरूपम् । 'सखायः समानाख्यानाः' इति यास्कः (निरु. ७।३०) । मित्रभूतः **परमं** महान्, अन्तरङ्गः इत्यर्थः, **बन्धुश्च** भ्रातृवत् हितकरः प्रेमबद्धो वा, यद्वा बन्धुरिति धननाम (निघ. २।१०) परमं धनम् **असि** । बन्धुरित्यत्र प्रेम्णा बध्नातीति विग्रहे बन्ध बन्धने क्र्या.) धातोः 'शृस्वृस्निहि०' (उ. १।१०) इति उप्रत्ययः

□

द्वादशं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य अङ्गिरा ऋषिः। जातवेदा अग्निर्देवता प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्याद्यष्टानाञ्च त्रिष्टुप्, तृतीयायाश्च पङ्क्तिश्छन्दसी।

वशाशमनकर्मणि वपायाश्चत्वारि खण्डानि कृत्वा 'समिद्धो अद्य' इति सूक्तेनैकं खण्डं जुहोति। 'ऊर्ध्वा अस्य' इति सूक्तेन द्वितीय खण्डं जुहोति। युक्ताभ्यां सूक्ताभ्यां तृतीयं खण्डम्। 'अनुमतये स्वाहा' (कौ. सू. ४५।१६) इति चतुर्थं खण्डं जुहोति। तथा च सूत्रम्--"समिद्धः', 'ऊर्ध्वा अस्य' इति जुहोति। युक्ताभ्यां तृतीयम्, आनुमतीं चतुर्थीम्" (कौ. सू. ४५।८-१०) इति।

समिद्धो अद्य मनुषो दुरोणे देवो देवान् यजसि जातवेदः।
आ च वह मित्रमहश्चिकित्वान् त्वं दूतः कविरसि प्रचेताः ॥१॥

पदपाठः

सम्ऽइद्धः। अद्य। मनुषः। दुरोणे। देवः। देवान्। यजसि। जातऽवेदः। आ। च। वह। मित्रऽमहः। चिकित्वान्। त्वम्। दूतः। कविः। असि। प्रऽचेताः ॥१॥

हे **जातवेदः** जातप्रज्ञाग्ने ! **देवः** स्वतेजसा दीप्यमानस्त्वं **मनुषः** मनुष्यस्य यष्टुः **दुरोणे**। गृहनामैतत्। दुरवने आयासेन रक्षितव्ये गृहे **अद्य** अस्मिन् कर्मणि **समिद्धः** सम्यक् प्रज्वालितः सन् **देवान्** इन्द्रादीन् **यजसि**। हविर्भिः पूजय। समिद्धः। 'इन्धी दीप्तौ।' कर्मणि क्ते 'श्वीदितो निष्ठायाम्' इतीट्प्रतिषेधः। 'गतिरनन्तरः' इति गतेः प्रकृतिस्वरत्वम्। हे **मित्रमहः** स्तुत्यस्तोतृलक्षणत्वेन मित्रभूतानां स्तोतृजनानां पूजयितः ! तैः पूज्यमान वाऽग्ने ! **चिकित्वान्** तैः कृताः स्तुतीः प्रजानन् चेतनावान् वा **त्वम्** अस्मदीये यज्ञे देवान् **आ वह च**। आप्रापय। वह प्रापणे लोटि रूपम्। तथा **कविः** क्रान्तप्रज्ञः अत एव **प्रचेताः** प्रकृष्टज्ञानः त्वं **दूतः** देवानां हविष्प्रापणेन हितकारी भवसि। ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (१०।११०।१)।

तनूनपात्पथ ऋतस्य यानान्मध्वा समञ्जन्त्स्वदया सुजिह्व।
मन्मानि धीभिरुत यज्ञमृन्धन् देवत्रा च कृणुह्यध्वरं नः ॥२॥

पदपाठः

तनूऽनपात्। पथः। ऋतस्य। यानान्। मध्वा। सम्ऽअञ्जन्। स्वदय। सुऽजिह्व। मन्मानि। धीभिः। उत। यज्ञम्। ऋन्धन्। देवऽत्रा। च। कृणुहि। अध्वरम्। नः ॥२॥

हे **तनूनपात्** ! नपादित्यनन्तरापत्यनामधेयम् । गौरत्र तनूरुच्यते तता अस्यां भोगाः क्षीरादय इति । तस्याः पयो जायते पयस आज्यं तस्मादग्निः । यद्वा अन्तरिक्षे तता आपस्तन्वः ताभ्यः ओषध्यादयः तेभ्योऽग्निरिति । एवंरूप हे **सुजिह्व** शोभन-ज्वाल ! यद्वा जिह्वेति वाङ्नाम । शोभनवागग्ने ! **ऋतस्य** यज्ञस्य **यानान्** फल-प्राप्तिहेतून् **पथः** मार्गान् हविराख्यान् **मध्वा** मदकरेण रसेन यद्वा वाग्जनितेन रसेन **समञ्जन्** सम्यग्दीपयन् **स्वदय** स्वादय । स्वादूकुरु, 'स्वद आस्वादने' णिच्युपधा-वृद्ध्यभावश्छान्दसः । किञ्च **मन्मानि** । मन्यतेरर्चतिकर्मणः । मननीयानि अस्मदभिप्रेतानि स्तोत्राणि **धीभिः** प्रज्ञाभिः कर्मभिर्वा **उत** अपि च **यज्ञं** यजनीयं हविश्च **ऋन्धन्** समृद्धानि कुर्वन् **नः** अस्मदीयम् **अध्वरं** यज्ञं **देवत्रा** देवेषु **कृणुहि** कुरु । देवशब्दात् 'देवमनुष्य.' इत्यादिना सप्तम्यर्थे त्राप्रत्ययः । ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १।११०।३) ।

आजुह्वान ईड्यो वन्द्यश्चा याह्यग्ने वसुभिः सजोषाः ।
त्वं देवानामसि यह्व होता स एनान् यक्षीषितो यजीयान् ।।३।।

पदपाठः

आऽजुह्वानः । इड्यः । वन्द्यः । च । आ । याहि । अग्ने । वसुऽभिः । सऽजोषाः । त्वम् । देवानाम् । असि । यह्व । होता । सः । एनान् । यक्षि । इषितः । यजीयान् ।।३।।

हे **अग्ने** ! त्वमस्मत्कर्मणि **आ याहि** आगच्छ । कीदृशः ? **आजुह्वानः** देवानामाह्वाता । 'हु दानादानयोः' जौहोत्यादिकः, **ईड्यः** ईडिरध्येषणाकर्मा । अध्येष्यः प्रार्थ्यमानः, **वन्द्यः** स्तोतव्यः **वसुभिः** देवैः **सजोषाः** सह प्रीयमाणः । आगत्य च हे **यह्व** ! महन्नामैतत् हे महन् ! सः त्वं देवानां **होता** आह्वाता **असि** । ततः **यजीयान्** यष्टृशब्दीयसुनि 'तुरिष्ठेमेयःसु' इति तृचो लोपः । यष्टृतरः, **सः** त्वम् **इषितः** अस्माभिरध्येषितः प्रार्थितः सन् **एनान्** देवान् **यक्षि** यज हविषा पूजय ।

प्राचीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नाम् ।
व्युप्रथते वितरं वरीयो देवेभ्यो अदितये स्योनम् ।।४।।

पदपाठः

प्राचीनम् । वर्हिः । प्रऽदिशा । पृथिव्याः । वस्तोः । अस्याः । वृज्यते । अग्रे । अह्नाम् । वि । ऊं इति । प्रथते । विऽतरम् । वरीयः । देवेभ्यः । अदितये । स्योनम् ।।४।।

यदिदं **प्राचीनं** प्रागञ्चितं प्राङ्मुखं **बर्हिः** ग्रस्ति तदिदं **पृथिव्याः** वेदिलक्षणायाः **वस्तोः** वस ग्राच्छादने तुन्प्रत्ययः । 'चतुर्थ्यर्थे बहुलं छन्दसि' इति षष्ठी । यद्वा भावलक्षणे तोसुन् द्रष्टव्यः । वसनायाच्छादनार्थम् **ग्रह्नाम् ग्रग्रे** पूर्वाह्णे **प्रदिशा** प्रकर्षेण दिश्यमानेन मन्त्रेण **प्रदयाः** प्राच्या दिशः **वृज्यते** स्तूयते ग्राह्रियते । तथा च निगमः– 'त ग्रा वहन्ति कवयः पुरस्तात्' (तै. सं. १.१.२.१) इत्यादि । तच्चाहृतं **वरीयः** उरुतरं बर्हिः **वितरं** विस्तीर्णतरं यथा भवति तथा **वि प्रथते** । विविधमेव वेद्यां प्रस्तृतं भवति । तथा **देवेभ्यः ग्रदितये** वेदिलक्षणायै पृथिव्यै च **स्योनं** सुखकरं भवति । विस्तीर्णे बर्हिषि देवाः सुखं निषीदन्ति । ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ १०।११०।४) ।

व्यचस्वतीरुर्विया वि श्रयन्तां
पतिभ्यो न जनयः शुम्भमानाः ।
देवीर्द्वारो बृहतीर्विश्वमिन्वा
देवेभ्यो भवत सुप्रायणाः ॥५॥

पदपाठः

व्यचस्वतीः । उर्विया । वि । श्रयन्ताम् । पतिभ्यः । न । जनयः । शुम्भमानाः । देवीः । द्वारः । बृहतीः । विश्वम्ऽइन्वाः । देवेभ्यः । भवत । सुऽप्रायनाः ॥५॥

व्यचस्वतीः व्यचो व्यापनम्, तद्वत्यः । 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । ता द्वारदेवताः **उर्विया** उरुशब्दात्तृतीयैकवचने 'इयाडियाजीकाराणामुपसङ्ख्यानम्' (पा. सू वा. ७.१.३९.१) इतीयादेशः । उरुत्वेन **विश्रयन्तां** विशेषेणाश्रिता भवन्तु । तत्र दृष्टान्तः । **पतिभ्यो न** यथा पतीनामर्थाय सम्भोगकाले **शुम्भमानाः** शोभमानाः **जनयः** जाया विश्रयन्ति तद्वदस्मिन् कर्मणि विश्रयन्ताम् । हे **बृहतीः** ! महत्यो हे **विश्वामिन्वाः** ! इवि: प्रीणनार्थः । तस्मात् कर्मण्युपपदे ग्रण् । इदित्त्वान्नुम् । 'तत्पुरुषकृतिबहुलम्' इत्यत्र बहुलवचनात् द्वितीयाया ग्रप्यलुक् । सर्वस्य प्रीणयित्र्यो हे **द्वारः** ! **देवीः** द्वाराभिमानिन्यो हे देव्यः ! यूयं **देवेभ्यः** देवानामर्थाय **सुप्रायणाः** सुप्रगमनाः सुविवृताः **भवत** । ऋग्वेदेऽपि पठ्यते ऋगियम् (ऋ. १०।११०।५)

ग्रा सुष्वयन्ती यजते उपाके
उषासानक्ता सदतां नि योनौ ।
दिव्ये योषणे बृहती सुरुक्मे
ग्रधि श्रियं शुक्रपिशं दधाने ॥६॥

पदपाठः

आ। सुस्वयन्ती इति। यजते इति। उपाके इति। उषसानक्ता। सदताम्। नि। योनौ। दिव्ये इति। योषणे इति। बृहती इति। सुरुक्मे इति सुऽरुक्मे। अधि। श्रियम्। शुक्रऽपिशम्। दधाने इति ॥६॥

सुस्वयन्ती 'अय पय गतौ'। शतर्युपसर्गस्य सोर्द्विर्वचनं छान्दसम्। सुष्ठु अयन्त्यौ गच्छन्त्यौ। यद्वा स्वपेर्ण्यन्तस्य वर्णलोपः। सुष्वापयन्त्यौ। **यजते** यष्टव्ये **उपाके** उपक्रान्ते **उषासानक्ता** उषाश्च नक्तं च। द्वन्द्वे 'उषासोषसः' (पा. सू. ६.३.३१) इत्युषासादेशः। अहोरात्रदेव्यौ **योनौ** अस्मिन् यज्ञस्थाने **नि** नितरां नियमेन वा **आ सदताम्** आसीदताम्। सदेर्लुङि लृदित्वाच्च्लेरङ्। कीदृश्यौ ? **दिव्ये** दिवि भवे **योषणे** योषिताविव प्रीणयित्र्यौ। यद्वा योषणे समिते परस्परतोऽविविक्ते। **बृहती** गुणैर्महत्यौ **सुरुक्मे** शोभनदीप्ते। रुक्मम्। रोचतेर्मक्प्रत्यये कुत्वे च कृते रूपम्। **शुक्रपिशं** शोचमानरूपां **श्रियम् अधि दधाने** अधिकं धारयन्त्यौ। ऋग्वेदेऽपि पठ्यते मन्त्रोऽयम् (ऋ. १६।११०।६)।

दैव्या होतारा प्रथमा सुवाचा
मिमाना यज्ञं मनुषो यजध्यै।
प्रचोदयन्ता विदथेषु कारू
प्राचीनं ज्योतिः प्रदिशा दिशन्ता ॥७॥

पदपाठः

दैव्या। होतारा। प्रथमा। सुऽवाचा। मिमाना। यज्ञम्। मनुषः। यजध्यै। प्रऽचोदयन्ता। विदथेषु। कारू इति। प्राचीनम्। ज्योतिः। प्रऽदिशो। दिशन्ता ॥७॥

दैव्या 'देवाद्यञञौ' इति वार्त्तिकेन यञ्प्रत्ययः। देवसम्बन्धिनौ **होतारा** होमनिष्पादकौ होतृनामकावग्न्यादित्यावस्मिन् यज्ञे आसीदताम्। कीदृशौ ? **प्रथमा** मनुष्यहोतुः पूर्वभाविनौ **सुवाचा** शोभनस्तोत्रौ, **मनुषः** मनुष्यस्य सर्वस्य यष्टुः **यजध्यै** यागनिवृत्तये। **यज्ञं मिमाना** निर्मिमानावुत्पादयन्तौ **विदथेषु** विदन्त्यत्रर्त्विजः स्वस्वकर्माणीति विदथा यज्ञाः, तेष्वृत्विजो यजमानांश्च **प्रचोदयन्ता** प्रेरयन्तौ **कारू** स्तुतीनां कर्त्तारौ **प्राचीनं** पूर्वस्यां दिशि यष्टव्यत्वेन स्थितमाहवनीयाख्यं **ज्योतिः** **प्रदिशा** प्रकृष्टेनोपदिष्टमार्गेण यद्वा प्रदिश्यमानेन मन्त्रेण **दिशन्ता** निर्वहन्तौ। ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ.१०।११०।७)

आ नो यज्ञं भारती तूयमेत्विडा
मनुष्वदिह चेतयन्ती ।
तिस्रो देवीर्बर्हिरेदं स्योनं
सरस्वतीः स्वपसः सदन्ताम् ॥८॥

पदपाठः

आ । नः । यज्ञम् । भारती । तूयम् । एतु । इडा । मनुष्वत् । इह । चेतयन्ती । तिस्रः । देवीः । बर्हिः । आ । इदम् । स्योनम् । सरस्वतीः । सुऽअपसः । सदन्ताम् ॥६॥

भारती भरत आदित्यः तस्य स्वभूता दीप्तिः । 'तस्येदम्' 'उत्सादिभ्योऽञ्' (पा. सू. ४।१।८६) इति अञ् । 'टिड्ढाणञ्०' इति ङीप् । **नः** अस्मदीयं **यज्ञं तूयं** क्षिप्रम् **आ एतु** आगच्छतु । तथा **मनुष्वत्** मनुष्यो यथा इदं मया कर्तव्यमिति जानाति तद्वत् **चेतयन्ती** जानाना **इडा** देवी च **इह** अस्मिन् कर्मण्यागच्छतु तथा **सरस्वतीः** च, सरस्वती देवी, अत्र विसर्गश्छान्दसः । अत एव ऋग्वेदे 'सरस्वती' इत्येव पाठो विद्यते । **स्वपसः** सुकर्माणः, सुकर्मकारिण्य इत्यर्थः । अप इति कर्मनाम । आप्नोतेरसुनि आपः कर्माख्यायां ह्रस्वः । एताः **तिस्रो देवीः** देव्यः **स्योनं** सुखकरम् **इदं बर्हिः** इमं यज्ञम् **आ सदन्ताम्** आसीदन्तु प्राप्नुवन्तु । स्वल्पेन पाठभेदेन मन्त्रोऽयम् ऋग्वेदेऽपि प्राप्यते (ऋ. १०।११०।८) ।

य इमे द्यावापृथिवी जनित्री
रूपैरपिंशद् भुवनानि विश्वा ।
तमद्य होतरिषितो यजीयान्
देवं त्वष्टारमिह यक्षि विद्वान् ॥९॥

पदपाठः

यः । इमे इति । द्यावापृथिवी इति । जनित्री इति । रूपैः । अपिंशत् । भुवनानि । विश्वा । तम् । अद्य । होतः । इषितः । यजीयान् । देवम् । त्वष्टारम् । इह । यक्षि । विद्वान् ॥९॥

यः त्वष्टा देवः **जनित्री** विश्वस्य जनयित्र्यौ **इमे द्यावापृथिवी** द्वन्द्वे 'दिवो द्यावा' (पा. ६।३।२९) इति द्यावादेशः । द्यावापृथिव्यौ **रूपैः** देवतिर्यङ्मनुष्याद्याकारैः **अपिंशत्** रूपवत्यावकरोत् । पिश अवयवे तौदादिकः । 'शे मुचादीनाम्' 'इति नुमागमः । तथा **विश्वा** सर्वाणि **भुवनानि** भूतजातानि रूपयुक्तान्यकरोत् हे **होतः** ? **यजीयान्** यष्टृतमः. **विद्वान्** सर्वं जानानः त्वम् **इषितः** अस्माभिरध्येषितः प्रार्थितः सन् **इह** अस्मिन् कर्मणि **अद्य** अस्मिन् दिने **तं त्वष्टारं देवं यक्षि** । स्तुतिभिर्हविर्भिर्वा यज पूजय । ऋग्वेदेऽपि पठ्यते ऋगियम् (ऋ. १०।११०।९) ।

उपावसृज त्मन्या समञ्जन्
देवानां पाथ ऋतुथा हवींषि ।
वनस्पतिः शमिता देवो अग्निः
स्वदन्तु हव्यं मधुना घृतेन ।।१०।।

पदपाठः

उपऽअवसृज । त्मन्या । सम्ऽअञ्जन् । देवानाम् पाथः । ऋतुऽथा । हवींषि । वनस्पतिः । शमिता । देवः । अग्निः । स्वदन्तु । हव्यम् । मधुना । घृतेन ।।१०।।

हे वनस्पते यूप ! त्मन्या आत्मन्निति शब्दस्य तृतीयैकवचने यादेशः । 'मन्त्रेष्वाङ्यादेरात्मनः' (पा. ६।४।१४१) इत्याकारलोपः । आत्मनैव **ऋतुथा** ऋतौ ऋतौ प्राप्ते काले देवानाम् अर्थाय पाथः पशुलक्षणमन्नमन्यानि च **हवींषि समञ्जन्** सम्यग्व्यक्तीकुर्वन् उपावसृज उपागम्य प्रयच्छ । किञ्च वनस्पतिः योऽयं यूपः **शमिता** एतन्नामकः देवः यद्वा शामित्रः **अग्निः** देवो दीप्यमान आहवनीयाख्योऽग्निश्चैते त्रयः **मधुना** मधुरेण **घृतेन** यद्वा मधुनोदकेन प्रोक्षणोपनयनादिगतेन घृतेन च । **हव्यं** हवनयोग्यं **स्वदन्तु** स्वादूकुर्वन्तु ।। ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १।११०।१०) ।

सद्यो जातो व्यमिमीत यज्ञ-
मग्निर्देवानामभवत् पुरोगाः ।
अस्य होतुः प्रशिष्यृतस्य वाचि
स्वाहाकृतं हविरदन्तु देवाः ।।११।।

पदपाठः

सद्यः । जातः । वि । अमिमीत । यज्ञम् । अग्निः । देवानाम् । अभवत् । पुरःऽगाः । अस्य । होतुः । प्रऽशिषि । ऋतस्य । वाचि । स्वाहाऽकृतम् । हविः । अदन्तु । देवाः ।।११।।

अयमग्निः **सद्यः** तदानीमेव **जातः** जायमान एव **यज्ञं व्यमिमीत** विशेषेण निर्मिमीते, उत्पादयति, । माङ् माने शब्दे च जौहोत्यादिकः । अत एवायम् **अग्निः** देवानां **पुरोगाः** प्रथमगामी मुख्यः **अभवत्** । गमेर्विट् प्रत्ययः, आत्वे च कृते रूपम् । ततः **ऋतस्य** आहवनीयात्मनागतस्य **अस्य होतुः** होमनिष्पादकस्याग्नेः **प्रशिषि** प्रकृष्टायां **वाचि**, अत्र वागाश्रयः आस्यं लक्ष्यते । प्रकृष्टे आस्ये इत्यर्थः । **स्वाहाकृतं** स्वाहाकारेण प्रक्षिप्तं **हविः** सर्वे **देवाः अदन्तु** भक्षयन्तु । स्वल्पेन पाठभेदेन पठ्यतेऽयं मन्त्रः ऋग्वेदेऽपि (ऋ. १०।११०।११) ।

त्रयोदशं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य गरुत्मान् ऋषिः। तक्षको देवता। प्रथमातृतीययोर्ऋचोर्जगती, द्वितीयाया आस्तारपङ्क्तिः, चतुर्थी-सप्तम्यष्टमीनामनुष्टुप्, पञ्चम्यास्त्रिष्टुप्, षष्ठ्याः पथ्यापङ्क्तिः, नवम्या भुरिग्जगती, दशम्येकादश्योश्च निचृद्गायत्री छन्दांसि।

'ददिर्हि' इति सूक्तं विषभैषज्यकर्मणि विनियुज्यते। तत्र 'ददिर्हि' इति प्रथमर्चः सर्वविषभैषज्यकर्मणि विनियोगः। तदुक्तं कौशिकेन-'ददिर्हि' इति तक्षकायेत्युक्तम् (कौ. सू. २९।१) इति। 'ददिर्हि' इत्येतस्या विनियोगः 'तक्षकाय' (कौ. सू. २८।१) इति सूत्रे प्रोक्त इति तस्यार्थः। तद्विनियोगविस्तरस्तु 'ब्राह्मणो जज्ञे' (अ. ४।६) इति सूक्ते द्रष्टव्यः।

द्वितीयादीनाम् ऋचां प्रत्यृचं विषापहरण एव विनियोगः। तथा च सूत्रम्--"द्वितीयया ग्रहणी। सव्यं परिक्रामति। शिखासिचि स्तम्बान् उद्ग्रथ्नाति। तृतीयया प्रसर्जनी। चतुर्थ्या दक्षिणम् 'अपेहि' (अ. ७।९३।१) इति दशम तृणैः प्रकर्ष्याहिम् अभिनिरस्यति यतो दष्टः। पञ्चम्या वलीकपल (? ला) लज्वालेन। षष्ठ्यार्त्नीज्यापाशेन। द्वाभ्यां मधूद्वापान् पाययति। नवम्या श्वावित्पुरीषम्। त्रिःशुक्लया मांसं प्राशयति। दशम्याऽलाबुनाऽऽचमयति। एकादश्या नाभिं वध्नाति" (कौ. सू. २९।२-१४) इति। अस्यार्थः--ग्रहणी कटकबन्धः। मृदादितोऽप्रदक्षिणं रेषां करोति बन्धः। तद् विषस्तम्भनभैषज्यम्। शिखां दष्टस्य वध्नाति तदपि विषस्तम्भनम्। श्वेतवस्त्रे शणस्तम्बे वा ग्रन्थिं बध्नाति। विषं स्तभ्यते शरीरे न सर्पति। तृतीयया दष्टं स्थानं पीडयति। तेन विषमन्यत्र गच्छति। चतुर्थ्या आचार्यस्ततः प्रदक्षिणं परिक्रामति। 'अपेहि' (अ. ७।९३।१) इत्यृचं जपित्वा तृणानि प्रज्वाल्य अहेरभिमुखं प्रक्षिपति दष्टस्थाने वा। बलीकेति गृहतृणावज्वालितम् उदकमभिमन्त्र्य दष्टं पाययति प्रोक्षति च। षष्ठ्या आर्त्नीज्यापाशमभिमन्त्र्य बध्नाति। सप्तम्यष्टमीभ्यां मधुमक्षिकां मधुवृक्षमृत्तिकां चाभिमन्त्र्य पाययति। पुरीषमभिमन्त्र्य पाययतीति शेषः। त्रिःशुक्लया श्वाविच्छलाकया। मांसं श्वावित्सम्बन्धि। अलाबुना अलाबुन्युदकं कृत्वा अभिमन्त्र्य आचमयति विषव्याधितम्। अलाबुवृन्तं सम्पात्याभिमन्त्र्य बध्नाति इति।

तथा आभिचारिके कर्मणि अस्य सूक्तस्य विनियोगः। तदुक्तं कौशिकेन--"ददिर्हि' इति साग्नीनि। देशकपटु प्रक्षिणाति" (कौ. सू. ४८।९,१०) इति। देशकपटु सर्पच्छत्रम् अहिच्छत्रम्।

दर्दिर्हि मह्यं वरुणो दिवः कवि-
र्वचोभिरुग्रैर्नि रिणामि ते विषम् ।
खातमखातमुत सक्तमग्रभमिरेव
धन्वन्नि जजास ते विषम् ॥१॥

पदपाठः

ददिः । हि । मह्यम् । वरुणः । दिवः । कविः । वचःऽभिः । उग्रैः । नि । रिणामि । ते । विषम् । खातम् । अखातम् । उत । सक्तम् । अग्रभम् । इराऽइव । धन्वन् । नि । जजास । ते । विषम् ॥१॥

हे सर्प ! **कविः** क्रान्तदर्शी, विषभैषज्यविद्वान् इत्यर्थः, **वरुणः** वरुणो देवः । यतो वरुणो हि दुरिष्टं गृह्णाति । यथाऽऽम्नायते शतपथब्राह्मणे--'यद्वस्य दुरिष्टं भवति वरुणोऽस्य तद् गृह्णाति' (४।५।१।६) इति । **दिवः** द्युलोकात् । एतेनास्य मन्त्रस्योत्कृष्टगुणत्वं द्योतते । **मह्यं हि** विषवैद्याय नूनं **ददिः** अददात् । अतोऽहम् **उग्रैः** उद्गूर्णबलैः **वचोभिः** मन्त्रवाक्यैः **ते** त्वदीयं **विषं** गरलं **निरिणामि** नाशयामि । नि + रि हिंसायां (स्वा.) धातोर्लट् । व्यत्ययेन श्नाप्रत्ययः । यद्वा रि गतौ धातोः विकरणव्यत्यये रूपम्, निरगमयामीत्यर्थः । **खातं** मांसखनितं विषं, शरीरान्तः-प्रविष्टं तव विषम् इत्यर्थः । तथा **अखातम्** अखनितम्, शरीरस्योपरि भागे एव व्याप्तं **विषम् उत सक्तम्** केवलं शरीरे स्पृष्टमात्रं विषं सर्वविधं विषमहम् **अग्रभम्** अगृह्णाम्, गृह्णामि-इत्यर्थः । ग्रह उपादाने धातोर्लङ्, विकरणव्यत्येन शप्, हस्य च भकारः । अहं **ते** तव **विषं** गरलं **निजजास** समाप्नुयां नितरां नाशयामीत्यर्थः । कथमिव ? **धन्वन्** मरुप्रदेशे **इरा इव** जलधाराः इव । निजजास इत्यत्र निपूर्वकात् जसु मोक्षणे (दिवा.) धातोर्लिङर्थे लिट् ।

यत् ते अपोदकं विषं तत् त एतास्वग्रभम् ।
गृह्णामि ते मध्यममुत्तमं रसमुतावमं भियसा
नेशदादु ते ॥२॥

पदपाठः

यत् । ते । अपऽउदकम् । विषम् । तत् । एतासु । अग्रभम् । गृह्णामि । ते । मध्यमम् । उत्ऽतमम् । रसम् । उत । अवमम् । भियसा । नेशत् । आत् । ऊं इति । ते ॥२॥

हे सर्प ! **ते** तव **यत् अपोदकम्** अपगच्छति शुष्कतामेति उदकं शरीरान्तःस्थं जलं येन, तादृशं **विषं** गरलम् **एतासु** व्याधितस्यास्य जलनाडिकासु प्रविष्टं तद्

विषं ते अहम् अग्रभम् अगृह्णाम्। आत् अथ 'आद् अथेति' निरुक्तम् (४।११) ते तव उत्तमं मध्यमम् उत अवमं श्रेष्ठं सामान्यं निकृष्टञ्च रसं विषं गृह्णामि बलादाकर्षामि, कृष विलेखने (तु.) धातोः रूपम्। एवं सर्वमिदं ते तव विषं नियतम् मन्त्रभयेन नेशत् नश्येत्। णश् अदर्शने धातोर्लेट् विकरणव्यत्ययेन शप्।

वृषा मे रवो नभसा न तन्यतु-
रुग्रेण ते वचसा बाध आदु ते।
अहं तमस्य नृभिरग्रभं रसं
तमस इव ज्योतिरुदेतु सूर्यः ॥३॥

पदपाठः

वृषा। मे। रवः। नभसा। न। तन्यतुः। उग्रेण। ते। वचसा। बाधे। आत्। ऊं इति। ते। अहम्। तम्। अस्य। नृऽभिः। अग्रभम्। रसम्। तमसःऽइव। ज्योतिः। उत्। एतु। सूर्यः ॥३॥

मे मम विषवैद्यस्य रवः मन्त्रोच्चारणस्वरः, कीदृशः ? वृषा अभीष्टफलवर्षकः, नभसा नभसि विभक्तिव्यत्ययश्छान्दसः। तन्यतुः न गर्जनमिव, विद्युत इति शेषः। तनु विस्तारे धातोः 'ऋतन्याञ्ज.' (उ. ४।२) इति सूत्रेण युतच्प्रत्ययः। 'तन्यतुः तानत्रीवाचोऽन्यस्याः' इति यास्कः (निरु. १२।३०)। अतः आत् इत्ययमानन्तर्यार्थो निपातः। मन्त्रोच्चारणानन्तरमेव उग्रेण वचसा बलशालिना मन्त्रवाक्येन ते ते तानि तानि सर्वाणि विषाक्तानि अङ्गानि, विभक्तिव्यत्ययश्छान्दसः, बाधे विलोडयामि, विषरहितानि कुर्वे इत्यर्थः। बाधृ विलोडने (भ्वा.) धातोर्लट्। यतः अहं वैद्यः नृभिः कार्यसम्पादकजनैः सहायभूतैः सह, णीञ् प्रापणे धातोः 'नयतेडिच्च' (उ. २।१००) इति सूत्रेण ऋप्रत्ययः। प्रत्ययस्य डित्वाट्टिलोपः। अस्य व्याधितस्य तं रसं विषं 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः (३।३।२२७) इति। अग्रभम् अगृह्णाम्, बलादाकर्षामित्यर्थः। येन अस्य रोगिणः ज्योतिः जीवनप्रकाशः तमसः रात्र्यन्धकारात् उदेतु उदयं लभताम्। कथमिव ? सूर्यः इव यथा रात्र्यन्धकारं भित्वा सूर्यः समुदेति तथैवास्य पीडितस्य जीवनज्योतिरपि विषान्धकारं विनाश्य समुदेष्यतीति भावः।

चक्षुषा ते चक्षुर्हन्मि विषेण हन्मि ते विषम्।
अहे म्रियस्व मा जीवीः प्रत्यगभ्येतु त्वा विषम् ॥४॥

पदपाठः

चक्षुषा। ते। चक्षुः। हन्मि। विषेण। हन्मि। ते। विषम्। अहे। म्रियस्व। मा। जीवीः। प्रत्यक्। अभि। एतु। त्वा। विषम् ॥४॥

हे सर्प ! **चक्षुषा** 'सत्यं वै चक्षुः' (श. १।३।१।२७) इति श्रुतेः । सत्येन मन्त्रप्रभावेण यद्वा आत्मदृष्टया ते तव **चक्षुः** दृष्टिं **हन्मि** नाशयामि । **विषेण** 'विषं तु गरले तोये' इति विश्वः । अभिमन्त्रितेन जलेन यद्वा 'विषस्य विषमौषधम्' इति न्यायेन विषौधषद्वारा **ते विषं** त्वदीयं गरलं **हन्मि** नाशयामि । हे **अहे** ? सर्प ! **म्रियस्व** सम्प्रति त्वं मृत्युं याहि, **मा जीवीः** न जीव । **विषम्** इदं गरलं **त्वा** त्वामेव **अभ्येतु** प्राप्नोतु ।

कैरात पृश्न उपतृण्य बभ्र
आ मे शृणुतासिता अलीकाः ।
मा मे सख्युः स्तामानमपिष्ठाता
श्रावयन्तो नि विषे रमध्वम् ॥५॥

पदपाठः

कैरात । पृश्न । उपऽतृण्य । बभ्रो इति । आ । मे । शृणुत । असिताः । अलीकाः । मा । मे । सख्युः । स्तामानम् । अपि । स्थात । आऽश्रावयन्तः । नि । विषे । रमध्वम् ॥५॥

कैरात पृश्न उपतृण्य बभ्रो असिताः अलीकाः–एताः सर्पजातयः, तत्सम्बुद्धौ । एतादृशाः हे सर्वे सर्पाः ! यूयं मे मम वाक्यम् **आशृणुत** सम्यग् आकर्णयत । मे मम **सख्युः** मित्रभूतस्यास्य व्याधितस्य **स्तामानमपि** गृहपार्श्वेऽपि **मा स्थात** न तिष्ठत । **आश्रावयन्तः** इदं मे कथनमन्यानपि सर्पान् श्रावयन्तः, बोधयन्तः इत्यर्थः, यूयं **विषे** आत्मरसे एव **निरमध्वम्** नितरां रमणं कुरुत ।

असितस्य तैमातस्य बभ्रोरपोदकस्य च ।
सात्रासाहस्याहं मन्योरव ज्यामिव
धन्वनो वि मुञ्चामि रथाँ इव ॥६॥

पदपाठः

असितस्य । तैमातस्य । बभ्रोः । अपऽउदकस्य । च । सात्राऽसहस्य । अहम् । मन्योः । अव । ज्याम्ऽइव । धन्वनः । वि । मुञ्चामि । रथान्ऽइव ॥६॥

साम्प्रतमहं विषवैद्यः **असितस्य** कृष्णसर्पस्य **तैमातस्य** आर्द्रस्थानेषु निवसतः सर्पस्य **बभ्रोः** वभ्रुवर्णस्य सर्पस्य **अप उदकस्य** अपगतानि जलानि येषां स्थानानां तत्र तादृशपर्वतादिषु निवसतः सर्पस्य तथा **सात्रासाहस्य** सत्रमेव सात्रा, 'सत्रा

सत्यनाम इति निघण्टुः (३।१०)। सत्रोपपदात् षह मर्षणे धातोः 'कर्मण्यण्' इत्यण् प्रत्ययः। मन्त्रस्य सत्यप्रभावसहनशीलस्य सर्पस्य च मन्योः क्रोधस्य वेगम् अहं **व्यवमुञ्चामि** मोचयामि। कथमिव? **धन्वनः** धनुषः **ज्याम् इव** गुणमिव तथा **रथान् इव** रथबन्धनानीव वि अवमुञ्चामीति पूर्वेण सम्बन्धः।

आलिगी च विलिगी च पिता च माता च।
विद्म वः सर्वतो बन्ध्वरसाः किं करिष्यथ ॥७॥

पदपाठः

आऽलिगी। च। विऽलिगी। च। पिता। च। माता। च। विद्म। वः। सर्वतः। बन्धु। अरसाः। किम्। करिष्यथ ॥७॥

सर्पेषु यः कश्चन **आलिगी विलिगी** एतदुभयजातीयो वर्त्तते यद्वा आलिगी–लिगिधातुर्गत्यर्थकः (भ्वा.), आसमन्ताद् गतिशीलः, विलिगी–विविधं गतिशीलश्च तथा **पिता** जनयिता, **माता च** जनयित्री च विद्यते, **वः** युष्माकं **सर्वतः बन्धु** सर्वान् बन्धून्, बन्धु–इति छान्दसं रूपम्, **विद्म** वयं जानीमः। एतान् सर्वान् युष्मानहं निर्विषानकरवम्। अतः **अरसाः** निर्विषाः सन्तो यूयं **किं करिष्यथ**। किमपि तु नैते सर्पाः करिष्यन्तीति भावः।

उरुगूलाया दुहिता जाता दास्यसिक्न्या।
प्रतङ्कं दद्रुषीणां सर्वासामरसं विषम् ॥८॥

पदपाठः

उरुऽगूलायाः। दुहिता। जाता। दासी। असिक्न्या। प्रऽतङ्कम्। दद्रुषीणाम्। सर्वासाम्। अरसम्। विषम् ॥८॥

उरुगूलायाः उर्वी गूला गुहा गर्भाशयस्थानं यस्याः सा तस्याः। वर्णव्यत्ययश्छान्दसः। विस्तृतगर्भाशयवत्याः सर्पिण्या **दुहिता** दुर्हिता दूरे हिता वा अनिष्टकारिणी सर्पजातिरित्यर्थः। **जाता** सन्ततिः समुत्पन्नाऽभवत्। **असिक्न्या** च रात्रिनामसु पाठात् रात्रिवत् कृष्णवर्णायाः। 'असिक्न्यशुक्लाऽसिता' इति निरुक्तम् (९।२४)। कृष्णसर्पिण्याः **दासी** दंशनकारिणी सर्वजातिः। दसि दर्शन–दंशनयोः (चु.) धातोः 'दंसेष्टटनौ आ च' (उ. ५।१०) इत्यनेन सूत्रेण औणादिकः टः प्रत्ययः, नकारस्याकारादेशश्च, स्त्रियां ङीष्। जातेति पूर्वेण सम्बन्धः। उभयोरप्यनयोः सर्पजात्योस्तथा **दद्रुषीणां** दद्रुविकारोत्पन्नकारिणीनां **सर्वासां** सर्पजातीनामपि **प्रतङ्कं** प्रकृष्टं कष्टप्रदम्, आपूर्वकात् तकि कृच्छ्रजीवने (भ्वा.) धातोर्घञ्। यद्वा 'हलश्च' (पा. ३।३।१२१) इत्यनेन करणे वा। **विषं** गरलमपि **अरसं** निष्फलं करोमीति शेषः। यद्वा तादृशीनां सर्पजातीनामपि भयङ्करं गरलं मन्त्रशक्त्या निष्फलं जायते।

कर्णा श्वावित् तदब्रवीद् गिरेरवचरन्तिका ।
याः काश्चेमाः खनित्रिमा-
स्तासामरसतमं विषम् ॥९॥

पदपाठः

कर्णा । श्वावित् । तत् । अब्रवीत् । गिरेः । अवऽचरन्तिका । याः । काः । च । इमाः । खनित्रिमाः । तासाम् । अरसऽतमम् । विषम् ॥९॥

कर्णा कर्णवती विक्षेपयित्री वा, विनाशकारिणीत्यर्थः । कृ विक्षेपे धातोः 'कृ वृ जृ सि.' (उ. ३।१०) इति सूत्रेण नक् प्रत्ययः, स्त्रियां टाप् । **श्वावित्** हिंमनकारिणी सरीसृपजातिः, या हि गिरेः **अवचरन्तिका** पर्वतोपत्यकादिषु विचरणशीला वर्त्तते सा हि तदेतद् **अब्रवीत्** कथयतीत्यर्थः । **याः काश्च इमाः** एताः सरीसृपजातयः **खनित्रिमाः** भूमिं निखन्य वसन्ति, खनु अवदारणे धातोः 'उषिखनिभ्यां कित्' (उ. ४।१६२) इत्यनेन ष्ट्रन् । जातार्थे डिमच् प्रत्ययः । **तासाम्** एतासां **विषं** गरलम् **अरसतमं** सर्वथा निकृष्टतमं भवति ।

ताबुवं न ताबुवं न घेत् त्वमसि ताबुवम् ।
ताबुवेनारसं विषम् ॥१०॥

पदपाठः

ताबुवम् । न । ताबुवम् । न । घ । इत् । त्वम् । असि । ताबुवम् । ताबुवेन । अरसम् । विषम् ॥१०॥

ताबुवं नाम सर्पः, यद्वा ताबुवं नाम सर्पविषं **ताबुवं न** ताबुवनामौषधमिव तीक्ष्णविषमस्ति । अतो हे सर्प ! **त्वं ताबुवं न घ इत् असि** घ एवार्थो निपातः । सम्प्रति त्वं घातकः न वर्त्तसे । यतः **ताबुवेन** औषधेन त्वदीयं **विषम् अरसं** नीरसं जातमस्ति ।

तस्तुवं न तस्तुवं घेत् त्वमसि तस्तुवम् ।
तस्तुवेनारसं विषम् ॥११॥

पदपाठः

तस्तुवम् । न । तस्तुवम् । न । घ । इत् । त्वम् । असि । तस्तुवम् । तस्तुवेन । अरसम् । विषम् ॥११॥

तस्तुवम् एतन्नामकः सर्पविशेषः, **तस्तुवं न** तस्तुवौषधमिव घातको वर्त्तते । हे सर्प ! सम्प्रति **त्वं तस्तुवं न घ इत् असि** घातको न विद्यसे । यतस्ते **विषं** गरलं **तस्तुवेन** मन्त्रप्रभावतः औषधप्रभावतो वा **अरसं** नीरसं निर्विषमभूत् ।

चतुर्दशं सूक्तम्

त्रयोदशर्चस्यास्य सूक्तस्य शुक्र ऋषिः । प्रथमा-द्वितीययोर्ऋचोरोषधिः, तृतीयाद्येकादशार्चाञ्च कृत्यापरिहरणं देवते । प्रथमा-द्वितीया-चतुर्थी-षष्ठी-सप्तमी-नवमीनामनुष्टुप्, तृतीया-पञ्चमी-द्वादशीनां भुरिगनुष्टुप्, अष्टम्यास्त्रिपदा विराडनुष्टुप्, दशम्या निचृद् बृहती, एकादश्यास्त्रिपदा साम्नी त्रिष्टुप्, त्रयोदश्याश्च स्वराडनुष्टुप् छन्दांसि ।

'सुपर्णस्त्वा' इति सूक्तस्य कृत्यापरिहरणगणे (कौ. सू. ३९।७) पाठात् यत्र-यत्र कृत्यापरिहरणगणो विनियुज्यते तत्र तत्रास्य सूक्तस्य विनियोगः। सूत्रादिकं 'दूष्या दूषिरसि' (अ० २।११) इति सूक्ते द्रष्टव्यम् ।

सुपर्णस्त्वान्वविन्दत् सूकरस्त्वाखनन्नसा ।
दिप्सौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ।।१।।

पदपाठः

सुऽपर्णः । त्वा । अनु । अविन्दत् । सूकरः । त्वा । अखनत् । नसा । दिप्स । औषधे । त्वम् । दिप्सन्तम् । अव । कृत्याऽकृतम् । जहि ।।१।।

ओषधे हे दिव्यौषधे ! **सुपर्णः** शोभनपक्षो वैनतेयः **त्वा** त्वाम् **अन्वविन्दत्** विषाद्यपहरणाय अन्विष्य अलभत । **सूकरः** आदिवराहः **त्वा** त्वां **नसा** नासिकया तत्सहितया दंष्ट्रयेत्यर्थः, **अखनत्** विदारितवान् भूम्यन्तरवस्थितां त्वां लोकोपकारार्थ-मुदहार्षीत्- इत्यर्थः । अतः **त्वं दिप्सन्तम्** अस्मान् हन्तुमिच्छन्तं **दिप्स** नाशय, तथा **कृत्याकृतम्** आभिचारिकप्रयोगकारिणञ्चापि **अवजहि** विनाशय ।

अव जहि यातुधानानव कृत्याकृतं जहि ।
अथो यो अस्मान् दिप्सति तमु त्वं जह्योषधे ।।२।।

पदपाठः

अव । जहि । यातुऽधानान् । अव । कृत्याऽकृतम् । जहि । अथो इति । यः । अस्मान् । दिप्सति । तम् । ऊं इति । त्वम् । जहि । ओषधे ।।२।।

हे **ओषधे** दिव्यौषधे ! **यातुधानान्** यातूनि यातनाः धीयन्ते अस्मिन् इति तान् । पीडकान् भूतप्रेतादीन् **अवजहि** नाशय, **कृत्याकृतं** कृत्यायाः अभिचारकर्मणः कृतं प्रयोगमपि **अवजहि** विनाशय । **अथ** च **यः** दुष्टः **अस्मान् दिप्सति** हन्तुमिच्छति । दम्भ दम्भने धातोरिच्छायां सन्नन्ताल्लट् । **तम् उ** तमपि **त्वं जहि** अपहर ।

रिश्यस्येव परीशासं परिकृत्य परि त्वचः ।
कृत्यां कृत्याकृते देवा निष्कमिव प्रतिमुञ्चत ॥३॥

पदपाठः

रिश्यस्यऽइव । परिऽशासम् । परिऽकृत्य । परि । त्वचः । कृत्याम् । कृत्याऽकृते । देवाः । निष्कम्ऽइव । प्रति । मुञ्चत ।३॥

हे देवाः ? **रिश्यस्य** रिश हिंसायां धातोरिदं रूपम्, हिंसकस्येत्यर्थः । **परीशासम् इव** छेदनकारि घातकास्त्रमिव **त्वचः परि** त्वचं परितः परिकृत्य खण्डशो विधाय एनां **कृत्याम्** अभिचारप्रयोगक्रियां **कृत्याकृते** कृत्याकर्म कुर्वाणं **प्रति मुञ्चत** प्रत्यावर्तयत । यथा कश्चन हिंसकः छुरिकादिभिः पशोः त्वचं खण्डशः करोति तथा कृत्याप्रयोगं छिन्नं भिन्नं विधाय प्रयोक्तारं प्रति एव गमयन्तु देवा इति मन्त्र-स्वारस्यम् ।

पुनः कृत्यां कृत्याकृते हस्तगृह्य पराणय ।
समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ॥४॥

पदपाठः

पुनः । कृत्याम् । कृत्याऽकृते । हस्तऽगृह्य । परा । नय । सम्ऽअक्षम् । अस्मै । आ । धेहि । यथा । कृत्याऽकृतम् । हनत् ॥४॥

कृत्याम् इमामभिचारक्रियां **हस्तगृह्य** हस्तग्रहणपूर्वकं **कृत्याकृते** कृत्याप्रयोगं कुर्वतः पार्श्वे **पराणय** प्रतिगमय । तथा **अस्मै** षष्ठचर्थे चतुर्थी, तस्यैव **समक्षम्** संमुखम् इमां कृत्याम् **आधेहि** स्थापय । **यथा** येन सा कृत्या **कृत्याकृतम्** कृत्या-प्रयोगकारिणमेव **हनत्** नाशयेत् ।

कृत्याः सन्तु कृत्याकृते शपथः शपथीयते ।
सुखो रथ इव वर्त्ततां कृत्या कृत्याकृतं पुनः ॥५॥

पदपाठः

कृत्याः । सन्तु । कृत्याऽकृते । शपथः । शपथिऽयते । सुखः । रथः । इव । वर्त्तताम् । कृत्या । कृत्याऽकृतम् । पुनः ॥५॥

कृत्याः आभिचारिकप्रयोगाः **कृत्याकृते** आभिचारिकप्रयोगं कुर्वतामेव **सन्तु** भवन्तु । प्रयोगकारिण एव कृत्याप्रयोगप्रभावेण नश्यन्तु-इत्यर्थः । **शपथः** आक्राशोऽपि, शप आक्रोशे धातोः 'शीङ्शपिरुगमि.' (उ. ३।११३) सूत्रेण अथप्रत्ययः । **शपथीयते** शपथं कुर्वतामेव भवेत् । **कृत्या** कृत्याप्रयोगः **कृत्याकृतं** कृत्याप्रयोगकारकं प्रति **पुनः**

वर्त्ततां प्रत्यावर्तताम् । कथमिव ? सुखः रथ इव यथा सुखदायको रथः स्यन्दनः सहसैव विनायासं याति तथैव सा कृत्या झटिति प्रतियात्वित्यर्थः ।

यदि स्त्री यदि वा पुमान् कृत्यां चकार पाप्मने ।
तामु तस्मै नयामस्यश्वमिवाश्वाभिधान्या ॥६॥

पदपाठः

यदि । स्त्री । यदि । वा । पुमान् । कृत्याम् । चकार । पाप्मने । ताम् । उ । तस्मै । नयामसि । अश्वम्ऽइव । अश्वऽअभिधान्या ॥६॥

यदि स्त्री यदि काचन कृत्याप्रयोगविदुषी योषित् **यदि वा पुमान्** यदि वा तद्विद्याकुशलः पुरुषः **पाप्मने** पापभावेन **कृत्याम्** आभिचारिकक्रियां **चकार** अकार्षीत् तर्हि वयं **ताम् उ** तामेव कृत्यां **तस्मै** प्रयोगकर्त्तुः पार्श्वे **नयामसि** संनयामः, अपसारयाम इत्यर्थः । कथमिव ? **अश्वाभिधान्या** अश्वबन्धनरज्वा **अश्वमिव** यथा हयम् अपसारयन्ति लोकास्तद्वत् । अर्थात् यथा प्रग्रहेण लोका अनायासमश्वं प्रत्यावर्त्तयन्ति तथा वयमपि कृत्यामिमां प्रयोगकर्त्तुरेव पार्श्वे अपसारयाम इति ।

यदि वासि देवकृता यदि वा पुरुषैः कृता ।
तां त्वा पुनर्णयामसीन्द्रेण सयुजा वयम् ॥७॥

पदपाठः

यदि । वा । असि । देवऽकृता । यदि । वा । पुरुषैः । कृता । ताम् । त्वा । पुनः । नयामसि । इन्द्रेण । सऽयुजा । वयम् ॥७॥

हे कृत्ये ! **यदि वा** त्वं **देवकृता** पिशाच-गुह्यकादिदेवयोनिभिः प्रेरिता, यद्वा 'विद्वांसो हि देवाः' (श० ३।७।३।१०) इति श्रुतेः आभिचारिककर्मकुशलैर्विद्वद्भिः कृता, अथवा 'देवा वै सर्पाः' (तै. ब्रा. २।२।६।२) इति तैत्तिरीयश्रुतिवचनात् सर्पैः प्रेरिता **असि** वर्त्तसे, **यदि वा पुरुषैः** परुषहृदयैर्निकृष्टजनैः **कृता** प्रेरिता विद्यसे, कैश्चिदपि प्रेरिता त्वं भवेः वयं तु विषवैद्याः **तां त्वा** तादृशीं त्वाम् **इन्द्रेण सयुजा** इन्द्रेण साहाय्यभूतेन **पुनः** भूयो **नयामसि** अपसारयामः ।

अग्ने पृतनाषाट् पृतनाः सहस्व ।
पुनः कृत्यां कृत्याकृते प्रतिहरणेन हरामसि ॥८॥

पदपाठः

अग्ने । पृतनाषाट् । पृतनाः । सहस्व । पुनः । कृत्याम् । कृत्याऽकृते । प्रतिऽहरणेन । हरामसि ॥८॥

हे **पृतनाषाट्** ! पृतनां सपत्नसेनां सहते तत्सम्बुद्धौ। पृतना संग्रामः, इति निघण्टुः (२।१७)। पृतनोपपदात् षह मर्षणे धातोः 'छन्दसि सहः' (पा. ३।२।६३) इति विः। 'युधो वै पृतनाः' इति (श. ५।२।४।१६) च। हे शत्रुसैन्यवशकारिन्! इन्द्रस्त्वम्, तथा हे अग्ने! यद्वा पृतनाषाडित्यपि अग्निविशेषणम्। त्वमपि पृथक् पृथग् रूपेण अस्याः कृत्यायाः पृतनाः सपत्नभूताः सेनाः **सहस्व** मर्षय। **कृत्यां चेमां कृत्याकृते** कृत्याप्रयोगं कुर्वाणाय जनाय तमुद्दिश्येत्यर्थः, **प्रतिहरणेन** प्रतिलोमकर्मानुष्ठानेन **हरामसि** वयमपि प्रतिगमयामः।

कृतव्यधनि विध्य तं यश्चकार तमिज्जहि।

न त्वामचक्रुषे वयं वधाय सं शिशीमहि ॥९॥

पदपाठः

कृतऽव्यधनि। विध्य। तम्। यः। चकार। तम्। इत्। जहि।
न। त्वाम्। अचक्रुषे। वयम्। वधाय। सम्। शिशीमहि ॥९॥

कृतव्यधनि वि+धमतिर्वधकर्मेति निघण्टुकारः (२।१४), हे घातकारिणि कृत्ये! **तं** तमेव जनं **विध्य** घातय **यः** पुरुषस्त्वां **चकार** मां हन्तुं कृतवान्। अतस्त्वं **तम् इत्** तमेव दुष्टं जनं **जहि** नाशय। **अचक्रुषे** परस्य घातं न कुर्वते जनाय, षष्ठ्यर्थे चतुर्थी, तादृशजनस्येत्यर्थः, **वधाय** घाताय तु **वयं त्वां** कृत्यां **न सं शिशीमहि न** प्रेरयामः, प्रत्युत नाशयाम एव। शो तनूकरणे धातोर्लट्।

पुत्र इव पितरं गच्छ स्वज
इवाभिष्ठितो दश।
बन्धमिवावक्रामी गच्छ कृत्ये
कृत्याकृतं पुनः ॥१०॥

पदपाठः

पुत्रः। इव। पितरम्। गच्छ। स्वजःऽइव। अभिऽस्थितः। दश।
बन्धम्ऽइव। अवऽक्रामी। गच्छ। कृत्ये। कृत्याऽकृतम्। पुनः ॥१०॥

हे कृत्ये! त्वं **पुत्रः पितरमिव** यथा कश्चन तनयः आत्मनो जनकं प्रति याति तथा त्वं स्वस्थानं **गच्छ** प्रयाहि। आत्मनः प्रेरकं प्रति एव गच्छेत्यर्थः। **स्वजः इव** च आलिङ्ग्य दशनं कुर्वतः सर्पस्य इव, यद्वा शकारस्थाने सकारश्छान्दसः। श्वजः इव सारमेयात्मज इव, **अभिष्ठितः** अभितः स्थितः सन् यद्वा तदुपरि आक्रमणं कुर्वाण एव **दश**। तथा **बन्धमिव अवक्रामी** विभक्तिव्यत्ययश्छान्दसः। बन्धने शिथिले सति प्रत्याक्रमणकारी पुरुष इव त्वं **कृत्याकृतम्** आभिचारिकप्रयोगकर्त्तारं प्रत्येव **गच्छ**। यथा कश्चन जालबद्धो हिंसकपशुः शिथिले बन्धने झटिति बन्धनकारिणं प्रति पराक्रमते तथैव त्वमपि तमेव कृत्याकृतं प्रति पराक्रमस्वेति भावः।

उदेणीव वारण्यभिस्कन्दं मृगीव ।
कृत्या कर्त्तारमृच्छतु ॥११॥

पदपाठः

उत् । एणीऽइव । वारणी । अभिऽस्कन्दम् । मृगीऽइव । कृत्या । कर्त्तारम् । ऋच्छतु । एणी ॥११॥

एणी एतीति एणः, बाहुलकाण्णः, स्त्रियां ङीप् । हरिणविशेषस्य स्त्री । इव, यद्वा एणी गमनशीला **वारणीव** करिणीव, 'कुञ्जरो वारणः करी' इत्यमरः (२।८।३४) । एवं **मृगीव** सामान्यहरिणस्त्रीव **अभिस्कन्दं** बन्धनान्मुक्ता सती **अभिक्रामति** तथैषा **कृत्या** आभिचारिकक्रिया **कर्त्तारम्** एतत्प्रयोगसाधकमेव **ऋच्छतु** प्राप्नोतु गच्छत्वित्यर्थः ।

इष्वा ऋजीयः पततु द्यावापृथिवी तं प्रति ।
सा तं मृगमिव गृह्णातु कृत्या कृत्याकृतं पुनः ॥१२॥

पदपाठः

इष्वाः । ऋजीयः । पततु । द्यावापृथिवी । तम् । प्रति । सा । तम् । मृगम्ऽइव । गृह्णातु । कृत्या । कृत्याऽकृतम् । पुनः ॥१२॥

द्यावापृथिवी इति सम्बोधनम् । हे द्यावापृथिव्यौ ! **सा कृत्या** आभिचारिकक्रिया **तं प्रति** तमेव कृत्याप्रयोक्तारं प्रति **ऋजीयः** ऋजुतमं सरला सतीत्यर्थः, **पततु** गच्छतु । कथमिव ? **इष्वाः** शर इव । यथा शरो धनुषो निष्क्रम्य सरलं गत्वा प्रतिपक्षिणं विध्यति तथा अयम् आभिचारिकप्रयोगोऽपि प्रयोक्तारमेव वेगेन गत्वा विध्यतु इत्यर्थः । अयं मरणप्रयोगः तमेव **कृत्याकृतं** कृत्यानुष्ठानकारिणं जनं **मृगमिव** हरिणमिव **पुनः गृह्णातु** प्रतिगृह्णातु । यथा कश्चन व्याघ्रो हरिणं गृह्णाति तथायं प्रयोक्तारमेव भक्षयतु इत्यर्थः ।

अग्निरिवैतु प्रतिकूलमनुकूलमिवोदकम् ।
सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः ॥१३॥

पदपाठः

अग्निःऽइव । एतु । प्रतिकूलम् । अनुकूलम्ऽइव । उदकम् । सुखः । रथःऽइव । वर्त्तताम् । कृत्या । कृत्याऽकृतम् । पुनः ॥१३॥

कृत्या मारणप्रयोगोऽयम् **अग्निः इव** दाहकारी ज्वलन इव **प्रतिकूलम्** अस्मत्सपत्नं प्रति **एतु** गच्छतु । **अनुकूलमुदकमिव** तटं प्रति प्रवहज्जलमिव च भवतु । **यथा**

कूलंकषा नदी तटं विनाशयति तथैवेमं कृत्यानुष्ठानकर्त्तारं शत्रुम्, अर्थात् तत्प्रयोक्तारमेव नाशयतु । इदं च कृत्याकृतं कृत्यानुष्ठानं तत्प्रयोक्तारमेब **पुनः वसंताम्** प्रतिगच्छतात् । कथमिव ? सुखः रथ इव यथा सुखदायी रथः ससुखं याति तथैवेवं कृत्या प्रयोक्तारं प्रति यात्वित्यर्थः ।



पञ्चदशं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य विश्वामित्र ऋषिः । मधुलौषधिर्देवता । प्रथमादितृचस्य षष्ठी-दशम्येकादशीनामृचामनुष्टुप्, चतुर्थ्याः पुरस्ताद्बृहती, पञ्चम्याः सप्तम्यादितृचस्य च भुरिगनुष्टुप्, छन्दांसि ।

गवां रोगोपशमनपुष्टिप्रजननकर्मसु 'एका च मे' इति सूक्तेनाभिमन्त्र्य सलवणं केवलं वोदकं गाः पाययेत् । तदुक्तं कौशिकेन--"एका च मे इति गा लवणं पाययति ।" (कौ. सू. १९।१) इत्यादि ।

दुष्टवक्तृमुखस्तम्भनकर्मणि 'एका च मे' (अ. ५।१५), 'यद्येकवृषोसि' (अ. ५।१६) इति सूक्ताभ्यां खलतुलपर्णीं मधुना लोडितेषु सक्तुषु जर्जरीकृत्य अभिमन्त्र्य पाययति । 'यद्येकवृषोसि' (अ. ५।१६) इत्यभिमन्त्र्य अन्नं भुङ्क्ते शापभैषज्यार्थम् ।

तथा तत्रैव कर्मणि 'यद्येकवृषोसि' (अ. ५।१६।१) इत्यनेन गृहद्वारम् अभिमन्त्र्य अपिदधाति तदुक्तं कौशिकेन--'मधुलावृषलिङ्गाभिः खलतुलपर्णीं संक्षुद्य मधुमन्थे पाययति । उत्तराभिर्भुङ्क्ते । द्वारं सृजति । (कौ. सू. २९।१५,१७) इति । 'एका च मे' इति मधुलाशब्दवत्यः 'यद्येकवृषोसि' इति वृषलिङ्गाः ।

एका च मे दश च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुला करः ॥१॥

पदपाठः

एका । च । मे । दश । च । मे । अपऽवक्तारः । ओषधे । ऋतऽजाते । ऋतऽवरि । मधु । मे । मधुला । करः ॥१॥

हे ओषधे ! ओषः फलपाकः अस्यां धीयत इति ओषधिः । डुधाञ् धारणपोषणयोः । तस्मात् 'कर्मण्यधिकरणे च' (पा. ३।३।९३) इति अधिकरणे किप्रत्ययः । मे मम पुरः एका कापि स्त्री दश च पुमांसः अपवक्तारः अपवादितारः निन्दाकर्तारः वा सन्तु इति शेषः । किन्तु ऋतजाते ऋतेन जलेन सत्येन वा जाता उत्पन्ना, तत्संबुद्धौ, हे सत्यजाते ! नियमेनोद्भूते ! यद्वा उदकमिति यज्ञनाम यज्ञार्थमुत्पन्ने ! ऋतावरि ऋतम् उदकं सत्यं यज्ञो वा तद्वति । ऋतशब्दात् 'छन्दसीवनिपौ.' इति वार्त्तिकेन मत्वर्थीयो वनिप् । 'वनो र च' (पा. ४।१।७) इति ङीब्रेफौ । त्वं

मधुला मधु लाति गृह्णाति धारयतीति वा, मधुमती । 'सिध्मादिभ्यश्च' (पा. ५।२।९७) इति लो मत्वर्थीयः । 'ओषधयो मधुमतीः' (मै. ४।१।९; काठ. ३१।७; तै. ३।२।८।२), 'ओषधीनां वा एष परमो रसो यन्मधु ।' (माश. ११।५।४।१८) इति श्रुतेः । मे मदर्थं मधु करः कुरु । करः करोतेर्लुङि च्लेरङ् । अल्लोपच्छान्दसः ।

द्वे च मे विंशतिश्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥२॥

पदपाठः

द्वे इति । च । मे । विंशतिः । च ० ॥२॥

द्वे स्त्रियौ विंशतिः च पुरुषाः । शेषं पूर्ववत् ।

तिस्रश्च मे त्रिंशच्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥३॥

पदपाठः

तिस्रः । च । मे । त्रिंशत् । च ०॥३॥

तिस्रः स्त्रियः त्रिंशत् च पुरुषाः । शेषं पूर्ववत् ।

चतस्रश्च मे चत्वारिंशच्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥४॥

पदपाठः

चतस्रः । च । मे । चत्वारिंशत् । च ०॥४॥

पञ्च च मे पञ्चाशच्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥५॥

पदपाठः

पञ्च । च । मे । पञ्चाशत् । च ० ॥५॥

षट् च मे षष्टिश्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥६॥

पदपाठः

षट् । च । मे । षष्टिः । च ।० ॥६॥

सप्त च मे सप्ततिश्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥७॥

पदपाठः

सप्त । च । मे । सप्ततिः । च ।० ॥७॥

अष्ट च मेऽशीतिश्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥८॥

पदपाठः

अष्ट । च । मे । अशीतिः । च । ०॥८॥

नव च मे नवतिश्च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुलाकरः ॥९॥

पदपाठः

नव । च । मे । नवतिः । च ।०॥९॥

दश च मे शतं च मेऽपवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुला करः ॥१०॥

पदपाठः

दश । च । मे । शतम् । च । ० ॥१०॥
पूर्ववद् व्याख्येयम् ॥१०॥

शतं च मे सहस्रं चापवक्तार ओषधे ।
ऋतजात ऋतावरि मधु मे मधुला करः ॥११॥

पदपाठः

शतम् । च । मे । सहस्रम् । च । अपऽवक्तारः । ओषधे । ऋतऽजाते । ऋतऽवरि । मे । मधुला । करः ॥११॥

शतं स्त्रियः बह्वयः इत्यर्थः सहस्रं सहस्रमिति बहुनाम । बहवः पुरुषाः । शेषं पूर्वव्याख्यानवत् ॥११॥



षोडशं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य विश्वामित्र ऋषिः । एकवृषो देवता । प्रथमा-चतुर्थी-पञ्चमीनामृचां सप्तम्यादिचतसृणाञ्च साम्न्युष्णिक्, द्वितीया–तृतीया–षष्ठीना–मासुर्यनुष्टुप्, एकादश्याश्चासुरी गायत्री छन्दांसि । सर्वा एकावसानाः । पूर्वसूक्तेन सह उक्तो विनियोगः ।

यद्येकवृषोसि सृजारसोऽसि ॥१॥

पदपाठः

यदि एकऽवृषः । असि । सृज । अरसः । असि ॥१॥

गृहस्वामिनं पूर्णत्वप्राप्तये प्रेरयति । हे गृहस्वामिन् ! **यदि** त्वं **एकवृषः असि** वृषो धर्मस्तस्यैकेनैनाङ्गेन युतोऽसि । 'वृषो हि भगवान् धर्मः' इति मनुः (८।१६)। तस्याङ्गानि--

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥

तत् तदा **सृज** उत्पादय । आत्मनि अन्यानि अङ्गानि अपि जनय । कुतः **अरसः** रसेन रहितः **असि** । 'रसो वै सः' (तै. उप. २।६।१।) इति श्रुतिः । संपूर्णमेव धर्ममात्मसात् कृत्वा पुरुषः पुरुषोत्तमो भवति ।

अयमेव मन्त्रः ईश्वरमुद्दिश्य व्याख्यायते । हे पुरुषोत्तम ! **यदि एकवृषः असि** एकेन एव अंशेन कामानां वर्षिता असि भवसि. मत्स्यादिरूपेणावतीर्णोऽसि तर्हि अन्यानवतारानपि सृज । कुतः **अरसः** रसेन ऊनः पूर्णरसरहितोऽसि । रस एवेश्वरस्य स्वरूपम्, 'रसो वै सः' (तै. उप. २।६।१) इति श्रुतेः । **अरसः** आत्मस्वरूपेणोनोऽसि अथवा भक्तानां हृदये अंशावतारेण संपूर्णा भक्तिर्नोत्पद्यते । तत्र तेऽसकलांश-रूपत्वात् ॥१॥

यदि द्विवृषोसि सृजारसोऽसि ॥२॥

पदपाठः

यदि । द्विऽवृषः । असि । सृज । अरसः । असि ।।२॥

हे गृहस्वामिन् ! यदि त्वं द्विवृषः असि धर्मस्य द्वाभ्यां धृतिक्षमाभ्यां गुणाभ्यां संयुतोऽसि तदापि अन्यान् गुणान् सृज । शेषं पूर्ववत् ॥२॥

यदि त्रिवृषोसि सृजारसोऽसि ॥३॥

पदपाठः

यदि । त्रिऽवृषः । असि । सृज । अरसः । असि ॥३॥

हे गृहस्वामिन् ! यदि त्रिवृषोऽसि धर्मस्य त्रिभिर्गुणैर्युतोऽसि तदापि अन्यान् गुणान् सृज । शेषं पूर्ववत् ॥३॥

यदि चतुर्वृषोसि सृजारसोऽसि ॥४॥

पदपाठः

यदि । चतुःऽवृषः । असि । सृज । अरसः । असि ॥४॥

यदि चतुर्वृषः धर्मस्य चतुर्भिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यदि पञ्चवृषोसि सृजारसोऽसि ।।५।।

पदपाठः

यदि । पञ्चऽवृषः । असि । सृज । अरसः । असि ।।५।।

यदि पञ्चवृषः धर्मस्य पञ्चभिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यदि षड्वृषोसि सृजारसोऽसि ।।६।।

पदपाठः

यदि । षट्ऽवृषः । असि । सृज । अरसः । असि ।।६।।

यदि षड्वृषः धर्मस्य षड्भिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यदि सप्तवृषोसि सृजारसोऽसि ।।७।।

पदपाठः

यदि । सप्तऽवृषः । असि । सृज । अरसः । असि ।।७।।

यदि सप्तवृषः धर्मस्य सप्तभिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यद्यष्टवृषोसि सृजारसोसि ।।८।।

पदपाठः

यदि । अष्टऽवृषः । असि । सृज । अरसः । असि ।।८।।

यदि अष्टवृषः धर्मस्य अष्टाभिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यदि नववृषोसि सृजारसोसि ।।९।।

पदपाठः

यदि । नवऽवृषः । असि । सृज । अरसः । असि ।।९।।

यदि नववृषः धर्मस्य नवभिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यदि दशवृषोसि सृजारसोसि ।।१०।।

पदपाठः

यदि । दशऽवृषः । असि । सृज । अरसः । असि ।।१०।।

यदि दशवृषः धर्मस्य दशभिरङ्गैर्युतोऽसि । शेषं पूर्ववत् ।

यद्येकादशोसि सोपोऽदकोऽसि ।।११।।

पदपाठः

यदि । एकादशः । असि । सः । अपऽउदकः । असि ।।११।।

हे गृहस्वामिन् ! यदि एकादशः असि दशलक्षणोपेतेन धर्मेण ईश्वरभक्त्या च संयुतोऽसि भवसि तदा सः एतादृशस्त्वम् अपोदकः उदकस्य संसारस्य पारंगतोऽसि । उदकशब्दोऽत्र संसारसागरं ध्वनयति ।।११।।

सप्तदशं सूक्तम्

अष्टादशर्चस्यास्य सूक्तस्य मयोभूर्ऋषिः । ब्रह्मजाया देवता । प्रथमादिषड्ऋचां त्रिष्टुप्, सप्तम्यादिद्वादशानाञ्चानुष्टुप् छन्दसी ।

गोहरणेऽभिचारकर्मणि 'तेऽवदन्' इति सूक्तेन नेत्ऋणां पदं वृश्चति । तथा अनेन सूक्तेन चौरान् अन्वाह । तदुक्तं कौशिकेन "'तेऽवदन्' इति नेत्ऋणां पदं वृश्चति । अन्वाह" (कौ. सू. ४८।११,१२) ।

तेऽवदन् प्रथमा ब्रह्मकिल्बिषेऽकूपारः
सलिलो मातरिश्वा ।
वीडुहरास्तप उग्रं मयोभूरापो
देवीः प्रथमजा ऋतस्य ॥१॥

पदपाठः

ते । अवदन् । प्रथमाः । ब्रह्मऽकिल्बिषे । अकूपारः । सलिलः । मातरिश्वा । वीडुऽहराः । तपः । उग्रम् । मयःऽभूः । आपः । देवीः । प्रथमऽजाः । ऋतस्य ॥१॥

अत्रेतिहासमाचक्षते । जुहूरिति वाङ्नाम । वाचस्पतेर्बृहस्पतेर्जुहूः भार्या । कदाचिदस्य किल्बिषमस्या दौर्भाग्यरूपेणासाञ्चक्रे । अतः स एनां पर्यत्याक्षीत् । अनन्तरमादित्यादयो देवा मिथो विचार्यैनामकिल्बिषां कृत्वा पुनर्बृहस्पतये प्रादुरिति । तदत्र वर्ण्यते । प्रथमाः मुख्याः ते देवाः ब्रह्मकिल्बिषे, षष्ठीसमासः, ब्रह्मणो बृहस्पतेः किल्बिषे पापे जुहूदौर्भाग्यरूपे अवदन्, निष्कृत्युपायमवोचन् । वकारपरत्वादत्र प्रकृतिभावः । के ते ? अकूपारः आदित्यः, यास्कोऽपि 'आदित्योऽप्यकूपार उच्यतेऽकूपारो भवति दूरपारः' (नि. ४।१८) इति । अकुत्सितपारो महागतिरादित्यः । सलिलः अब्देवता वरुणः । मातरिश्वा वायुः । वीडुहराः हरतेरसुनि रूपं हर इति । हरति विनाशयति तमांसीति हरस्तेजः, प्रभूततेजस्कः । उग्रम् उद्गूर्णं तपः । तृतीयायाः सुः । तापेन, उद्गूर्णं तपः अग्निः, मयोभूः सुखस्य भावयिता सोमः । देवीः देव्यः आपः कीदृश्यः ? ऋतस्य सत्यभूतस्य ब्रह्मणः प्रथमजाः आदितः एवोत्पादिताः । एत उपायमुक्त्वा प्रायश्चित्तमप्यकारयन्निति भावः । ऋग्वेदे पाठभेदेन स्वल्पेन पठ्यतेऽयं मन्त्रः (ऋ. १०।१०९।१)

सोमो राजा प्रथमो ब्रह्मजायां
पुनः प्रायच्छदहृणीयमानः ।
अन्वर्तिता वरुणो मित्र
आसीदग्निर्होता हस्तगृह्या निनाय ॥२॥

पदपाठः

सोमः । राजा । प्रथमः । ब्रह्मऽजायाम् । पुनः । प्र । अयच्छत् । अहृणीयमानः । अनुऽअर्तिता । वरुणः । मित्रः । आसीत् । अग्निः । होता । हस्तऽगृह्य । आ । निनाय ॥२॥

प्रथमः मुख्यः **सोमो राजा अहृणीयमानः** पापापगमनेनालज्जमानः सन् तामेनामकिल्बिषां **ब्रह्मजायां पुनः** बृहस्पतये **प्रायच्छत्** । ततः **वरुणः अन्वर्तिता** ऋतिः सौत्रो धातुर्घृणायां वर्तते । तस्य तृचि रूपम् । सोममनुमोदयिता **आसीत्** । सर्वथा त्वं परिगृहाणेति दयामकार्षीत् । तथा **मित्रः** च । अनन्तरं **होता** देवानामाह्वाता मनुष्याणां होमनिष्पादको वा **अग्निः हस्तगृह्य** तां हस्ते गृहीत्वा **आनिनाय** आनैषीत् । प्रादादित्यर्थः । हस्तगृह्य 'नित्यं हस्ते पाणावुपयमने' (पा. १।४।७७) इति हस्तशब्दस्य गतिसंज्ञायां ग्रहिणा समासे ल्यप् । एकारलोपश्छान्दसः । यद्वा हस्तशब्दात् परस्य गृहेश्छान्दसौ समासल्यपौ ॥२॥

हस्तेनैव ग्राह्य आधिरस्या
ब्रह्मजायेति चेदवोचत् ।
न दूताय प्रहेया तस्थ एषा
तथा राष्ट्रं गुपितं क्षत्रियस्य ॥३॥

पदपाठः

हस्तेन । एव । ग्राह्यः । आऽधिः । अस्याः । ब्रह्मऽजाया । इति । च । इत् । अवोचत् । न । दूताय । प्रऽहेया । तस्थे । एषा । तथा । राष्ट्रम् । गुपितम् । क्षत्रियस्य ॥३॥

देवा बृहस्पतिमूचुः हे बृहस्पते ! **अस्याः आधिः** आधीयन्त आभरणान्यत्रेत्याधिः शरीरम् । 'उपसर्गे घोः किः' (पा. ३।३।९२) इति किप्रत्ययः । **अस्याः** शरीरं त्वया **हस्तेनैव ग्राह्यः** ग्राह्यं शरीरं ग्रहीतव्यम् । स्वयमेव त्वया स्वीकर्त्तव्यम् । पुनस्ते देवा इदानीम् इयं **ब्रह्मजाया इति** एव एवम् **अवोचन्** अवादिषुः । चशब्दश्चेदर्थे । 'ब्रूञ् व्यक्तायां वाचि' लुङि ब्रुवो वचिः । 'अस्यतिवक्तिख्यातिभ्योऽङ्' (पा. ३।१।५२) इति च्लेरङादेशः । 'वच उम्' इत्युमागमः । **इत्** अवधारणे । **एषा** ब्रह्मजाया पुरा **प्रहेया** । 'हि गतौ वृद्धे च' कर्मण्यौणादिकः क्विप् । तुगभावश्छान्दसः । प्रहिताय त्वया भार्यान्वेषणार्थं प्रेषिताय **दूताय** तथा **न तस्थे** । दूतस्य पुरः स्वात्मानं न प्रकाशयति । तिष्ठतेर्लिटि 'प्रकाशनस्थेयाख्ययोश्च' (पा. १।३।२३) इत्यात्मनेपदम् । 'श्लाघह्नुङ्स्थाशपां' (पा. १।४।३४) इति दूतस्य सम्प्रदानसंज्ञा । तत्र दृष्टान्तः यथा **क्षत्रियस्य**

राज्ञः गुपितं रक्षितं राष्ट्रं राज्यं शत्रवे यथा न प्रकाशयति तद्वदसौ दौर्भाग्ययुक्ततया तस्मै स्वात्मानं न प्रकाशितवती । इदानीं तु तद्राहित्येन प्रकाशमानेयं ब्रह्मजायैवेत्यब्रुवन् ।

यामाहुस्तारकैषा विकेशीति
दुच्छुनां ग्राममवपद्यमानाम् ।
सा ब्रह्मजाया वि दुनोति राष्ट्रं
यत्र प्रापादि शश उल्कुषीमान् ॥४॥

पदपाठः

याम् । आहुः । तारका । एषा । विऽकेशी । इति । दुच्छुनाम् । ग्रामम् । अवऽपद्यमानाम् । सा । ब्रह्मऽजाया । वि । दुनोति । राष्ट्रम् । यत्र । प्रऽअपादि । शशः । उल्कुषीऽमान् ॥४॥

यां ब्रह्मजायां दुच्छुनां दुष्ट शुनं सुखम् अस्याम् इति वा श्वेव दुष्टेति वा दुच्छुना अनिष्टकारिणी पापदेवता ताम्, **ग्रामम् अवपद्यमानाम्** ग्रामं प्रति अवतरन्तीं जनाः **एषा विकेशी** विकीर्णकेशा व्यस्तोजस्रा व्यस्तकिरणा **तारका इति आहुः** कथयन्ति । तादृशी सा ब्रह्मजाया राष्ट्रं वि दुनोति विशेषेण पीडयति । कीदृशं राष्ट्रम् ? **यत्र** यस्मिन् राष्ट्रे **उल्कुषीमान्** उल्कावान् धूमकेतुयुतः **शशः** शशलाञ्छनः चन्द्रः **प्रापादि** प्रकर्षेण पतति । धूमकेतुना परिगृहीतश्चन्द्राऽत्यन्तं पीडयतीति प्रसिद्धिः । दुच्छुनां 'टुदुः उपतापार्थे' (स्वा.) तस्मात् क्विप् दुत् । शुन गत्यर्थात्कः टाप् ताम् ।

ब्रह्मचारी चरति वेविषद्
विषः स देवानां भवत्येकमङ्गम् ।
तेन जायामन्वविन्दद् बृहस्पतिः
सोमेन नीतां जुह्वं न देवाः ॥५॥

पदपाठः

ब्रह्मऽचारी । चरति । वेविषत् । विषः । सः । देवानाम् । भवति । एकम् । अङ्गम् । तेन । जायाम् । अनु । अविन्दत् । बृहस्पतिः । सोमेन । नीताम् । जुह्वम् । न । देवाः ॥५॥

एवं स्वपतिर्मामलभतेति जुहूः परोक्षतया वदति । हे देवाः ! पूर्वं **सः ब्रह्मचारी** जायाभावेन ब्रह्मचारी **चरति** । अत एव **विषः** सर्वेषु यज्ञेषु व्याप्तवान् देवान् **वेविषत्** स्तुतिभिर्हविर्भिश्च व्याप्नुवन् **देवानाम् एकम् अङ्गं भवति** । जायापती यज्ञस्य द्वे अङ्गे खलु । वेविषत् 'विष्लृ व्याप्तौ' जौहोत्यादिकः । 'निजां त्रयाणां गुणः

श्लौ' (पा. ७।४।७५) इत्यभ्यासस्य गुणः। शतुः 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। तेन देवानां परिचरणेन बृहस्पतिः जायां जुहूनामिकां माम् अन्वविन्दत्। अनुगम्य अलभत। नशब्द उपमार्थे। पूर्वं यथा सोमेन नीतां 'सोमो ददद्गन्धर्वाय' (ऋ. १०।८५।४१) इत्यादिक्रमेण नीतां जुह्वं यथा लब्धवान् तद्वदिदानीमपि। जुह्वम् 'हु दानादानयोः'। 'अन्येभ्योऽपि दृश्यते' इति क्विप्। जुहोतेर्द्वे च' इति द्विर्वचनं दीर्घश्च।

देवा वा एतस्यामवदन्त पूर्वे
सप्तऋषयस्तपसा ये निषेदुः।
भीमा जाया ब्राह्मणस्यापनीता
दुर्धां दधाति परमे व्योमन् ॥६॥

पदपाठः

देवाः। वै। एतस्याम्। अवदन्त। पूर्वे। सप्तऽऋषयः। तपसा। ये। निऽसेदुः। भीमा। जाया। ब्राह्मणस्य। अपऽनीता। दुःधाम्। दधाति। परमे। विऽओमन् ॥६॥

पूर्वे चिरन्तनाः देवाः आदित्यादयः एतस्याम् एतद् विषये अवदन्त। इयं पापरहितेत्यवादिषुः। तथा ये सप्तर्षयः। सप्तसङ्ख्याका ऋषयः तपसा हेतोः तपश्चरणाय निषेदुः निषण्णा बभूवुः। सदेर्लिटि रूपम्। उपसर्गेण समासः। तेऽप्यवादिषुः। ततः भीमा शत्रुरूपाणां पापानां भयङ्करी सुकृतवती एषा ब्राह्मणस्य बृहस्पतेः अपनीता पूर्वं दूरीकृता जाया भार्या अधुना देवैः स्थापिता। 'णीञ् प्रापणे' कर्मणि क्तः। 'गतिरन्तरः' इति गतेरनन्तरत्वम्। तथा हि। तपःप्रभावः दुर्धां दुर्धानामपि परमे व्योमन् व्योमन्युत्तमे स्थाने दधाति विदधाति खलु। तस्मात् एनामपि देवतापरिग्रहरूपस्तपोमहिमा बृहस्पतेरन्तिके स्थापयति। स्वल्पेन पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः। ऋ. १०।१०९।४)।

ये गर्भा अवपद्यन्ते जगद् यच्चापलुप्यते।
वीरा ये तृह्यन्ते मिथो ब्रह्मजाया हिनस्ति तान् ॥७॥

पदपाठः

ये। गर्भाः। अवऽपद्यन्ते। जगत्। यत्। च। अपऽलुप्यते। वीराः। ये। तृह्यन्ते। मिथः। ब्रह्मऽजाया। हिनस्ति। तान् ॥७॥

ये गर्भाः अवपद्यन्ते स्खलन्ति। यत् च जगत्, गच्छति इति जगत् भूतजातम् अवलुप्यते विनश्यति। ये च वीराः वीरपुरुषाः मिथः परस्परं तृह्यन्ते हिंस्यन्ते। तृह

हिसि हिंसायां कर्मणि लट् । मिथ्यासंघर्षं कृत्वा इति शेषः । तान् सर्वान् ब्रह्मजाया ब्रह्मपत्नी अपहृता सती हिनस्ति नाशयति ।

उत यत् पतयो दश स्त्रियाः पूर्वे अब्राह्मणाः ।
ब्रह्मा चेद्धस्तमग्रहीत् स एव पतिरेकधा ॥८॥

पदपाठः

उत । यत् । पतयः । दश । स्त्रियाः । पूर्वे । अब्राह्मणाः । ब्रह्मा । च । इत् । हस्तम् । अग्रहीत् । सः । एव । पतिः । एकऽधा ॥८॥

उत अपि च यत् यदि स्त्रियाः नार्याः पूर्वे पूर्वं दश अब्राह्मणाः ब्राह्मणेतरे क्षत्रियवैश्यादिजातीयाः पतयः स्वामिनः स्युः किन्तु चेत् यदि ब्रह्मा ब्राह्मणः प्रजापतिर्वा तस्याः हस्तम् अग्रहीत् पाणिग्रहणं करोति तदा स ब्रह्मा ब्राह्मण एव वा तस्याः एकधा एक एव पतिः भवति । तस्याः पूर्वकृतं पूर्णमेव दुष्कृतं विनश्यतीत्यर्थः । अतस्त्वमप्येनां स्वीकृत्य पवित्रीकर्तुमर्हसीति । एकधा 'संख्यायाः विधार्थे धा' (पा. ५।३।४२) ।

ब्राह्मण एव पतिर्न राजन्यो न वैश्यः ।
तत् सूर्यः प्रब्रुवन्नेति पञ्चभ्यो मानवेभ्यः ॥९॥

पदपाठः

ब्राह्मणः । एव । पतिः । न । राजन्यः । न । वैश्यः । तत् । सूर्यः । प्रऽब्रुवन् । एति । पञ्चऽभ्यः । मानवेभ्यः ॥९॥

अस्याः ब्रह्मजायायाः ब्राह्मणः एव पतिः भर्ता, पाति इति पतिः । 'पा रक्षणे', 'पातेर्डतिः' (उ. ४।५७) । न राजन्यः न क्षत्रियः पतिः । राज्ञोऽपत्यं राजन्यः । 'राजश्वशुराद्यत्' (पा. ४।१।१३७) 'ये चाभावकर्मणोः' (पा. ६।४।१६८) इति प्रकृत्या । यद्वा राजति 'राजृ दीप्तौ', 'राजेरन्यः' (उ. ३।१००), न वैश्यः विट् वा नास्याः पतिः । वैश्यः विशति इति विट्, 'विश प्रवेशने' क्विप् (पा. ३।२।१७८) स्वार्थे यञ् (वा. ५।१।१२४) । तत् सूर्यः देवः सविता पञ्चभ्यः मानवेभ्यः पञ्चजनेभ्यः 'देवमनुष्याणां गन्धर्वाप्सरसां सर्पाणाञ्च पितॄणां चैतेषां वा एतद् पञ्चजनानामुक्थमिति' (ऐ.ब्रा. ३।३१) इति ब्राह्मणवचनादेते, अथवा 'गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके, चत्वारो वर्णा निषादपञ्चमा इत्यौपमन्यवः' (नि. ३।८) गन्धर्वादयो ब्राह्मणादयो वा, अथवा आधुनिकानां केषाञ्चिन्मते अनवः द्रुह्यवो यदवस्तुर्वशा पुरवश्चेति पञ्च यायाता ऋग्वेदे (१।१०८।८) वर्णितास्ते पृथिव्याः पञ्चसु खण्डेषु वसन्त्यो मनुष्यजातय इति । वा त इमे पञ्चजनसमूहाः । तेभ्यः पञ्चभ्यः मानवेभ्यः । प्रब्रुवन् प्रकर्षेण उच्चैः वदन् एति गच्छति ॥९॥

पुनर्वै देवा अददुः पुनर्मनुष्या अददुः ।
राजानः सत्यं गृह्णाना ब्रह्मजायां पुनर्ददुः ॥१०॥

पदपाठः

पुनः । वै । देवाः । अददुः । पुनः । मनुष्याः । अददुः । राजानः । सत्यम् । गृह्णानाः । ब्रह्मऽजायाम् । पुनः । ददुः ॥१०॥

लाभहेतुमाह । देवाः ब्रह्मजायां जुहूं बृहस्पतये **पुनः अददुः** । **वै** शब्दः प्रसिद्धिवाची । **पुनः मनुष्याः** अपि **अददुः** । एवं देवमनुष्यैः कृतं दानं **सत्यं** यथार्थं **गृह्णानाः** गृह्णन्तः कुर्वन्तः **राजानः** अपि **पुनः** तस्मै **ददुः** । एवमव्यवहार्यत्वनिमित्तं पापमपि व्यनाशयन्निति भावः । ऋग्वेदेऽपि स्वल्पेन पाठभेदेन पठ्यतेऽयं मन्त्रः (ऋ. १०।१०९।६) ।

पुनर्दाय ब्रह्मजायां कृत्वा दैवैर्निकिल्बिषम् ।
ऊर्जं पृथिव्या भक्त्वोरुगायमुपासते ॥११॥

पदपाठः

पुनःऽदाय । ब्रह्मऽजायाम् । कृत्वा । देवैः । निःऽकिल्बिषम् । ऊर्जम् । पृथिव्याः । भक्त्वा । ऊरुऽगायम् । उप । आसते ॥११॥

देवैः । 'सुपां सुपो भवन्ति' इति जसस्तृतीयादेशः । देवाः **निकिल्बिषम्** अर्थाभावे अव्ययीभावः । तस्याः किल्बिषाभावं **कृत्वा ब्रह्मजायां** ब्रह्मणो बृहस्पतेर्भार्यां **पुनर्दाय** पुनर्दत्वा । 'पुनश्चनसोश्छन्दसि गतिसंज्ञा वक्तव्या' इति पुनःशब्दस्य गतिसंज्ञायां समासल्यपौ । 'न ल्यपि' (पा. ६।४।६९) इतीत्वप्रतिषेधः । **पृथिव्याः ऊर्जं** रसभूतमन्नं हवीरूपं **भक्त्वा** विभज्य बहुकीर्ति बहुभिस्तोतव्यं वा बार्हस्पत्यं यज्ञं **उपासते** सेवन्ते । ऋग्वेदे स्वल्पेन पाठभेदेन प्राप्यतेऽयं मन्त्रः ।

नास्य जाया शतवाही कल्याणी तल्पमा शये ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१२॥

पदपाठः

न । अस्य । जाया । शतऽवाही । कल्याणी । तल्पम् । आ । शये । यस्मिन् । राष्ट्रे । निऽरुध्यते । ब्रह्मऽजाया । अचित्त्या ॥१२॥

अथ ब्रह्मजायायाः निरोधेन के दोषाः संभवन्तीति षड्भिर्मन्त्रैर्दर्शयति । **यस्मिन्** यत्र **राष्ट्रे** देशे **ब्रह्मजाया** ब्रह्मणः पत्नी **अचित्त्या** अविचारेण अज्ञानेन वा **निरुध्यते** नितरां रुध्यते पीड्यते तत्र **अस्य** तस्मिन् राष्ट्रे स्थितस्य जनस्य **शतवाही** शतं वहतीति बहून् पुत्रान् धारयति बहूनि वा कार्याणि करोतीति तादृशी । **कल्याणी**

मङ्गलमयी कल्याणमस्यातीति मत्वर्थे 'छन्दसीवनिपौ०' (वा. ५।२।१२२) इति ईप्रत्ययः। जाया पत्नी यथोच्यते–

'पतिर्जायां प्रविशति गर्भो भूत्वा स मातरम्।
तस्यां पुनर्भवो भूत्वा दशमे मासि जायते ॥'

'तज्जाया जाया भवति यदस्यां जायते पुनः' (ऐ. ब्रा. ७।१३) इति च। आ– आसमन्तात् तल्पम् तल्पे शयनीये न शये न शेते। सुखेन इति शेषः। शये, 'शीङ् स्वप्ने' 'लोपस्त.' (पा. ७।१।४१) इति तकारलोपः। 'शीङः सर्वधातुके गुणः' (पा. ७।४।२१,। अनेन गार्हस्थ्यसुखावच्छेदेन पितृऋणस्यापि पूर्तिरेतादृशे राष्ट्रे न संभवतीति सूचितम् ॥११॥

न विकर्णः पृथुशिरास्तस्मिन् वेश्मनि जायते।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१३॥

पदपाठः

न। विऽकर्णः। पृथुऽशिराः। तस्मिन्। वेश्मनि। जायते। यस्मिन्। राष्ट्रे। निऽरुध्यते। ब्रह्मजाया। अचित्त्या ॥१३॥

तस्मिन् तत्र राष्ट्रे वेश्मनि गृहे विकर्णः विविधः कर्णः यस्य सः, बहुश्रुतः। पृथुशिराः पृथु शिरो यस्य सः महामेधावी पुत्रः न जायते न उत्पद्यते। शेषं व्याख्यातम् ॥१३॥

नास्य क्षत्ता निष्कग्रीवः सूनानामेत्यग्रतः।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१४॥

पदपाठः

न। अस्य। क्षत्ता। निष्कऽग्रीवः। सूनानाम्। एति। अग्रतः। यस्मिन्। राष्ट्रे। निऽरुध्यते। ब्रह्मजाया। अचित्त्या ॥१४॥

तस्मिन् राष्ट्रे अस्य जनस्य सूनानाम् सन्तानानाम् सूना 'सवनं सूयते वा' 'षूङ् प्राणिगर्भविमोचने' कर्मणि क्तः। मध्ये क्षत्ता दाता क्षदतिरत्र दानकर्मा क्षदतेस्तृच् क्षत्ता। निष्कग्रीवः निष्कम् आभरणविशेषः ग्रीवायां यस्य सः, आभरण-युक्तकण्ठः अग्रतः पुरः न एति–न गच्छति। नास्य वंशे कश्चित् सुखविशेषभोक्ता दानी वा जननायको भवतीत्यर्थः। शेषं पूर्ववत् ॥१४॥

नास्य श्वेतः कृष्णकर्णो धुरि युक्तो महीयते।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१५॥

पदपाठः

न। अस्य। श्वेतः। कृष्णऽकर्णः। धुरि। युक्तः। महीयते। यस्मिन्। राष्ट्रे। निऽरुध्यते। ब्रह्मऽजाया। अचित्त्या ॥१५॥

तस्मिन् राष्ट्रे **अस्य** जनस्य धुरि धुरायां युक्तः संयोजितः **श्वेतः** श्वेतवर्णः **कृष्णकर्णः** कृष्णौ कर्णौ यस्य सः तादृशः अश्वः न महीयते न पूज्यते । युद्धादिस्थले पराक्रमादिभिः प्रजानां प्रशंसार्हो न भवतीति द्योत्यते । शेषं पूर्ववत् ॥१५॥

नास्य क्षेत्रे पुष्करिणी नाण्डीकं जायते बिसम् ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१६॥

पदपाठः

न । अस्य । क्षेत्रे । पुष्करिणी । न । आण्डीकम् । जायते । बिसम् । यस्मिन् । राष्ट्रे । निऽरुध्यते । ब्रह्मऽजाया । अचित्त्या ॥१६॥

तस्मिन् राष्ट्रे **अस्य** जनस्य **क्षेत्रे पुष्करिणी** पुष्कराणि पद्मानि यस्यां सन्तीति पुष्करिणी सकमलं सरो **न जायते** । **आण्डीकं** अण्डाकृतेः कन्दात् उत्पन्नं **बिसम्** पद्मकाण्डं न **जायते** नैवोत्पद्यते । प्रकृतिरपि तत्र कुपिता भवतीत्यर्थः । शेषं पूर्ववत् ।

नास्मै पृश्निं वि दुहन्ति येस्या दोहमुपासते ।
यस्मिन् राष्ट्रे निरुध्यते ब्रह्मजायाचित्त्या ॥१७॥

पदपाठः

न । अस्मै । पृश्निम् । वि । दुहन्ति । ये । अस्याः । दोहम् । उपऽआसते । यस्मिन् । राष्ट्रे । निऽरुध्यते । ब्रह्मऽजाया । अचित्त्या ॥१७॥

अस्य राष्ट्रे **ये** गोपालादयः **अस्याः** पृश्नेः धेनुविशेषस्य **दोहम् उपासते** दोहार्थं समीपे निषीदन्ति ते **अस्मै** एतादृशाय जनाय **पृश्निं न विदुहन्ति** कृतेऽपि प्रयत्ने गोपालास्तस्य महापापस्य कृते पृश्नेः दुग्धं लब्धुं न शक्नुवन्ति । पृश्निः 'प्राष्टवर्णा पृश्निः प्राश्नुत एतं वर्णम्' इति नैरुक्ताः (नि. २।१४) इति यास्कः । प्रपूर्वादश्नोतेः 'घृणिपृश्नि.' (३।४।५२) इत्यादिना कर्तरि निप्रत्ययः, प्राशेः पृश्भावः । यद्वा पृश्निः माध्यमिका वाग् । 'वाग्वै पृश्निः' (काठ. ३४।१) इति श्रुतेः । 'वाचं धेनुमुपासीत' (मा. शत. १४।८।६।१) इति वचनानुसारेण ये जनाः पृश्निम् उपासते तदुपासनां कुर्वन्ति ते तां न विदुहन्ति, सा तस्मै आत्मानं न विवृणुते इत्यर्थः । शेषं पूर्ववत् व्याख्येयम् ॥१७॥

नास्य धेनुः कल्याणी नानड्वान्त्सहते धुरम् ।
विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया ॥१८॥

पदपाठः

न । अस्य । धेनुः । कल्याणी । न । अनड्वान् । सहते । धुरम् । विऽजानिः । यत्र । ब्राह्मणः । रात्रिम् । वसति । पापया ॥१८॥

यत्र यस्मिन् राष्ट्रे ब्राह्मणः पापया पापेन युक्तयाः अनर्थकारिण्या कयापि नार्या सह विजानिः विगता जाया यस्य सः विजानिः, 'जायाया निङ्' (पा.५।४।१३४) स्वभार्यारहितः सन् रात्रिं नक्तं वसति वासं करोति तत्र राष्ट्रे अस्य धेनुः कल्याणी कल्याणमयी प्रचुरदुग्धदा वा न भवति। अनड्वान् च धुरं धुरां न सहते वोढुं न शक्नोति, भारसहो न भवतीत्यर्थः। अनः शकटं वहतीति अनड्वान् शकटवहनसमर्थो वृषभः। अनसि वहेः क्विबनसो डश्च ॥१८॥



अष्टादशं सूक्तम्

पञ्चदशर्चस्यास्य सूक्तस्य मयोभूर्ऋषिः। ब्रह्मगवी ब्राह्मणश्च देवते। प्रथमादितृचस्य षष्ठीसप्तम्योर्ऋचोः दशम्यादितृचस्य चतुर्दशी-पञ्चदश्योश्चानुष्टुप्, चतुर्थ्या भुरिक्त्रिष्टुप्, पञ्चम्यष्टमीनवमी–त्रयोदशीनाञ्च त्रिष्टुप् छन्दांसि।

'नैतां ते देवाः' इति पञ्चदशर्चं सूक्तम्। गोहरणमारणविशसनाधिश्रयण-पचनभक्षणादिषु अभिचारकामो ब्रह्मचारी 'नैतां ते देवाः,' 'अतिमात्रमवर्धन्त' इति सूक्तद्वयं 'श्रमेण तपसा' (शौ. १२।५) इत्यनुवाकं च शत्रून् अन्वाह। द्वेष्यं मनसि कृत्वा जपतीत्यर्थः। तद् उक्तं कौशिकसूत्रे–'ब्रह्मगवीभ्याम् अन्वाह। चेष्टाम् विचृतति। ऊबध्ये श्मशाने। त्रिरमून् हनस्वेत्याह। द्वितीययाश्मानम्, ऊबध्ये गूहयति। द्वादशरात्रं सर्वंव्रत उपश्राम्यति। द्विरुदिते स्तृतः। अवागग्रेण निवर्तयति' (कौ. सू. ४८।१३-२२) इति। 'नैतां ते देवाः' 'अतिमात्रम् अवर्धन्त' इति द्वे सूक्ते एका ब्रह्मगवी। 'श्रमेण तपसा' इत्यनुवाकोऽन्या। चेष्टाम्। अन्वाहेति शेषः। चेष्टा हरणमारणविशसनाद्याः। विचृतति ऊबध्ये हविः कृतेत्यर्थः। अमून् शत्रून्। द्विरुदिते द्वादशरात्राद् ऊर्ध्वं द्विः सवितुर्युद्गते नष्टः शत्रुरिति ज्ञेयम्। अवागग्रेण दण्डेन अश्मानम् ऊबध्यग्रहणात् अपनयति।

नैतां ते देवा अददुस्तुभ्यं नृपते अत्तवे।
मा ब्राह्मणस्य राजन्य गां जिघत्सो अनाद्याम् ॥१॥

पदपाठः

न। एताम्। ते। देवाः। अददुः। तुभ्यम्। नृऽपते। अत्तवे। मा। ब्राह्मणस्य। राजन्य। गाम्। जिघत्सः। अनाद्याम् ॥१॥

हे नृपते हे नृणां पते! हे नराणां पालक! ते तथोक्ताः देवा देवगणाः एताम् गां धेनुं तुभ्यम् त्वाम् अत्तवे भक्षणाय, 'अद भक्षणे' इत्यस्मात् 'तुमर्थे सेसेन्' (पा. ३।४।९) इति तवेन्प्रत्ययः। न अददुः न दत्तवन्तः भक्षणाय न प्रायच्छन्। राजन्य हे राजकुलोत्पन्न! ब्राह्मणस्य अनाद्याम् न अत्तुं योग्या अनाद्या ताम् अभक्षणीयाम् गां धेनुं मा जिघत्स अत्तुं हन्तुं वा इच्छां मा कुरु। 'अद भक्षणे'

सनिः लुङ् माङ्योगे अडभावः, गौरिति शब्देनात्र पशुः पृथिवी यज्ञः प्राणोन्नमपि गृह्यन्ते। 'इयं (पृथिवी) वै गौः' (काठ, ३७।६) 'यज्ञो वै गौः' (तै. ३।६।८।२) 'प्राणो वै गौः' (मा. शत ४।३।४।२४) 'अन्नमु गौः' (मा. शत. ७।५।२।१६) 'अन्नं वै गौः' (तै. ३।६।८।३) इत्यादि श्रुतेः। तथा च—

रश्मौ सूर्ये बलीवर्दे धेनौ भुवि च वाचि च।
वज्रेऽम्बुनि शरे स्वर्गे लोम्नि गौरिति पठ्यते॥

इति कोशः। गावस्तु सर्वदा अघ्न्याः 'मा गामनागामदितिं वधिष्ठ' (ऋ. वे. ८।१०१।१५) इति श्रुतेः॥१॥

अक्षद्रुग्धो राजन्यः पाप आत्मपराजितः।
स ब्राह्मणस्य गामद्यादद्य जीवानि मा श्वः॥२॥

पदपाठः

अक्षऽद्रुग्धः। राजन्यः। पापः। आत्मऽपराजितः। सः। ब्राह्मणस्य। गाम्। अद्यात्। अद्य। जीवानि। मा। श्वः॥२॥

अक्षद्रुग्धः अक्षार्थम् इन्द्रियार्थं जनेभ्यः द्रोग्धीति अक्षद्रुग्धः। दुहेः निष्ठायां द्रुग्धः पापः पापयुक्तः, पापः पान्त्यस्मादात्मानम् 'पा रक्षणे' 'पानीविषिभ्यः पः' (उ. ३।२३) 'भीमादयोऽपादाने' (पा. ३।४।७४) इति। यद्वा पिबति भक्षयति कर्तारम् 'पा पाने', आत्मपराजितः आत्मना स्वमनसा दुष्टवृत्तिभिर्वा पराजितः वशीकृतः राजन्यः क्षत्रियकुलोत्पन्नः सः तादृशः नृपतिः ब्राह्मणस्य गां धेनुं पृथिवीमन्नं वा अद्यात् भक्षयेत्। कथम्? अद्य अधुना ब्राह्मणस्य गां जग्ध्वा जीवानि प्राणान् धारयामि श्वः परस्मिन्नहनि न वा जीविष्यामीति स्वजीवितविषये शङ्कमानः॥२॥

आविष्टिताघविषा पृदाकूरिव चर्मणा।
सा ब्राह्मणस्य राजन्य तृष्टैषा गौरनाद्या॥३॥

पदपाठः

आऽविष्टिता। अघऽविषा। पृदाकूःऽइव। चर्मणा। सा। ब्राह्मणस्य। राजन्य। तृष्टा। एषा। गौः। अनाद्या॥३॥

हे राजन्य हे राजन्! सा ब्राह्मणस्य चर्मणा अजिनेन आविष्टिता गौः धेनुः अनाद्या अभक्षणीया भवति। तत्र दृष्टान्तः अघविषा अघं पापमेव विषं यस्यां सा, तथा आविष्टिता आविष्टिता सती तृष्टा कटुका दाहजनकस्वभावा वा पृदाकूः इव सर्पिणी इव। पृदाकूः पर्दते 'पर्द कुत्सिते शब्दे' 'पर्देर्नित्संप्रसारणमल्लोपश्च'

(उ.३।८०) इति काकुः प्रत्ययः। पिपर्तिस्वम्। पिपर्तेर्दाकुर्ह्रस्वश्च इति वा। 'ऊङुतः' (पा. ४।१।६६। इति स्त्रियामूङ्। 'पृदाकुर्वृश्चिके व्याघ्रे सर्पचित्रकयोः पुमान्' इति मेदिनी (११।१२६)।

निर्वै क्षत्रं नयति हन्ति
वर्चोऽग्निरिवारब्धो वि दुनोति सर्वम्।
यो ब्राह्मणं मन्यते अन्नमेव
स विषस्य पिबति तैमातस्य ॥४॥

पदपाठः

निः। वै। क्षत्रम्। नयति। हन्ति। वर्चः। अग्निःऽइव। आऽरब्धः। वि। दुनोति। सर्वम्। यः। ब्राह्मणम्। मन्यते। अन्नम्। एव। सः। विषस्य। पिवति। तैमातस्य ॥४॥

यः ब्राह्मणं ब्राह्मणस्य गोपृथिव्यादिकं स्वम् अन्नम् भोज्यं स्वात्मार्थे भक्षणीयं उपभोगक्षमं वा एव निश्चयेन मन्यते विजानाति सः तैमातस्य आशुविषस्य विषस्य विषं कर्मणि षष्ठी, पिबति पानं करोति। तैमातस्य तिमष्टिमष्टीम आर्द्रीभावे तिमातः छान्दसः तिमि आर्द्रीभावे इत्यस्य छान्दसः कर्त्रर्थे घञ्। तिममत्तीति 'अण् कर्मणि च' (पा. ३।३।१२) छान्दसो दकारस्य नकारः। तिमातस्य अपत्यम् 'अण्' तैमातः तस्य तैमातस्य। सः आत्मनः क्षत्रं क्षत्रियत्वं निः नयति नितरां निःशेषेण नयति दूरीकरोति, नाशं वा प्रापयति। वर्चः राज्यादिकनिमित्तं तेजः हन्ति विनाशयति। सर्वं वि दुनोति आत्मनः स्त्रीपुत्रधनादिकं सर्वं विशेषेण पीडयति। टु दु परितापे। तत्र दृष्टान्तः– आरब्धः प्रज्वलितः सुसमिद्धः अग्निः हुतभुक् इव यथा प्रदीप्तो वह्निः सर्वं भस्मीकरोति तद्वत्। तथा च स्मृतिः–'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते' इति।

य एनं हन्ति मृदुं मन्यमानो
देवपीयुर्धनकामो न चित्तात्।
सं तस्येन्द्रो हृदयेऽग्निमिन्ध
उभे एनं द्विष्टो नभसी चरन्तम् ॥५॥

पदपाठः

यः। एनम्। हन्ति। मृदुम्। मन्यमानः। देवऽपीयुः। धनऽकामः। न। चित्तात्। सम्। तस्य। इन्द्रः। हृदये। अग्निम्। इन्धे। उभे इति। एनम्। द्विष्टः। नभसी इति। चरन्तम् ॥५॥

यः देवपीयुः देवानां द्योतमानानां ब्राह्मणानां वा बाधकः पीयतिर्वधकर्मा । **धनकामः** धनम् एव कामः यस्य सः वित्तलोभी **न चित्तात्** विना विचारेण, अज्ञानात् **एनम्** ब्राह्मणम् **मृदु** तैक्ष्ण्यरहितं निर्बलं च **मन्यमानः** जानानः **हन्ति** धनधान्यादिक-ब्राह्मणस्वापहरणेन पीडयति **इन्द्रः तस्य ब्रह्मद्विषः हृदये** मनसि **अग्निं** परितापं **सम्** सम्यक् तथा **इन्धे** प्रज्वलयति प्रदीपयति । **उभे च नभसी** द्वावपि द्यावापृथिव्यौ **चरन्तम्** पृथिव्यां विचरन्तम् एनं देवपीयुं **द्विष्टः** द्वेषं कुरुतः ।

न ब्राह्मणो हिंसितव्योऽग्निः प्रियतनोरिव ।
सोमो ह्यस्य दायाद इन्द्रो अस्याभिशस्तिपाः ॥६॥

पदपाठः

न । ब्राह्मणः । हिंसितव्यः । अग्निः । प्रियतनोःऽइव । सोमः । हि । अस्य । दायादः । इन्द्रः । अस्य । अभिशस्तिऽपाः ॥६॥

प्रियतनोरिव प्रियाः तनुः यस्य तादृशेन जनेन यथा **अग्निः न हिंसितव्यः** तथैव तेन **ब्राह्मणः** अपि **न हिंसितव्यः** न हननीयः । **हि** यतः **अस्य** ब्राह्मणस्य **सोमः** तन्नामको देवः **दायादः** सपिण्डः, दायादः दायमत्ति, अद भक्षणे 'कर्मण्यण्' (पा० ३।२।१) । यद्वा आदत्ते 'डुदाञ् दाने' 'आतश्चोपसर्गे' (पा० ३।१।१३६) इति कः । दायस्य आदः । 'दायादस्तु भवेत्पुंसि सपिण्डे तनयेऽपि च' इति कोशः । 'ब्रह्मणो वा एतत्तेजो यत्सोमः ।' (का० १४।६) 'सोमो वै ब्राह्मणः' (काठ० ११।५) इत्यादिश्रुतेः सोमस्य दायादत्वं सिध्यति । **इन्द्रः** च **अस्य** ब्राह्मणस्य **अभिशस्तिपाः** अभितो विशसनं हिंसा तन्निमित्ताद् भयात् पाता पालकः । गवाम् अभिशस्तिपात्वं द्वितीयकाण्डे त्रयोदशसूक्ते तृतीयमन्त्रभाष्ये प्रपञ्चितं तत् ततोऽवगन्तव्यम् ।

शतापाष्ठां नि गिरति तां न शक्नोति निःखिदम् ।
अन्नं यो ब्रह्मणां मल्वः स्वाद्वद्मीति मन्यते ॥७॥

पदपाठः

शतऽअपाष्ठाम् । नि । गिरति । ताम् । न । शक्नोति । निःऽखिदम् । अन्नम् । यः । ब्रह्मणाम् । मल्वः । स्वादु । अद्मि । इति । मन्यते ॥७॥

यः मल्वः मूर्खो मलिनमनस्को वा **ब्रह्मणां** ब्राह्मणस्य **अन्नं** गवादिरूपं ब्रह्मस्वं **स्वादु** स्वादिष्ठम् **अद्मि** खादामि **इति मन्यते** मनसि विचारयति हृदि वावधार्यते स **तां** ब्रह्मणः संपत्तिम्, वित्तरूपां वा गाम्, **शतापाष्ठां** शतं अपाष्ठाः कण्टकाः यस्यां सा तां शतकण्टकां बहुकण्टकाकीर्णां **नि गिरति** भक्षयति गलादधः उत्तारयति तथापि **निःखिदं** खेदरहितं यथा स्यात्तथा **न शक्नोति** धारयितुं समर्थो न भवति ।

जिह्वा ज्या भवति कुल्मलं वाङ्नाडीका
दन्तास्तपसाभिदिग्धाः ।
तेभिर्ब्रह्मा विध्यति देवपीयून्
हृद्बलैर्धनुर्भिर्देवजूतैः ॥८॥

पदपाठः

जिह्वा । ज्या । भवति । कुल्मलम् । वाक् । नाडीकाः । दन्ताः । तपसा । अभिऽदिग्धाः । तेभिः । ब्रह्मा । विध्यति । देवऽपीयून् । हृत्ऽबलैः । धनुःऽभिः । देवऽजूतैः ॥८॥

ब्रह्मा कथं देवपीयून् विध्यतीत्याह– अस्य ब्रह्मणः जिह्वा रसना 'लिह आस्वादने' 'शेवयह्वजिह्वा०' (उ. १।१५४) इति साधुः । ज्या मौर्वी शिञ्जिनी वा भवति तस्य वाक् वाणी कुल्मलं धनुर्दण्डः भवति । तपसाभिदिग्धाः तपोमयेन विषेण अभिदिग्धाः रञ्जिताः दन्ताः नाडीकाः नालिकानामास्त्रविशेषाः भवन्तीति शेषः । अथवा तपोमयेनाग्निना लिप्ताः इति । तेभिः पूर्वोक्तज्यादण्डनालिकादिभिः देवजूतैः देवेन सृष्टैः प्रेरितैः हृद्बलैः हृदयमेव बलं तैः धनुर्भिः शरासनैः ब्रह्मा ब्राह्मणः देवपीयून् देवद्विषः विध्यति विनाशयति । नाडिकं नालिकम्, डलयोरभेदः । नालः कार्यसाधनत्वेनास्ति अस्य इति । 'अतः इनिठनौ' (पा० ५।२।११५) इति ठन् । अस्त्रविशेषः । तथा च--

अस्त्रं तु द्विविधं ज्ञेयं नालिकं मान्त्रिकं तथा ।
यदा तु मान्त्रिकं नास्ति नालिकं तत्र धारयेत् ॥
नालिकं द्विविधं ज्ञेयं बृहत्क्षुद्रप्रभेदतः ॥

इति शुक्रनीतौ । धनुर्भिः धनुः धनति 'धन शब्दे' 'अर्तिपृवपि०' (उ. २।११७) इत्युस्, तैः ।

तीक्ष्णेषवो ब्राह्मणा हेतिमन्तो
यामस्यन्ति शरव्यां न सा मृषा ।
अनुहाय तपसा मन्युना चोत
दूरादव भिन्दन्त्येनम् ॥९॥

पदपाठः

तीक्ष्णऽइषवः । ब्राह्मणाः । हेतिऽमन्तः । याम् । अस्यन्ति । शरव्याऽम् । न । सा । मृषा । अनुऽहाय । तपसा । मन्युना । उत । दूरात् । अव । भिन्दन्ति । एनम् ॥९॥

'ब्राह्मणाः कथं दूरादेव देवपीयून् घ्नन्तीत्याह– **तीक्ष्णेषवः** तीक्ष्णाः इषवः येषां ते तीक्ष्णेषवः, निशितशरयुताः । तेजयतीति तीक्ष्णम् । तिज निशाने 'तिजेर्दीर्घश्च' (उ० ३।१८) इति क्स्नः । 'तीक्ष्णं सामुद्रलवणे विषलोहाजिमुष्कके । क्लीवं यवाग्रजे पुंसि तिग्मात्मत्यागिनोस्त्रिषु' इति मेदिनी । इष्यतेऽनेनेति इषुः 'इष गतिहिंसादर्शनेषु' 'इषेः किच्च' (उ०१।१३) इत्युः, आदेरिच्च । **हेतिमन्तः** हेतिः हननसाधनं येषामस्ति ते हेतिमन्तः । हेतिः हन्ति हिनोति वा । हन्यतेऽनया वा । 'ऊतियूतिजूतिसातिहेतिकीर्तयश्च ।' (पा० ३।३।१७) इति क्तिनि एत्वम् । यद्वा हेतिः आयुधनामैतत् । हन्ति अनयेति । प्रहीयते प्रक्षिप्यते इति वा हेतिः । **ब्राह्मणाः यां शरव्याम्** आयुधसंहतिम् । शरूणां हिंसकानाम् आयुधानां संहतिः शरव्या ताम् अथवा शरव्यं लक्ष्यं स्यात् । 'लक्षं लक्ष्यं शरव्यं च' इत्यमरः । ताम् अभिमुखीकृत्य **अस्यन्ति** क्षिपन्ति सा **न मृषा** न वृथा, व्यर्थत्वं न भजते । लक्ष्यमवश्यमेव विध्यतीति भावः । कस्मादित्याह **तपसा** व्रतनियमादिना, तपन्त्यस्मिन्निति तपः 'सर्वधातुभ्योऽसुन्' (उ० ४।१८१) सान्तः । 'तपो लोकान्तरेऽपि च । चान्द्रायणादौ धर्मे च पुमान्‌ शिशिरमाघयोः' इति मेदिनी । **मन्युना** क्रोधेन 'मन ज्ञाने' 'मनिजनिदसिभ्यो युः' (उ०३।२०) । 'मन्युर्दैन्ये क्रतौ क्रुधि' इति कोशः । तपसा मन्युना तपोमयेनोग्रेण क्रोधेन, तपःपूतेन क्रतुना च **अनुहाय** अनुहवं कृत्वा, पश्चादनुसरणं कृत्वा, पुरोगच्छतः पुरुषस्य नाम गृहीत्वा पश्चाद्भागावस्थायिना पुरुषेण आह्वानम् अनुहवः । तद्वत् शत्रूणां नाम अभिलक्ष्य पश्चादनुसरणं कृत्वा **दूरात्** दूरतः एव **अवभिन्दन्ति** विदारयन्ति विनाशयन्तीत्यर्थः ।

ये सहस्रमराजन्नासन् दशशता उत ।
ते ब्राह्मणस्य गां जग्ध्वा वैतहव्याः पराभवन् ॥१०॥

पदपाठः

ये । सहस्रम् । अराजन् । आसन् । दशऽशताः । उत । ते । ब्राह्मणस्य । गाम् । जग्ध्वा । वैतऽहव्याः । परा । अभवन् ॥१०॥

ये ते **वैतहव्याः** वीतहव्यस्य अपत्यानि पुमांसः, वैतहव्याः, 'तस्यापत्यम्' (पा० ४।१।९२) इत्यण् । **उत दशशताः** दश च तानि शतानि च, दशानां राज्ञां शतानि सहस्रसंख्यकाः । **सहस्रम्**, सहस्रमिति बहुनाम । ते अनेकैः प्रकारैः **अराजन्** अशोभन्त । तत्रेतिहासमाचक्षते मनोः शर्यातिः वंशे वत्साभिधानो राजा बभूव । तस्य द्वौ पुत्रौ हैहयस्तालजंघश्च । हैहयस्यैव वीतहव्यः इति अपरं नाम **आसीत्** । तस्य वंशजाः सहस्रसंख्यकाः आसन् । ते च सर्वे **ब्राह्मणस्य** महर्षेः जमदग्नेः **गां जग्ध्वा** हत्वा तस्याः क्षीरादिकम् उपभुज्य **पराभवन्** पराभूता बभूवुः । उक्तं च–

स एकदा तु मृगयां विचरन् विपिने वने ।
यदृच्छयाऽऽश्रमपदं जमदग्नेरुपाविशत् ॥

तस्मै स नरदेवाय मुनिरर्हणमाहरत् ।
ससैन्यामात्यवाहाय हविष्मत्या तपोधनः ॥
स वीरस्तत्र तद् दृष्ट्वा आत्मैश्वर्यातिशायनम् ।
हविर्धानीमृषेर्दर्पान्नरान् हर्तुमचोदयत् ।
ते च माहिष्मतीं निन्युः सवत्सां क्रन्दतीं बलात् ॥ इति ॥

(श्रीमद्भागवत० ६, १५, २३-२६)

पश्चात्परशुरामेण सर्वे हैहयाः युधि निहताः, निरयं च ते गताः इति प्रसिद्धम् ।

गौरेव तान् हन्यमाना वैतहव्याँ अवातिरत् ।
ये केसरप्राबन्धायाश्चरमाजामपेचिरन् ॥११॥

पदपाठः

गौः । एव । तान् । हन्यमाना । वैतऽहव्यान् । अव । अतिरत् । ये । केसरऽप्राबन्धायाः । चरमऽअजाम् । अपेचिरन् ॥११॥

ये केसरप्राबन्धायाः तन्नाम्न्याः स्त्रियः **चरमाजाम्** अन्तिमां छागीम् । अजा अज गतौ 'पचाद्यच्' (पा० ३-१-१३४) 'अजाविभ्याम्' (पा० ५-१-८) इति निर्देशान्न वी । 'अजाद्यतष्टाप्' (पा० ४-१-५) 'आजश्छागे हरे विष्णौ रघुजे वेधसि स्मरे ।' इति कोशः । **अपेचिरन्** अपचन्त भक्षणायेति शेषः । पश्चात् **हन्यमाना** ताड्यमाना **गौः एव तान् वैतहव्यान्** वीतहव्यस्यापत्यानि तान् **अवातिरन्** पराभवत् व्यनाशयत् । 'तॄ हिंसायाम्' अव आपूर्वस्य तिरतेः लङि रूपम् ।

एकशतं ता जनता या भूमिर्व्यधूनुत ।
प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥१२॥

पदपाठः

एकऽशतम् । ताः । जनताः । याः । भूमिः । विऽअधूनुत । प्रऽजाम् । हिंसित्वा । ब्राह्मणीम् । असम्ऽभव्यम् । परा । अभवन् ॥१२॥

याः एकशतं जनताः जनानां समूहः 'ग्रामजन०' (पा० ४-२-४२) इति तल् । जना राजन्याः । 'वीतहव्यस्य दश राज्ञ्यः आसन् । ताश्च प्रत्येकं दश दश पुत्रान् प्रसूतवत्यः । एवं शतं पुत्रास्तस्यासन् इति श्रूयते । ताः एकशतं जनताः पापान् राजपुत्रान् **भूमिः** पृथ्वी **व्यधूनुत** शरीरं प्रकम्प्य विधूतवती । पृथ्वी पापिनो विधुनोतीति प्रसिद्धम् । यद्वा ते राजकुमाराः स्वपराक्रमैः भूमिं व्यधुन्वन् विभक्तिव्यत्ययः छान्दसः । ते तादृशाः पापाः पराक्रमशीलाः वा **ब्राह्मणीं** ब्रह्मणः इयं ब्राह्मणी तां **प्रजां** ब्राह्मणस्य प्रजां सन्ततिं गवादिसहितां **हिंसित्वा** विनाश्य **असम्भव्यम्** न सम्भाव्यं यथा स्यात्तथा कल्पनापथातीतं **पराभवन्** पराजिताः आसन् व्यनश्यन्त ।

देवपीयुश्चरति मर्त्येषु
गरगीर्णो भवत्यस्थिभूयान् ।
यो ब्राह्मणं देवबन्धुं हिनस्ति
न स पितृयाणमप्येति लोकम् ॥१३॥

पदपाठः

देवऽपीयुः । चरति । मर्त्येषु । गरऽगीर्णः । भवति । अस्थिऽभूयान् । यः । ब्राह्मणम् । देवऽबन्धुम् । हिनस्ति । न । सः । पितृऽयानम् । अपि । एति । लोकम् ॥१३॥

देवपीयुः देवानां पीयुः, देवानां द्योतमानानां वा ब्राह्मणानां बाधकः । **मर्त्येषु** मानवेषु । मर्त्याः म्रियते, मृङ् प्राणत्यागे 'हसिमृग्रिण्०' (उ. ३-८६) इति तन् । स्वार्थे यत् (वा. ५-४-३६) । **गरगीर्णः** गरं विषं गीर्णं पीतं येन तादृशः **गरगीर्णः** इव भुक्तविषः इव **चरति** गच्छति सः **अस्थिभूयान्** भूयांसि अस्थीनि यस्य सः तादृशः, अस्थिपञ्जरमात्रावशेषः **भवति** **यः** देवपीयुः **देवबन्धुं** देवाः इन्द्रादयो बन्धवः हितैषिणः यस्य तम् अथवा देवानां बन्धुं होमादिभिः बन्धुवद् वर्धयितारं **ब्राह्मणम्** **हिनस्ति** हन्ति सः **पितृयाणम्** पितरो यान्ति अनेन पथा इति, पित्र्यः लोकः इति पितृयाणः । करणे ल्युट् तं पितृयाणम् । द्विविधो हि मार्गः देवयानः पितृयाणः इति । देवलोकप्राप्तिसाधनभूतो देवयानः । पितृलोकप्रापकः पितृयाणः । तम् **अपि** **लोकं न एति**, स देवपीयुः तत्र न गच्छति । तस्य देवपीयुत्वाद् देवयानं तु पूर्वमेव नष्टम् । तस्य ब्रह्मस्वघातकत्वात् पितृयाणमपि न तस्य सम्भवति । इत्थं लोकद्वयगमनमार्गनाशादत्रैव तस्य पुनरपि जननं पुनरपि मरणमेवापतितमित्यर्थः ।

अग्निर्वै नः पदवायः सोमो दायाद उच्यते ।
हन्ताभिशस्तेन्द्रस्तथा तद् वेधसो विदुः ॥१४॥

पदपाठः

अग्निः । वै । नः । पदऽवायः । सोमः । दायादः । उच्यते । हन्ता । अभिऽशस्ता । इन्द्रः । तथा । तत् । वेधसः । विदुः ॥१४॥

ऋषिः आत्मार्थे कथयति— **अग्निः** वैश्वानरः **वै** निश्चयेन **अस्माकम्** ब्राह्मणानां **पदवायः** मार्गदेशिकः, पथप्रदर्शकः । **सोमः** च अस्माकं **दायादः** सपिण्डः **उच्यते** कथ्यते **इन्द्रः** **अभिशस्ता** अभिशंसेः निष्ठा, आम्-लोपश्छान्दसः । अभिशस्तॄणां हिंसकानां पापानां **हन्ता** वधकर्ता **तथा** इति **तत्** एतत् जनाः मन्वादयः **वेधसः** ब्रह्मणः सकाशात् **विदुः** जानन्ति । यद्वा विद्वांस एतद् विदुः जानन्ति ।

इषुरिव दिग्धा नृपते पृदाकूरिव गोपते ।
सा ब्राह्मणस्येषुर्घोरा तया विध्यति पीयतः ॥१५॥

पदपाठः

इषुःऽइव । दिग्धा । नृऽपते । पृदाकूःऽइव । गोऽपते । सा । ब्राह्मणस्य । इषुः । घोरा । तया । विध्यति । पीयतः ॥१५॥

पुनः राजानमुद्दिश्य कथयति– **नृपते** हे राजन् ! **सा** ब्राह्मणस्य वाणी पूर्वोक्ता **घोरा** मूर्तिमती भयङ्करा इषुः इषुरेव, शर एव । लिङ्गव्यत्ययश्छान्दसः । सा च पुनः **दिग्धा** विषमयी **पृदाकूः इव** सर्पिणी इव । हे **गोपते** ! पश्वादीनां पतिः तत्सम्बुद्धौ यद्वा गोः पृथिव्याः पतिः गोपतिः तत्सम्बोधनम् । हे पृथ्वीपालक ! 'विपुला गह्वरी धात्री गौरिला कुम्भिनी क्षमा । भूतधात्री रत्नगर्भा जगती सागराम्बरा' इति कोशः । **पीयतः** देवब्राह्मणादीनां बाधकान् **विध्यति** लक्ष्यं करोति हन्तीत्यर्थः । तथा च महाभारते--

सर्वान्नो द्विषतस्तात ब्राह्मणा जातमन्यवः ।
गीर्भिर्दारुणमुक्ताभिरभिहन्युरपूजिताः ॥ इति ॥



एकोनविंशं सूक्तम्

पञ्चदशर्चस्यास्य सूक्तस्य मयोभूर्ऋषिः । ब्रह्मगवी ब्राह्मणश्च देवते । प्रथमर्चस्तृतीयादिचतसृणामष्टम्याद्यष्टानाञ्चानुष्टुप्, द्वितीयाया विराट् पुरस्ताद्बृहती, सप्तम्याश्चोपरिष्टाद्बृहती छन्दांसि । पूर्वसूक्तेन सह उक्तो विनियोगः ।

अतिमात्रमवर्धन्त नोदिव दिवमस्पृशन् ।
भृगुं हिंसित्वा सृञ्जया वैतहव्याः पराभवन् ॥११॥

पदपाठः

अतिऽमात्रम् । अवर्धन्त । न । उत्ऽइव । दिवम् । अस्पृशन् । भृगुम् । हिंसित्वा । सृन्ऽजयाः । वैतऽहव्याः । परा । अभवन् ॥१॥

ब्रह्मस्वापहरणेन किमनिष्टं भवतीति ऋषिर्मयोभूः सोदाहरणं प्रस्तौति । **वैतहव्याः** वीतहव्यस्यापत्यानि पुमांसः **सृञ्जयाः** सृञ्जयस्य गोत्रापत्यानि पुमांसः । सृञ्जयेन चान्द्रवंशस्तुर्वसुः पुत्रीकृत आसीत् । तथा च श्रुतिः–'स सृञ्जयाय तुर्वशं परादात्' (ऋ. ६।२८।१) इति । **अतिमात्रम्** मात्रामतिक्रम्य यथास्यात्तथा, अत्यन्तम् **अवर्धन्त** वृद्धिं प्राप्नुवन् । स्वौद्धत्येनाकाशं स्पृशन्त इवेति भावः । तत्र दृष्टान्तः । **न दिवम् उत् अस्पृशन् इव** । स्वर्गस्य उच्चैः स्पर्शं न कृतवन्त इव । तादृशाः स्वपराक्रमैः साक्षात्स्वर्गस्पर्शनात् किञ्चिदेव ऊना अभवन्नित्यर्थः । **दिवम्**

द्युलोकमन्तरिक्षं वा। दीव्यन्त्यस्यामिति बाहुलकात् (पा० ३।३।१) दिवेः दिवि। 'द्यौः स्त्री स्वर्गे गगनं दिवं क्लीबं तयोः स्मृतम्' इति मेदिनी (१५८।११)। तादृशास्ते सृञ्जयकुलोत्पन्ना वीतहव्यस्य पुत्राः **भृगुम्** ऋषिं भृगुं 'भृगुर्भृज्यमानो न देहे अङ्गारेषु' (नि० ३।१७) इति निरुक्तम्। तत्रेतिहासमाचक्षते–एकदा प्रजापतिना किल शुक्रमात्मीयमादाय अग्नौ हुतम्। ततः अर्चिषि भृगुः सम्बभूव। अङ्गारेषु पतितमपि तमग्निः न देहे, न ददाह। तथा च ब्राह्मणम्— तस्य (प्रजापतेः) यद् रेतसः प्रथममुददीप्यत तदसावादित्योऽभवत्, यद् द्वितीयमासीत्तद् भृगुरभवत्तं वरुणो न्यगृह्णीत तस्मात्स भृगुर्वारुणिः' (ऐ. ब्रा. ३।३४) यद्वा भृगुः अत्र गोत्रवाची। भृगुं भृगुवंशजातं जमदग्निं हत्वा ते **पराभवन्** पराबभूवुः, विनाशं गता इत्यर्थः। अत्र पुराणम्–

"एकदाश्रमतो रामे सभ्रातरि वनं गते।
वैरं सिसाधयिषवो लब्धच्छिद्रा उपागमन्॥
दृष्ट्वाग्न्यागार आसीनमावेशितधियं मुनिम्।
भगवत्युत्तमश्लोके जघ्नुस्ते पापनिश्चयाः॥
प्रसह्य शिर उत्कृत्य निन्युस्ते क्षत्रबन्धवः॥"(महा. अनु. १६।१२)

ये बृहत्सामानमाङ्गिरसमार्पयन् ब्राह्मणं जनाः।
पेत्वस्तेषामुभयादमविस्तोकान्यावयत्॥२॥

पदपाठः

ये। बृहत्ऽसामानम्। आङ्गिरसम्। आर्पयन्। ब्राह्मणम्। जनाः। पेत्वः। तेषाम्। उभयादम्। अविः। तोकानि। आवयत्॥२॥

ये जनाः मनुष्याः **बृहत्सामानम्** बृहत् साम यस्य तम्। 'चत्वार्यह वैव सामानि राथन्तरं बार्हतं राथन्तरबार्हतं बार्हतराथन्तरम्' (जै० १।३०८) 'भरद्वाजस्य वा एतदार्षेयं यत् बृहत् (साम)' (जै० ब्रा० ३।२०।२२) इति श्रुतिः। **बृहत्सामानम्** एतन्नामकं साम जानन्तं गायन्तं वा, बृहत्साम्नः गानं रक्षसामपहन्त्यै भवति 'यद् बृहद्रथन्तरे अभितो गायते रक्षसामपहन्त्यै' (मै. ३।५।३) इति ब्राह्मणम्। यद्वा एतन्नामानं ब्राह्मणम्। 'साम सम्मितमृचास्यतेवर्चा समं मेन इति नैदानाः' (नि० ७।१२) इति निरुक्तम्। **आङ्गिरसम्** अङ्गिरसः अपत्यं पुमानाङ्गिरसः तम्। **आर्पयन्** अपीडयन्, अर्तेः ण्यन्तस्य लङि रूपम्। तेषां **तोकानि** अपत्यानि। 'तोकमित्यपत्यनाम' (निघण्टुः) 'तोकम् तुद्यतेः' (नि० १०।७) 'स हि नित्यं पित्रा विनयता तुद्यते इदं कुर्विदं मा कार्षीरिति।' यद्वा तोकम् 'तुद व्यथने' 'पुंसि संज्ञायां घ.०' (पा० ३।३।११८) पृषोदरादित्वाद् दकारस्य वकारः। तुद्यतेऽनेन माता गर्भवासकाले तुद्यते व्याध्यादिभिरिति पेत्वः अविः हिंसकः मेषः। **उभयादम्** उभाभ्यां दन्ताभ्यां अत्ति इति उभयादः तम्, यद्वा उभयादं उभयादतः ऊर्ध्वाधोभाग-

योरुभयोः दन्तयुक्ताः पशवः। तादृशम् उभाभ्याम् अदन्तम्। ते च यज्ञात् जाताः। तद्यथा 'तस्मादश्वा अजायन्त ये के चोभयादतः (ऋ० १०।९०।१०) इति श्रुतिः। आवयत् अन्नमिवाकरोत्, अभक्षयदित्यर्थः। 'अव इति अन्ननाम' (निघण्टुः २।७।९) अव रक्षणे असुन्। ईश्वरस्य महिम्नोऽधिकत्वात् पेत्वेन सिंहोऽपि भक्षितः। तथा च श्रुतिः 'सिंह्यं चित्पेत्वेना जघान' (ऋ. ७।१८।१७) इति। किं पुनः मानवानां ब्रह्मस्वघातिनां तोकानि।

ये ब्राह्मणं प्रत्यष्ठीवन्
ये वास्मिञ्छुल्कमीषिरे।
अस्नस्ते मध्ये कुल्यायाः
केशान् खादन्त आसते ॥३॥

पदपाठः

ये। ब्राह्मणम्। प्रतिऽअष्ठीवन्। ये। वा। अस्मिन्। शुल्कम्। ईषिरे। अस्नः। ते। मध्ये। कुल्यायाः। केशान्। खादन्त। आसते ॥३॥

ये ब्रह्मस्वघातिनः ब्राह्मणं प्रत्यष्ठीवन् थूत्कारादिना पर्यभवन्। ष्ठीव निरसने लुङ्। वा अथवा ये ब्रह्मघातिनः अस्मिन् ब्राह्मणे शुल्कम् करं शुल्कम् शुल्क्यते, शुल्क अतिसर्जने 'अकर्तरि च कारके संज्ञायाम्' (पा० ३।३।१९) इति भावे घञ्। ईषिरे ब्राह्मणादपि करमादातु ईषुः, ते अस्नः रुधिरस्य। असृज् अस्यते। असु क्षेपणे वाहुलकाट्टजः, न सृजति वा। सृज विसर्गे क्विप्। 'क्विन्प्रत्ययस्य' (पा०-८।२।२२) इति कुः। 'क्विन् प्रत्ययो यस्मात्' इति बहुव्रीहिः। 'ऋत्विग्दधृक्०' (पा० ३।२।५९) इति सृजेः क्विन् विहितः। कुल्यायाः नदीप्रणाल्याः, कुल्या कुले प्राणिगणे कुटुम्बे दाम्पत्ये वा साधुः। 'तत्र साधुः' (पा० ४।४।९८) इति यत्। 'कुल्याल्पा कृत्रिमा सरित्' इति कोशः, कृत्रिमा रुधिरसरित् तस्या मध्ये केशान् मूर्धजान् स्वमूर्धजानित्यर्थः, खादन्तः भक्षयन्तः आसते तिष्ठन्ति। आसते, आस उपवेशने अदादित्वात् शपो लुक्। ते ब्रह्मस्वघातिनः क्षुधातुराः घोरातिवीरां नरकयातनामनुभवन्तीत्यर्थः।

ब्रह्मगवी पच्यमाना यावत् साभि विजङ्गहे।
तेजो राष्ट्रस्य निर्हन्ति न वीरो जायते वृषा ॥४॥

पदपाठः

ब्रह्मऽगवी। पच्यमाना। यावत्। सा। अभि। विऽजङ्गहे। तेजः। राष्ट्रस्य। निः। हन्ति। न। वीरः। जायते। वृषा ॥४॥

पच्यमाना कषादिभिः ताड्यमाना सा तथोक्ता **ब्रह्मगवी** ब्राह्मणस्य धेनुः ब्रह्मणः संपत्तिर्वा **यत्र राष्ट्रे अभि** अभितः **विजङ्गहे** विशेषण बलात्कारेण गृह्यते 'गृह ग्रहण' लिटि आर्षं रूपम्। सा **तस्य राष्ट्रस्य** राज्यस्य राष्ट्रं, राजृ दीप्तौ ष्ट्रन् (उ. ४-१५९) तेजः दीप्ति **निहन्ति** नितरां हन्ति सर्वथा विनाशयति। **तत्र** तस्मिन् राष्ट्रे **वृषा** बलिष्ठः श्रेष्ठो वा। वृषा वर्षति इति। वृष सेचने 'कनिन् यु वृषि' (उ० १।१५६) इति कनिन्। **वीरः** शूरः भटो वा। वीरः वीरयति इति। वीर विक्रान्तौ चुरादिः। पचाद्यच् (पा० ३।१।१३४) यद्वा विशेषण ईर्ते ईरयति वा। ईर गतौ कः (पा० ३।१।१३५) वीरो जिने भटे श्रेष्ठे' इति कोशः। **न जायते** नोत्पद्यते।

क्रूरमस्या आशसनं तृष्टं पिशितमस्यते।
क्षीरं यदस्याः पीयते तद् वै पितृषु कल्बिषम् ॥५॥

पदपाठः

क्रूरम्। अस्याः। आऽशसनम्। तृष्टम्। पिशितम्। अस्यते। क्षीरम् यत्। अस्याः। पीयते। तत्। वै। पितृषु। किल्बिषम् ॥५॥

अस्याः ब्रह्मणः धेन्वाः **आशसनं** हिंसा, शसु हिंसायाम् आसमन्तात् शसनम् आसनम्, **क्रूरं** नृशंसम्। क्रूरम्, कृन्तति। कृती छेदने कृतेश्छः क्रू च' (उ० २।२१) इति रक्प्रत्ययो धातोः क्रू—आदेशश्च। 'क्रूरस्तु कठिने धीरे नृशंसे' इवि कोशः। **पिशितं** मांसं **तृष्टं** तृषाकारकम्, दाहजनकस्वभावम्। अतः कारणात् **अस्यते** क्षिप्यते असुक्षेपने, **यत् अस्याः** हृतायाः ब्रह्मणः धेन्वाः **क्षीरं** दुग्धम् **पीयते तत्** तदेव **वै** निश्चयेन **पितृषु** पूर्वपुरुषेषु **किल्बिषं** पापम्। भवतीति शेषः। किल्बिषम्, केलयति क्रीडयति विषयेषु। किल श्वैत्यक्रीडनयोः। किलेर्बुक् च (उ० ३।१५०) इति टिषच् बुगागमश्च। 'किल्विषं पापरोगयोः, अपराधेऽपि च' इति कोशः। या अपहृता ब्रह्मगवी तस्याः मांसं दुग्धं वा न केवलं अपहर्तुः किन्तु तस्य पूर्वजानां कृतेऽपि अनिष्टकारकं भवति। अहो! अनेन गवापहरणेन पितॄणामपि नाम दूषितम् इति जनापवादो जायते। अतस्तस्याः अपहरणं पीडनं वा न कदापि कार्यम्।

उग्रो राजा मन्यमानो ब्राह्मणं यो जिघत्सति।
परा तत् सिच्यते राष्ट्रं ब्राह्मणो यत्र जीयते ॥६॥

पदपाठः

उग्रः। राजा। मन्यमानः। ब्राह्मणम्। यः। जिघत्सति। परा। तत्। सिच्यते। राष्ट्रम्। ब्राह्मणः। यत्र। जीयते ॥६॥

यः राजा नृपतिः क्षत्रियो वा । राजति 'कनिन् युवृषि' (उ० १।१५६) इति कनिन् । 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ' इति मेदिनी (६१।१३५) **उग्रः** उद्‌गूर्णक्रोधः, उच्यति क्रुधा समवैति उग्रः । ऊच समवाये 'ऋज्रेन्द्राग्रवज्रविप्र०' इत्यादिना रन् गश्चानन्तादेशः । **मन्यमानः** जानानः **ब्राह्मणं** ब्राह्मणस्य गोस्त्रीपुत्रादिरूपं ब्रह्मस्वं वा **जिघत्सति** अत्तुं हन्तुं वा इच्छति । 'लुङ्सनोघस्लृ' (पा० २।४।३७) इति सनि अदः घस्लृ-आदेशः । **तत्** राष्ट्रं देशः प्रजा वा 'राष्ट्राणि वै विशः' (ऐ० ब्रा० ८।२६) इति श्रुतिः । **परासिच्यते** विनश्यति परापूर्वस्य सिचेः कर्मणि लट् । **यत्र** यस्मिन् राष्ट्रे **ब्राह्मणः** ब्रह्मस्वापहरणेन **जीयते** क्षीयते । ज्या वयोहानौ ।

अष्टापदी चतुरक्षी चतुःश्रोत्रा चतुर्हनुः ।
द्व्यास्या द्विजिह्वा भूत्वा सा
राष्ट्रमव धूनुते ब्रह्मज्यस्य ॥७॥

पदपाठः

अष्टाऽपदी । चतुःऽअक्षी । चतुःऽश्रोत्रा । चतुःऽहनुः । द्विऽआस्या । द्विऽजिह्वा । भूत्वा । सा । राष्ट्रम् । अव । धूनुते । ब्रह्मज्यस्य ॥७॥

सा ब्राह्मणस्य दूयमाना गौः **ब्रह्मज्यस्य** ब्राह्मणघातिनः ब्रह्म जीनातीति ब्रह्मज्यस्तस्य, ज्या वयोहानौ । **राष्ट्रम्** राज्यम् **अष्टपदी** अष्टौ पादाः यस्याः सा, **चतुरक्षी** चत्वारि अक्षीणि यस्याः सा, **चतुःश्रोत्रा** चत्वारि श्रोत्राणि यस्याः सा, **चतुर्हनुः** चत्वारः हनवः यस्याः सा, **द्वास्या** द्वे आस्ये यस्याः सा, **द्विजिह्वा** द्वे जिह्वे यस्याः सा, तादृशी भूत्वा ब्राह्मणस्य गौः **अवधूनुते** प्रकम्पयति, धूञ् कम्पने स्वादिः । गौः प्रायश्चतुष्पदी द्व्यक्षी द्विश्रोत्री द्विहनुः एकास्या एकजिह्वा च लोके भवति । अत्र यत्तस्या द्विगुणाङ्गवर्णनं कृतं तत्तु स्वमहिम्ना सा द्विगुणशक्तिमती भूत्वा तादृशं राष्ट्रं विनाशयति इति द्योतयितुमेव ।

तद् वै राष्ट्रमा स्रवति नावं भिन्नामिवोदकम् ।
ब्रह्माणं यत्र हिंसन्ति तद् राष्ट्रं हन्ति दुच्छुना ॥८॥

पदपाठः

तत् । वै । राष्ट्रम् । आ । स्रवति । नावम् । भिन्नाम्ऽइव । उदकम् ब्रह्माणम् । यत्र । हिंसन्ति । तत् । राष्ट्रम् । हन्ति । दुच्छुना ॥८॥

यत्र यस्मिन् राष्ट्रे ब्रह्मघातिनः **ब्राह्मणं** तस्य पशुधनधान्यादिकं **हिंसन्ति** बलादाच्छिन्दन्ति तत् राष्ट्रं राज्यं प्रजा वा **दुच्छुना** दुष्टं शुनं सुखम् अस्याम्, वा

श्वेव दुष्टेति दुच्छुना अनिष्टकारिणी पापदेवता हन्ति विनाशयति तद् तत्र कृतो ब्रह्मघातः वै निश्चयेन राष्ट्रं राज्यं आस्रवति निमज्जयति । तत्र दृष्टान्तः, उदकं जलं भिन्नां भग्नां नावं तरीम् इव । उदकम् उत्तत्ति 'उन्दी क्लेदने'• 'उदकं च०' (उ० २।३९) इत्यादि सूत्रेण साधु । यथा भग्नं पोतं जले निमज्जति तद्वत् सर्वमेव ब्रह्मगवीपीडनपापे निमज्जतीत्यर्थः ।

तं वृक्षा अप सेधन्ति छायां नो मोपगा इति ।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते ॥९॥

पदपाठः

तम् । वृक्षाः । अप । सेधन्ति । छायाम् । नः । मा । उप । गाः । इति । यः । ब्राह्मणस्य । सत् । धनम् । अभि । नारद । मन्यते ॥९॥

नारद ! हे देवर्षे ! नारं परमात्मविषयं ज्ञानं ददातीति नारदः तत्सम्बुद्धौ । **यः जनः ब्राह्मणस्य सद्धनं** सद्भिः उपायैरर्जितं धनम्, सदाचरणोपार्जितं वित्तम्, गोपशुपुत्रादिकं ब्रह्मस्वं वा । धनम् धनति । धन धान्ये अच् (पा० ३।१।१३४) 'धनं तु गोधनवित्तयोः' इति कोशः । **अभिमन्यते** सगर्वो भूत्वा ब्रह्मस्वं ममैवेति मन्यते तस्यापहरणं वा करोति **तम्** तादृशं ब्रह्मस्वापहारकं जनं **वृक्षाः** पादपाः । वृक्षः वृक्षति, वृक्ष वरणे, पचाद्यच् (पा० ३।१।१३४) वृश्च्यते वा, ओव्रश्चू छेदने सक् (उ० ३।६६) **अपसेधन्ति** दूरीकुर्वन्ति । षिध् गत्याम् । कथमित्याह— **नः** अस्माक **छायां मा उप गाः इति** न आगच्छेत् । ब्रह्मस्वापहारकस्तादृशः पापीयान् भवति यत् तं वृक्षा अपि छायां दातुं नेच्छन्ति ।

विषमेतद् देवकृतं राजा वरुणोऽब्रवीत् ।
न ब्राह्मणस्य गां जग्ध्वा राष्ट्रे जागार कश्चन ॥१०॥

पदपाठः

विषम् । एतत् । देवऽकृतम् । राजा । वरुणः । अब्रवीत् । न । ब्राह्मणस्य । गाम् । जग्ध्वा । राष्ट्रे । जागार । कः । चन ॥१०॥

राजा सर्वेषां शासकः **वरुणः** वरुणो देवः **अब्रवीत्** कथयति स्म **एतद्** ब्राह्मणस्य वित्तं गोधनं वा **देवकृतम्** देवैः कृतं दत्तं ब्राह्मणार्थे एव इति शेषः । अतः अन्येषां कृते **विषं** विषवत् घातकं भवति । विषं वेष्टि कायम्, विष्लृ व्याप्तौ विष-प्रयोगे वा 'इगुपध०' (पा० ३।१।१३५) इति कः,'गरले विषमम्भसि च ।' इति कोशः । **ब्राह्मणस्य गां** गवादिरूपां सम्पत्तिं भूमिं धनं वा **जग्ध्वा** हृत्वा पीडयित्वा । सूक्तेऽस्मिन् जग्ध्वा इत्यस्य प्रयोगस्य गलबिलाधःसंयोगानुकूलो व्यापारः इति भौतिक-

भक्षणव्यापारसूचको वाचिकोऽर्थः न कर्तव्यः किन्तु लक्षणया पीडनमनुतापनं ताडनं वा अर्थः समीचीनः । यथा लोके 'अयं मम धनानि हन्ति' सा मम शिरः अत्ति' इत्यादिषु हननभक्षणव्यापारस्य मुख्यार्थबाधेन लक्षणा गृह्यते तद्वद् गवां भक्षणादिविषयेऽपि लक्षणया एवार्थोऽनुसन्धेयः । राष्ट्रे राज्ये विषये वा कश्चन कोऽपि जनः न जागार न सचेतनो अभूत् । जागृ निद्राक्षये लिट् । तथा च 'न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते' इति मनुः ।

नवैव ता नवतयो या भूमिर्व्यधूनुत ।
प्रजां हिंसित्वा ब्राह्मणीमसंभव्यं पराभवन् ॥११॥

पदपाठः

नव । एव । ताः । नवतयः । या । भूमिः । विऽअधूनुत । प्रऽजाम् । हिंसित्वा । ब्राह्मणीम् । असम्ऽभव्यम् । परा । अभवन् ॥११॥

या **नव नवतयः** नव च नवतयः च एकोनशतम्, यद्वा नवगुणिता नवतयः दशोत्तरम् अष्टशतकम् । **भूमिः व्यधूनुत** भूमिं व्याधुन्वन्त यद्वा तादृशपापभारेण प्रकम्पिता सती भूमिः तान् सर्वान् व्याधुन्वत, ते सर्वे एव **ब्राह्मणीं** ब्रह्मणः इमां **प्रजाम्** सन्ततिं गवादिकं वा **हिंसित्वा** पीडयित्वा असम्भव्यां न संभाव्यां यथा स्यात्तथा कल्पनापथातीतं **पराभवन्** परावभूवुः । भूमिमपि प्रकम्पयितुं समर्थाः ते राजानः ब्रह्मणः सन्ततिं पीडयित्वा स्वयं पराजयं गता इत्यर्थः ।

यां मृतायानुबध्नन्ति कूद्यं पदयोपनीम् ।
तद् वै ब्रह्मज्य ते देवा उपस्तरणमब्रुवन् ॥१२॥

पदपाठः

याम् । मृताय । अनुऽबध्नन्ति । कूद्यऽम् । पदयोपनीम् । तत् । वै । ब्रह्मऽज्य । ते । देवाः । उपऽस्तरणम् । अब्रुवन् ॥१२॥

यां मृताय मृतेन सह, मृतस्य शववाहिन्या सह **पदयोपनीम्** पदचिह्नपरिमार्जनकर्त्रीम् । **कूद्यं** घासं घासनिर्मितां पदमार्जनीम् **अनुबध्नन्ति** जनाः इति शेषः । **तद्** एव स एव घासः हे **ब्रह्मज्य** ! ते तव **उपस्तरणं** भविष्यति त्वं तस्मिन्नेव कूद्ये मृतः स्वप्स्यति इति **देवा अब्रुवन्** कथयन्ति स्म ।

अश्रूणि कृपमाणस्य यानि जीतस्य वावृतुः ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥१३॥

पदपाठः

अश्रू॒णि । कृपमाणस्य । यानि । जीतस्य । ववृतुः । तम् । वै । ब्रह्मऽज्य । ते । देवाः । आपाम् । भागम् । अधारयन् ॥१३॥

ब्रह्मज्य ! हे ब्रह्मघातिन् ! ब्रह्म ब्राह्मणं जिनाति घातयति इति ब्रह्मज्य, तत्सम्बुद्धौ । ज्या वयोहानौ, **कृपमाणस्य** दयायै स्तुवतः । कृपमाणं स्तुवन्तम्, कृपिः स्तुतीकर्मा तुदादिषु द्रष्टव्यः । तस्य **जीतस्य** पीडितस्य कर्मणि क्तः । **यानि अश्रूणि** नेत्राम्बूनि । अश्नुते कण्ठमिति अश्रु । अश्र्वादित्वात् (उ०५।२९) इति रुक् । **वावृतुः** यत्र वर्तन्ते देवाः इन्द्रवरुणसोमादयो देवाः **ते** तवार्थे **तम्** अश्रुसमूह **वै** निश्चयेन **अपां** जलस्य **भागम्** अंशम् **अधारयन्** निर्धारितवन्तः । हे ब्रह्मघातिन् ! तवार्थे देवाः तान्येव अश्रूणि जलरूपेण प्राकल्पयन् ।

येन मृतं स्नपयन्ति श्मश्रूणि येनोन्दते ।
तं वै ब्रह्मज्य ते देवा अपां भागमधारयन् ॥१४॥

पदपाठः

येन । मृतम् । स्नपयन्ति । स्मश्रूणि । येन । उन्दते । तम् । वै । ब्रह्मऽज्य । ते । देवाः । अपाम् । भागम् । अधारयन् ॥१४॥

येन जलेन **मृतं** शवं **स्नपयन्ति** स्नानं कारयन्ति अथवा **येन** जलेन **श्मश्रूणि** श्म मुखं श्रयति श्रिञ् सेवायाम् श्मति मुखे श्रूयते । 'श्रु श्रवणे' मितद्र्वादित्वात् डुः । सम्पदादि त्वात् क्विप् (वा० ३।३।१०८) वा । आगमशास्त्रस्यानिर्धारितत्वान्न तुक् । **उन्दते** आशौचान्ते क्लेदयन्ति, हे ब्रह्मघातिन् ! **देवाः** इन्द्रादयः **तं** अश्रुसमूहं **वै** एव **अपां भागम् अधारयन्** अकल्पयन् । एतादृक् अशिवमपवित्रं च जलं तवार्थं देवैर्निर्मितमिति भावः ।

न वर्षं मैत्रावरुणं ब्रह्मज्यमभि वर्षति ।
नास्मै समितिः कल्पते न मित्रं नयते वशम् ॥१५॥

पदपाठः

न । वर्षम् । मैत्रावरुणम् । ब्रह्मऽज्यम् । अभि । वर्षति । न । अस्मै । सम्ऽइतिः । कल्पते । न । मित्रम् । नयते । वशम् ॥१५॥

ब्रह्मज्यम् ब्रह्मघातिनम् अभिलक्ष्य तस्य राष्ट्रे **मैत्रावरुणम्** मित्रावरुणौ देवते यस्य तत् **वर्षं** वृष्टिः **न अभिवर्षति** । मित्रावरुणाभ्यां प्रेरिता बृष्टिः न भवति । मित्रावरुणौ वृष्टिं प्रेरयतः, तथा च श्रुतिः– 'मित्रावरुणौ त्वा वृष्ट्यावताम्' (यजु०२।१६) **वर्षम्** 'वृषु सेचने' अज्विधौ 'भयादीनामुपसङ्ख्यानम्' (वा० ३।३।५६) इत्यच् । **समितिः** सभा । समयन्त्यस्याम्, इ गतौ क्तिन् (पा० ३-३-९४) ।

सहविद्यमाना मिलितैर्वा मितिः प्रमाऽस्यामिति वा। 'समितिः सम्पराये स्यात्सभायां सङ्गमेऽपि च' इति मेदिनी। न कल्पते न समर्थयति। तस्य कार्यं नानुमन्यते। मित्रं वशं न नयते सुहृद् तं न मन्यते। मित्रं मेद्यति ञिमिदा स्नेहने 'अभिचिमिदिशसिभ्यः क्त्रः' (उ० ४।१६४) क्त्र। 'मित्रं सुहृदि न पुंसि' इति कोशः। देवाः समितिः मित्राणि च ब्रह्मघातिनः विरोधिनो भवन्तीत्यर्थः।



विंशं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः। वानस्पत्यदुन्दुभिर्देवता प्रथमर्चो जगती, द्वितीयाद्येकादशानाञ्च त्रिष्टुप् छन्दसी। 'उच्चैर्घोषः' इति सूक्तेन परसेनात्रासनविद्वेषणकर्मणि भेर्यादिवादित्राणि प्रक्षाल्य तगरोशीरेण लेपयित्वा सम्पात्य त्रिस्ताडयित्वा वादकाय पुरोधाः प्रयच्छेत्। कौशिके सूत्रितोऽयं विनियोगः 'उच्चैर्घोषः' (अ० ५।२०) 'उपश्वासय' (अ० ६।१२६) इति सर्ववादित्राणि प्रक्षाल्य तगरोशीरेण संधाव्य संपातवन्ति त्रिराहत्य प्रयच्छति (कौ. सू. १६।१) इति।

तथा महाव्रते अनेन सूक्तेन भूमिदुन्दुभिं ताडयेत्। यथा वैताने—'भूमिदुन्दुभिमौक्षेणापिनद्धं पुच्छेनाघ्नन्ति उच्चैर्घोषैः' 'उपश्वासय' (वै. श्रौ. सू. ३४।११) इति।

उच्चैर्घोषो दुन्दुभिः सत्वनायन्
वानस्पत्यः संभृत उस्रियाभिः।
वाचं क्षुणुवानो दमयन्त्सपत्नान्त्सिंह
इव जेष्यन्नभि तंस्तनीहि ॥१॥

पदपाठः

उच्चैःऽघोषः। दुन्दुभिः। सत्वनाऽयन्। वानस्पत्यः। सम्ऽभृतः। उस्रियाभिः। वाचम्। क्षुणुवानः। दमयन्। सऽपत्नान्। सिंहःऽइव। जेष्यन्। अभि। तंस्तनीहि ॥१॥

अयं वानस्पत्यः वनस्पतेः काष्ठान्निर्मितः। उस्रियाभिः 'उस्रियेति गोनाम उस्राविणोऽस्यां भोगाः' (निरु० ४।१९)। गोचर्मभिरित्यर्थः। तैः सम्भृतो भरितः। नद्ध इत्यर्थः। उच्चैर्घोषः उच्चैर्महान् घोषो ध्वनिः यस्य सः। महान्तं घोषं कुर्वाणः। दुन्दुभिः भेरी सत्वनायन् सत्वन इवाचरन् शत्रून् सादयन् (सा० ऋ० ६।४५।२२), शत्रुधनानां सनिता दाता वा बलवान् वा (सा०ऋ० १०।११५।४) भवति। तादृशस्त्वं हे दुन्दुभे! वाचं शब्दात्मिकाम् अस्मदविजयार्थां क्षुणुवानः ध्वनयन्, सपत्नान् अस्मच्छत्रून् दमयन् पराभवहतान् कुर्वन्, जेष्यन् आगामिन्यपि सङ्ग्रामे जयं प्राप्स्यन् अस्मान् विजयिनः करिष्यन्। दुन्दुभेर्घोषेणाऽस्माकं विजयो भवतीत्येवम् ऋषेर्विश्वासः

अनेन ध्वन्यते । स त्वं दुन्दुभे ! **सिंह इव तंस्तनीहि** हिंस्रः केसरीव पुनः पुनः स्तनय गर्ज येनास्माकं शत्रवस्त्रस्येयुः । दुन्दुभिः दुन्दु इति शब्देन भाति । बाहुलकात् किः । यद्वा द्याम् उभति पूरयति । उभ पूरणे तुदादेः पृषोदरादित्वात् सिद्धम् । सत्वनायन् सत्वन इवाचरन् 'लोहितादिडाज्भ्यः क्यष्' (पा० ३।१।१३), 'वा क्यषः' (पा० १।३।९०) इति वैकल्पिकं परस्मैपदम्, सत्वनः सीदन्ति गुणा अस्मिन् इति सत्त्वम् । सत्त्वं विद्यतेऽस्मिन् स सत्त्वा । अधिकरणे क्वनिप् (उ० ४।१०५) सत्त्वा । मत्वर्थीये नञि सत्वनः । क्षुणुवानः क्ष्णु तेजने अदादेः शानच् । तंस्तनीहि स्तनतेः सन्नन्ताल्लोट् ।

सिंह इवास्तानीद् द्रुवयो
विबद्धोऽभिक्रन्दन्नृषभो वासितामिव ।
वृषा त्वं वध्रयस्ते सपत्ना
एन्द्रस्ते शुष्मो अभिमातिषाहः ॥२॥

पदपाठः

सिंहःऽइव । अस्तानीत् । द्रुवयः । विऽबद्धः । अभिऽक्रन्दन् । ऋषभः । वासिताम्ऽइव । वृषा । त्वम् । वध्रयः । ते । सऽपत्नाः । ऐन्द्रः । ते । शुष्मः । अभिमातिऽसहः ॥२॥

अयं **द्रुवयः** द्रोर्वृक्षस्य विकारः वृक्षदारोर्निर्मितः. **विबद्धः** चर्मणा नद्धः रज्ज्वा च बद्धः दुन्दुभिः वासितां वृषभकामां गां प्रति **अभिक्रन्दन्** गर्जन् **ऋषभो** वृष इव **अस्तानीत्** स्तनितवान्, गर्जतीत्यर्थः । **सिंह इव** च गर्जति । सिंह इव भयानकः शत्रून् त्रासयति । हे दुन्दुभे ! **त्वं वृषा** वर्षकः कामानां पूरयिता वीर्यवांश्चासि । **ते** तव **सपत्नाः** शत्रूणां दुन्दुभयः **वध्रयः** षण्ढाः वीर्यविहीना बलीवर्दाः सन्ति । तेषां स्तनितं निष्फलम् अनुत्साहजनकं भवति । **ते** तव **शुष्मो** बलं **ऐन्द्रः** इन्द्रसदृश इन्द्रेण वा दत्तः सर्वथा विजयावहः, **अभिमातिषाहः** अभिमातीन् शत्रून् यः सहते बलात् पराभवतीत्येवं प्रकारकोऽस्ति । द्रुवयः द्रवत्यूर्ध्वमिति । द्रु गतौ भ्वादेः 'मित्रद्र्वादिभ्यः उपसंख्यानम् ।' (वा० पा० ३।२।१८०) इति डुः । द्रोर्विकारः 'माने वयः' (पा० ४।३।१६२) । शुष्मः 'शुष्ममिति बलनाम शोषयतीति सतः ।' (निरु० २।२४) ।

वृषेव यूथे सहसा विदानो
गव्यन्नभि रुव संधनाजित् ।
शुचा विध्य हृदयं परेषां हित्वा
ग्रामान् प्रच्युता यन्तु शत्रवः ॥३॥

पदपाठः

वृषाऽइव। यूथे। सहसा। विदानः। गव्यन्। अभि। रुव। संघनऽजित्। शुचा। विध्य। हृदयम्। परेषाम्। हित्वा। ग्रामान्। प्रऽच्युताः। यन्तु। शत्रवः ॥३॥

हे दुन्दुभे! यूथे गोयूथे सहसा अकस्मात् संविदानः परिज्ञातः दृष्टः विद्यमानो वा **गव्यन्** गामात्मनः इच्छन् गोसङ्गमाभिलाषी **वृषा** वृषभ **इव** त्वम् **अभि रुव** अभितः सर्वासु दिक्षु ध्वननं कुरु। त्वं **संधनजित्** साधु धनानि जयतीत्येवं शीलः। छान्दसो दीर्घः। शत्रून् पराजित्य तेषां धनान्यस्मभ्यं ददानः असि। एवं प्रकारेण अभिरुवन् त्वं **परेषाम्** अस्मच्छत्रूणां हृदयम्, एकवचनं समूहार्थे। शत्रूणां हृदयानि **शुचा** पराजयजनितेन शोकेन दुःखेन **विध्य** आहतानि कुरु। पराभवाच्च स्वस्थानाद् ग्रामाद् **प्रच्युताः** भ्रष्टाः भयद्रुताः, यद्वा मरणभयाद् धावन्तः पुनः पुनः भ्रष्टाः पतिताः सन्तः **ग्रामान्** स्वनिवासस्थानभूतान् **हित्वा** त्यक्त्वा **यन्तु** निर्गच्छेयुः पलायन्ताम्। विदानः वेत्तेर्विन्दतेर्वा ताच्छील्ये चानश्। गव्यन् गोः क्यच्। सधनाजित् संहितान् शत्रून् संदधाति कर्तरि ल्युट्। तान् जयति, क्विप्।

संजयन् पृतना ऊर्ध्वमायुर्गृह्या
गृह्णानो बहुधा विचक्ष्व।
दैवीं वाचं दुन्दुभ आ गुरस्व वेधाः
शत्रूणामुप भरस्व वेदः ॥४॥

पदपाठः

सम्ऽजयन्। पृतनाः। ऊर्ध्वऽमायुः। गृह्याः। गृह्णानः। बहुऽधा। वि। चक्ष्व। दैवीम्। वाचम्। दुन्दुभे। आ। गुरस्व। वेधाः। शत्रूणाम्। उप। भरस्व। वेदः ॥४॥

हे दुन्दुभे! **ऊर्ध्वमायुः** ऊर्ध्वम् अतिदूरं गतो मायुः शब्दो यस्य तादृक् त्वं, **पृतनाः** परेषां सेनाः **सञ्जयन्** साकल्येन जयन् **गृह्याः** ग्रहणयोग्याः शत्रूणा संपदो **गृह्णानः** गृह्णन् शत्रून् पराजित्य तेषाम् अनर्घाः सम्पदो विजित्य अस्मदधीनाः कुर्वन् त्वं **बहुधा** विविधैः प्रकारैः सर्वत्र **विचक्ष्व** सूक्ष्मं पश्य। सूक्ष्मदृष्ट्या शत्रूणां सम्पदः तैर्गोपिताः मृगय। तव **दैवीं** दिव्यां देवानामिव महाप्रभावां **वाचं** ध्वनिम् **आ गुरस्व** आसमन्ताद् ध्वनय। यद्वा दिव्याम् अस्माभिः उच्चार्यमाणां स्तोत्रशस्त्ररूपां वाणीं प्रति आ गुरस्व देवताभिः कृतम् अस्मत्स्तुतिस्वीकारं तव ध्वननेन ज्ञापय। पुनश्च **वेधाः** विद्वान् शत्रूणां गोपितान् निधीन् जानन् त्वं तेषां **वेदः** महतीं सम्पदम् **उपभरस्व** अस्मदधीनां कुरु। ऊर्ध्वमायुः डुमिञ् प्रक्षेपणे क्र्यादेः 'कृवापाजिमिस्वदि०'

(उ० १।१) इत्युण्। 'मायुर्वाक्' (नि० १।११)। 'मायुः शब्दः' (सा.ऋ.१।१६४।२८)। वेधाः विदधातीति। उपभरस्व उपहरस्व। 'हृग्रहोर्भश्छन्दसि' इति हस्य भः।

दुन्दुभेर्वाचं प्रयतां वदन्तीमा-
शृण्वती नाथिता घोषबुद्धा।
नारी पुत्रं धावतु हस्तगृह्यामित्री
भीता समरे वधानाम् ॥५॥

पदपाठः

दुन्दुभेः। वाचम्। प्रऽयताम्। वदन्तीम्। आऽशृण्वती। नाथिता। घोषऽबुद्धा। नारी। पुत्रम्। धावतु। हस्तऽगृह्य। आमित्री। भीता। सम्ऽअरे। वधानाम् ॥५॥

अस्मदीयस्य **दुन्दुभेः प्रयतां** प्रकृष्टमन्तरं गतां दूरगतां यद्वा प्रयतां नियतां लययुक्तां **वदन्तीम्** अस्मद्विजयं घोषयन्तीं **वाचं** घोषरूपां वाणीम् **आशृण्वती** आसमन्तात् शृण्वती आकर्णयन्ती **घोषबुद्धा** दुन्दुभिनादाद् अस्मद्विजय प्रति जागरिता ज्ञातास्मद्विजया **आमित्री** अमित्रसम्बन्धिनी **नारी** शत्रुपक्षीया योषा **समरे** युद्धे **वधानां** पञ्चम्यर्थे षष्ठी। वधेभ्यः पतिपुत्रादीनां वधकारणादित्यर्थः। यद्वा वधानां घातकानाम् आयुधानां प्रहाराद् **भीता नाथिता** अतीव उपतप्ता दुःखिता सती **पुत्रं हस्तगृह्य** पुत्रं हस्ते गृहीत्वा तं कर्षन्ती **धावतु** जीवरक्षायै पलायताम्। हस्तगृह्या हस्तगृह्य। सांहितिको दीर्घः। 'नित्यं हस्ते०' (पा० १।४।७७) इति हस्तशब्दस्य गतिसञ्ज्ञायां ग्रहिणा समासे ल्यप्। एकारलोपश्छान्दसः। यद्वा हस्तशब्दात् परस्य गृहेः छान्दसौ समासल्यपौ (सा. ऋ. १०।१०९।२)।

पूर्वो दुन्दुभे प्रवदासि वाचं
भूम्याः पृष्ठे वद रोचमानः।
अमित्रसेनामभिजञ्जभानो
द्युमद् वद दुन्दुभे सूनृतावत् ॥६॥

पदपाठः

पूर्वः। दुन्दुभे। प्र। वदासि। वाचम्। भूम्याः। पृष्ठे। वद। रोचमानः। अमित्रऽसेनाम्। अभिऽजञ्जभानः। द्युऽमत्। वद। दुन्दुभे। सूनृताऽवत् ॥६॥

हे **दुन्दुभे! पूर्वः प्रवदासि** समरे त्वमेव प्रथमं वद ध्वन। युद्धे पूर्वं दुन्दुभेर्ध्वनिः श्रूयते अनन्तरं च योधानां हुंकारः। यद्वा **पूर्वः** सेनाया अग्रभागे स्थापितः

त्वं ध्वन। युद्धात् पूर्वं च अस्मद्ग्रामे भूम्याः पृष्ठे स्थापितः भूमौ निहितः तथा च रोचमानः शोभमानः त्वं वाचं वद अस्मद्विजयावहं ध्वनिं कुरु। अमित्रसेनाम् अस्मच्छत्रूणां सैन्यम् अभिजञ्जभानः अभितः सर्वतो दिक्षु हिंसन् विनाशयन् त्वं अस्मत्कृते द्युमद् उत्तमधनयुक्तं रत्नादियुक्तं परेषां धनं यथा अस्माभिर्लभ्यते तथा तस्योपायं सूनतावत् सत्ययुक्तं माधुर्योपेतं च यथा स्यात्तथा वद। सूनृतावत् सूनृतवत्, सांहितिको दीर्घः।

अन्तरेमे नभसी घोषो अस्तु
पृथक् ते ध्वनयो यन्तु शीभम्।
अभि क्रन्द स्तनयोत्पिपानः
श्लोककृन्मित्रतूर्याय स्वर्धी ॥७॥

पदपाठः

अन्तरा। इमे इति। नभसी इति। घोषः। अस्तु। पृथक्। ते। ध्वनयः। यन्तु। शीभम्। अभि। क्रन्द। स्तनय। उत्ऽपिपानः। श्लोकऽकृत्। मित्रऽतूर्याय। सुऽअर्धी ॥७॥

हे दुन्दुभे! इमे नभसी अन्तरा अनयोः पृथिव्यन्तरिक्षयोः अन्तर्भागे मध्ये तव घोषः अस्तु व्याप्नोतु। तव ध्वनिर्द्यावापृथिव्योरन्तर्भागं पूरयत्वित्यर्थः। पुनश्च पृथग् विभिन्नासु दिक्ष्वपि ते ध्वनयो तव गर्जनरवाः शीभं शीघ्रं यन्तु। सर्वासु दिक्षु झटिति प्रसरन्तु। अभिक्रन्द विजयी भूत्वा अभित आसमन्तात् घोषं कुरु। उत्पिपानः अस्मान् विजयेन वर्धयन्। यद्वा शत्रुदुन्दुभीनां ध्वनीन् अतिक्राम्यन् श्लोककृत् अस्माकं यशो ध्वनिरूपेण गायन् मित्रतूर्याय अस्मन्मित्राणामपि विजयाय स्वर्धी सत्पक्षपाती भव। सत्योपेतं पक्षं गृहाण। उत्पिपानः उत्पूर्वाद् ओप्यायी वृद्धौ इत्यस्माल्लिटि 'लिड्यङोश्च' (पा० ६।१।२९) इति प्यायः पीभावे, द्वित्वे, कानचि, इकारलोपे, उत्पिपानः। यद्वा यङ्लुकि शानच्। 'शीभमिति शीघ्रनाम' (निघ० २।१५)। अत्र 'स्वर्धी' स्पर्धाविषयो भवेति माधवाचार्यः। स्वर्धी पक्षपाती इति ह्विटनिः। सत्पक्षग्राही इति मोनियेरविलियम्सशब्दकोशे। सत्पक्षपातीति साधीयान् अर्थः इति सं०।

धीभिः कृतः प्रवदाति
वाचमुद्धर्षय सत्वनामायुधानि।
इन्द्रमेदी सत्वनो नि ह्वयस्व
मित्रैरमित्राँ अव जङ्घनीहि ॥८॥

पदपाठः

धीभिः । कृतः । प्र । वदाति । वाचम् । उत् । हर्षय । सत्वनाम् । आयुधानि । इन्द्रऽमेदी । सत्वनः । नि । ह्वयस्व । मित्रैः । अमित्रान् । अव । जङ्घनीहि ॥८॥

धीभिः स्तुतिमन्त्रैः कृतो रचितः । मन्त्रगानपुरःसरं रचितः । यद्वा धीभिः कौशलपूर्णाभिर्युक्तिभिः रचितः । अयं दुन्दुभिः वाचं प्रवदाति व्यक्तामर्थपूर्णां वाणीम् उच्चैर्वदति । एतादृश हे दुन्दुभे ! सत्वनां बलवतां योधानाम् आयुधानि युद्धसाधनानि शस्त्रास्त्राणि उद्धर्षय हर्षेण युद्धमदेन उद्यतानि कारय । त्वया उत्साहिता अस्मद्-योद्धारः आयुधान्युद्यम्य युद्धाय प्रयान्तु । इन्द्रमेदी इन्द्रं मेदते स्निह्यति इन्द्रस्य पक्षपाती इन्द्रस्य वा हर्षयिता त्वं सत्वनो योधान् निह्वयस्व आहूयात्र समेतान् कुरु । मित्रैः अस्मतसहायैः समेतस्त्वम् अमित्रान् अस्मच्छत्रून् अवजङ्घनीहि अतिशयेन जहि । सत्वनः असनं सत् प्रशस्ता सत्ता । अस्तेः क्विप् । यद्वा अस्तीति सत् बलम्, तदस्ति एषामिति प्रशंसायां मतुप् । यद्वा 'अन्येभ्योऽपि दृश्यन्ते' (पा० ३।२।७५) इति क्वनिप् । अवजङ्घनीहि हन्तेर्यङ्लुकि लोट् ।

संक्रन्दनः प्रवदो धृष्णुषेणः
प्रवेदकृद् बहुधा ग्रामघोषी ।
श्रेयो वन्वानो वयुनानि विद्वान्
कीर्तिं बहुभ्यो वि हर द्विराजे ॥९॥

पदपाठः

सम्ऽक्रन्दनः । प्रऽवदः । धृष्णुऽसेनः । प्रवेदऽकृत् । बहुऽधा । ग्रामऽघोषी । श्रेयः । वन्वानः । वयुनानि । विद्वान् । कीर्तिम् । बहुऽभ्यः । वि । हर । द्विऽराजे ॥९॥

हे दुन्दुभे ! सङ्क्रन्दनः सम्यगुच्चैर्नदन्, प्रवदः प्रकर्षेण व्यक्तां वाचं वदन्, धृष्णुषेणः धृष्णुः धर्षणशीला आक्रमणस्वभावा सेना यस्य सः, ग्रामघोषी ग्रामेषु जनवसतिषु घोषम् अस्मद्विजयस्य घोषणां कुर्वाणः, बहुधा विविधैः प्रकारैः प्रवेदकृत् लोकेषु प्रकृष्टां वेदनां चेतनां जागृतिं कुर्वाणः श्रेयः अस्मत्कल्याणावहं स्थितिविशेषं वन्वानः प्राप्नुवन् अथवा श्रेयः सम्भजन् वयुनानि हितावहानि कर्माणि विद्वान् साधु जानन् त्वं द्विराजे द्वयो राज्ञोः युद्धेऽस्मिन्, बहुभ्यः अनेकेभ्योऽस्माकं योद्धृभ्यः कीर्तिं विहर विशेषेण यशो देहि । त्वद्घोषेणोत्साहिता अस्मद्योद्धारः जयं प्राप्य वीर-कीर्तिं लभन्ताम् । धृष्णुषेणः ञिधृषा प्रागल्भ्ये स्वादेः 'त्रसिगृधिधृषिक्षिपेः क्नुः' (पा० ३।२।१४०) धृष्णुः । वन्वानः वनोतेः शानच् यद्वा वन संभक्तौ भ्वादेर्विकरण-व्यत्ययेन शानच् ।

श्रेयःकेतो वसुजित् सहीयान्त्-
संग्रामजित् संशितो ब्रह्मणासि ।
अंशूनिव ग्रावाधिषवणे
अद्रिर्गव्यन् दुन्दुभेधि नृत्य वेदः ॥१०॥

पदपाठः

श्रेयःऽकेतः । वसुऽजित् । सहीयान् । संग्रामऽजित् । सम्ऽशितः । ब्रह्मणा । असि । अंशून्ऽइव । ग्रावा । अधिऽसवने । अद्रिः । गव्यन् । दुन्दुभे । अभि । नृत्य । वेदः ॥१०॥

श्रेयःकेतः कल्याणस्य श्रावयिता दर्शको वा, **वसुजित्** वसूनां स्वर्णरत्नादीनां जेता, **सहीयान्** सहस्वत्तरो बलवत्तरः, **संग्रामजित्** संग्रामाणां योधसमूहानां विजेता । यद्वा युद्धानां जेता, **ब्रह्मणा** स्तुतिमन्त्रैः **संशितः** तैक्ष्ण्यमापादितः, यद्वा तपसा लभ्यः **हे दुन्दुभे ! ग्रावा** सोमाभिषवे प्रयुक्तः प्रस्तरखण्डः **अधिषवणे** सोमपेषणकर्मणि **अंशून् इव** सोमलताकिसलयानीव खण्डयन् **गव्यन्** गोकामो वृषभ इव चरन्, **वेदः अधि** यत्रैव धनमस्ति तस्मिन् प्रदेशे **नृत्य** विजयनर्तनं कुरु । गव्यन् गोशब्दाद् आचार-क्यचि 'वान्तोयि प्रत्यये' (पा० ६।१।७९) इत्यव् । वेदः इति धननाम । विद्लृ लाभे असुन् इति देवयज्वटीकायाम्, (निघ० २।१०) ।

शत्रूषाण्नीषाडभिमातिषाहो
गवेषणः सहमान उद्भित् ।
वाग्वीव मन्त्रं प्र भरस्व वाचं
सांग्रामजित्यायेषमुद् वदेह ॥११॥

पदपाठः

शत्रूषाट् । नीषाट् । अभिमातिऽसहः । गोऽएषणः । सहमानः । उत्ऽभित् । वाग्वीऽइव । मन्त्रम् । प्र । भरस्व । वाचम् । सांग्रामऽजित्याय । इषम् । उत् । वद । इह ॥११॥

हे दुन्दुभे ! **शत्रूषाट्** शत्रून् यः सहते बलात्पराभवति तादृशः, **नीषाट्** निःशेषेण जयन् **अभिमातिसाहः** अभिमातीन् सगर्वान् परान् पराभवन् । 'सपत्नो वाऽभि-मातिः' (श० ३।९।४।९) इति ब्राह्मणमपि । **गवेषणः** शत्रूणां मृगयिता, **सहमानः** शत्रुधर्षणं बलात् पराजयन् **उद्भित्** परान् मूलोत्खातं विनाशयन् त्वं **वाग्वी इव** वाग्मी मन्त्रमिव यथा कश्चिद् वाक्कुशलः मन्त्रं स्वमतं प्रभरति जनानां मनःसु दृढीकरोति तद्वत् **वाचं प्र भरस्व** अस्माकं विजयस्य घोषं जनेषु दृढीकुरु ।

सङ्ग्रामजित्याय सङ्ग्रामे जयप्राप्त्यर्थम् इहात्र देशे इषम् अन्नम् उद्वद यत्रैव शत्रुभिरन्नं सङ्गृहीतं तं प्रदेशं दर्शयेत्यर्थः। शत्रूषाड् नीषाड् 'सहेःसाडः सः' (पा० ८।३।५६) इति दीर्घः।

अच्युतच्युत् समदो गमिष्ठो
मृधो जेता पुरएतायोध्यः।
इन्द्रेण गुप्तो विदथा निचिक्यद्धृद्द्योतनो
द्विषतां याहि शीभम् ॥१२॥

पदपाठः

अच्युतऽच्युत्। सऽमदः। गमिष्ठः। मृधः। जेता। पुरःऽएता। अयोध्यः। इन्द्रेण। गुप्तः। विदथा। निऽचिक्यत्। हृत्ऽद्योतनः। द्विषताम्। याहि। शीभम् ॥१२॥

हे दुन्दुभे! **अच्युतच्युत्** अच्युतान् स्वबलेन दृढान् अपराजितान् अपि परान् च्यावयन् पदभ्रष्टान् कुर्वन् समदः मदयुक्तः **गमिष्ठः** अतिशयेन गन्ता दुर्गेष्वपि अप्रतिहतगतिः। यद्वा अन्यान् गन्तुं अतिमात्रं प्रेरयन्. **मृधः जेता** सङ्ग्रामस्य विजेता न कदापि पराभूतः, **पुरः एता** सेनायाः पुरोभागे गन्ता, **अयोध्यः** योद्धुमशक्यः अपराजेयः **इन्द्रेण गुप्तः** स्वशक्त्या अभिरक्षितः। **विदथा** विदथानि शत्रूणां सभाः **निचिक्यत्** व्याप्नुवन्। यद्वा यज्ञकर्माणि व्याप्नुवन् यज्ञसमाप्तिं यावन्नदन्। **द्विषतां** शत्रूणां **हृद्द्योतनः** हृदयानि द्योतयन् दहन् अस्मद्विजयघोषेण शत्रूणां हृदयानि अवमानदग्धानि कुर्वन्, **शीभं** शीघ्रं **याहि**। मृध इति संग्रामनाम। मृधेर्हिंसार्थकस्य क्विप् इति देवयज्वा। निचिक्यत् निपूर्वस्य चिनोतेः सनि शत्रन्तम्।



एकविंशं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः। प्रथमादिनवर्चां वानस्पत्यदुन्दुभिः, दशम्यादितृचस्य चादित्यादयः देवताः। प्रथमा चतुर्थी-पञ्चमीनां पथ्यापङ्क्तिः, द्वितीया-तृतीययोः सप्तम्यादिचतसृणाञ्चानुष्टुप्, षष्ठया जगती, एकादश्या बृहतीगर्भा त्रिष्टुप्, द्वादश्याश्च त्रिपदा यवमध्या गायत्री छन्दांसि।

'विहृदयम्' इति सूक्तेन परसेनात्रासनविद्वेषणकर्मणि सर्ववादित्राणि प्रक्षाल्य तगरोशीरेण लेपयित्वा संपातवन्ति त्रिराहत्य वादकाय प्रयच्छति।

तथा अनेन सूक्तेन सोमाङ्कुरमणिं हरिणचर्मणा वेष्टितं कृत्वा संपात्य अभिमन्त्य बध्नाति। तदुक्तं कौशिकसूत्रे-'विहृदयम् इत्युच्चैस्तरां हुत्वा स्रुवम्

उद्वर्तयन् सोमांशून् हरिणचर्मण्युत्सीव्य क्षत्रियाय बध्नाति (कौ. सू. १६।२।३) इति। 'विहृदयम्' इति सूक्तस्य सर्वत्र उच्चैः स्वरेण प्रयोगः। उद्वर्तयन् ऊर्ध्वं परिवर्तयन्।

विहृदयं वैमनस्य वदामित्रेषु दुन्दुभे।
विद्वेष कश्मशं भयममित्रेषु
नि दध्मस्यवैनान् दुन्दुभे जहि ॥१॥

पदपाठः

विऽहृदयम्। वैमनस्यम्। वद। अमित्रेषु। दुन्दुभे। विऽद्वेषम्। कश्मशम्। भयम्। अमित्रेषु। नि। दध्मसि। अव। एनान्। दुन्दुभे। जहि ॥१॥

हे दुन्दुभे! **अमित्रेषु** अस्मदरिषु तेषां सङ्घे **विहृदयं वद** तेषां हृदयेषु परस्परविषये विरुद्धं भावं वद। विरोधमुत्पादय। तथा ध्वन यथा शत्रूणां हृदयानि परस्परविषये विद्वेषवन्ति स्युः। **वैमनस्यं** वद दौर्मनस्यं जनय। अनेन दुन्दुभिध्वनिना वयम् **अमित्रेषु** अस्मदरिषु **विद्वेषं** परस्परविषये द्वेषं **निदध्मसि**। तेषां यथा परस्परवैरं स्यात्तथा विदध्मः। **कश्मशं** सम्मोहनं बुद्धेर्मोहं विवेकाभावं विदध्मः। **भयं** पराजयभयं मृत्युभयं च निदध्मः। हे **दुन्दुभे! एनान्** अस्मत्परिपन्थिनः **अवजहि** अवनताः भूमौ पतिताः यथा स्युस्तथा तान् जहि मारय।

विशेषः—कश्मशमित्ययं शब्दोऽत्रैव मन्त्रे केवलं प्रयुक्तः संदिग्धार्थः। व्हिटनिना माधवाचार्येणापि कश्मशमित्यस्य स्थाने कश्मलम् इति पाठान्तरं सूचितम्। कश्मशम् उग्रो मतविरोधः कशमकश इति भाषायाम्। स एव कश्माशार्थ इति माधवाचार्यः। व्हिटनिरप्येवम्। विश्वबन्धुशास्त्रिभिर्न किमपि पाठान्तरम् उल्लिखितम्। मोनियेरविलियम्सशब्दकोशकृता सम्मोहनम् इत्यर्थं दत्त्वा प्रश्नार्थेन तद्विषये संदेहो दर्शितः। कश्मलमिति पाठस्वीकारे मोहो मनामालिन्यं पापं वार्थः। कश्मशेऽत्र शकारस्थाने भाषायां लः इत्यपि कश्चित् कोशकारः। मोहेन मतविरोधः सम्भवतीति स एवार्थः साधुः इति सम्पादकः।

उद्वेपमाना मनसा चक्षुषा हृदयेन च।
धावन्तु बिभ्यतोमित्राः प्रत्रासेनाज्ये हुते ॥२॥

पदपाठः

उत्ऽवेपमानाः। मनसा। चक्षुषा। हृदयेन। च। धावन्तु। बिभ्यतः। अमित्राः। प्रऽत्रासेन। आज्ये। हुते ॥२॥

अस्मिन्नस्माभिः क्रियमाणे विजयार्थानुष्ठाने अग्नौ **आज्ये हुते** घृतादिपदार्थानामाहुतौ दत्तायां देवतानां प्रसादात् **अमित्राः** विद्विषः अस्मच्छत्रवः **मनसा**

उद्वेपमानाः मनसि अत्यन्तमुद्विग्नाः, चक्षुषा उद्वेपमानाः भयविह्वलदृष्टयः, हृदयेन च त्रासाहतेन हतोत्साहाः सन्तः, बिभ्यतः अस्मद्वीरेभ्यः त्रस्यन्तः प्रत्रासेन अतिमात्रेण भयेन धावन्तु रणं त्यक्त्वा नश्यन्तु । सौकर्येणास्माकं विजयोऽस्तु ।

वानस्पत्यः संभृत उस्रियाभिर्विश्वगोत्र्यः ।
प्रत्रासममित्रेभ्यो वदाज्येनाभिघारितः ॥३॥

पदपाठः

वानस्पत्यः । सम्ऽभृतः । उस्रियाभिः । विश्वऽगोत्र्यः । प्रऽत्रासम् । अमित्रेभ्यः । वद । आज्येन । अभिऽघारितः ॥३॥

हे दुन्दुभे ! **वानस्पत्यः** वनस्पतिकाष्ठान्निर्मितः, **उस्रियाभिः संभृतः** गोचर्मभिर्नद्धः त्वं **विश्वगोत्र्यः** विश्वस्याः समग्रायाः गोर्भूमेः त्राता रक्षकोऽसि । यद्वा विश्वानि गोत्राण्यस्य तेषु भवस्तदग्रगण्यो वाऽसि, सर्वेषां हितकरोऽसीति भावः । सार्वजनीनोऽसीति ह्विटनिः । एतादृशः त्वम् **आज्येन** घृतेन **अभिघारितः** सिक्तः आज्यधूपेन वा धूपितः **अमित्रेभ्यः** अस्मदरिभ्यः **प्रत्रासं वद** । तेषां महान् संत्रासो यथा जायते तथा नद । वनस्पतेर्विकारो वानस्पत्यः । विश्वगोत्र्यः विश्वां गां त्रायते । 'अचो यत्' (पा० ३।१।९७) । अकारलोपः छान्दसः । यद्वा विश्वां गां त्रायन्ते विश्वगोत्रा देवा राजन्याश्च । तेषु भवः कुलीन इत्यर्थः ।

यथा मृगाः संविजन्त आरण्याः पुरुषादधि ।
एवा त्वं दुन्दुभेमित्रानभि क्रन्द
प्र त्रासयाथो चित्तानि मोहय ॥४॥

पदपाठः

यथा । मृगाः । सम्ऽविजन्ते । आरण्याः । पुरुषात् । अधि । एव । त्वम् । दुन्दुभे । अमित्रान् । अभि । क्रन्द । प्र । त्रासय । अथो इति । चित्तानि । मोहय ॥४॥

यथा **आरण्याः** अरण्यवासिनो **मृगाः** मृदुस्वभावाः पशवः **पुरुषाद्** यस्मात् कस्माच्चिन्मनुष्यादपि **अधिसंविजन्ते** अधिकं भयमापद्यन्ते, **एवा** एवं प्रकारेण सांहितिकोऽत्र दीर्घः । हे **दुन्दुभे ! त्वम् अमित्रान्** अस्मदरीन् **अभिक्रन्द** तानभिलक्ष्य भयानकं शब्दं कुरु । तान् **प्रत्रासय** अतिभयाकुलान् कुरु । **अथो** तदनतरं आकुलीभूतानां तेषां **चित्तानि** अन्तःकरणानि **मोहय** मोहाविष्टानि सदसन्निर्णयेऽक्षमाणि कुरु, येन दिग्भ्रान्तास्ते नश्येयुः ।

यथा वृकादजावयो धावन्ति बहु बिभ्यतीः ।
एवा त्वं दुन्दुभेमित्रानभि क्रन्द
प्र त्रासयाथो चित्तानि मोहय ॥५॥

पदपाठः

यथा । वृकात् । अजऽअवयः । धावन्ति । बहु । बिभ्यतीः । एव । त्वम् । दुन्दुभे । अमित्रान् । अभि । क्रन्द । प्र । त्रासय । अथो इति । चित्तानि । मोहय ॥५॥

यथा अजावयः छागमेषादयो गृहपशवः नम्रस्वभावाः **वृकाद्** अजमेषादीनां स्वभाववैरिणः ईहामृगाद् **बहु बिभ्यतीः** अत्यन्त भयमानाः दूरं स्वरक्षार्थं **धावन्ति** स्ववृन्दं त्यक्त्वा इतस्ततो धावन्ति एवा एव प्रकारेण हे दुन्दुभे ! शेषं पूर्ववत् ।

यथा श्येनात् पतत्रिणः संविजन्ते
अहर्दिवि सिंहस्य स्तनथोर्यथा ।
एवा त्वं दुन्दुभेमित्रानभि क्रन्द
प्र त्रासयाथो चित्तानि मोहय ॥६॥

पदपाठः

यथा । श्येनात् । पतत्रिणः । सम्ऽविजन्ते । अहःऽदिवि । सिंहस्य । स्तनथोः । यथा । एव । त्वम् । दुन्दुभे । अमित्रान् । अभि । क्रन्द । प्र । त्रासय । अथो इति । चित्तानि । मोहय ॥६॥

यथा पतत्रिणः पक्षिणः **अहर्दिवि** दिवसे दिवसे प्रत्यहं **श्येनात्** शशादनात् **संविजन्ते** महद् भयमापद्यन्ते **यथा** वा **सिंहस्य स्तनथोः** भीषणाद् वन्यपशवः गर्जनादतीव त्रस्यन्ति एवा एवमेवेति पूर्वेणानुसन्धेयम् । श्येनः श्यैङ् गतौ भ्वादेः, 'श्यास्त्याहृञ्विभ्य इनच् ।' (उ. २।४६) । स्तनथुः स्तनतेः अथुच् ।

परामित्रान् दुन्दुभिना हरिणस्याजिनेन च ।
सर्वे देवा अतित्रसन् ये संग्रामस्येशते ॥७॥

पदपाठः

परा । अमित्रान् दुन्दुभिना । हरिणस्य । अजिनेन । च । सर्वे । देवाः । अतित्रसन् । ये । सम्ऽग्रामस्य । ईशते ॥७॥

सर्वे देवाः हरिणस्याजिनेन मृगचर्मनद्धेन **दुन्दुभिना** । यद्वा **दुन्दुभिना** दुन्दुभिवादनेन **हरिणस्य** च**अजिनेन** तन्निर्मितेन प्रस्तरक्षेपणसाधनेन **अमित्रान्** शत्रुभूतान् असुरान् **परा अतित्रसन्** पराङ्मुखा यथा स्युः तथा पराजयं प्राप्य विमुखा यथा

स्युस्तथा अतिशयेन पुनः पुनर्वा अभीषयन् । यद्वा परान् न्यगृह्णान् । तथैव ये अस्मत्सदृशाः बलवत्तरावीराः सङ्ग्रामस्य ईशते बलातिशयाद् येषां संग्रामे प्रभुत्व वर्तते ते अपि दुन्दुभिना दुन्दुभेर्नादेन हरिणचर्मनिर्मितेन चाश्मक्षेपणसाधनेनास्त्रेण यद्वा हरिणचर्मनद्धस्य दुन्दुभेर्नादेन शत्रून् अतित्रसन् पुनः पुनरतिशयेन वा त्रासयन्ति यथा ते पराङ्मुखा भूत्वा सङ्ग्रामात्पलायन्ते ।

यैरिन्द्रः प्रक्रीडते पद्घोषैश्छायया सह ।
तैरमित्रास्त्रसन्तु नोमी ये यन्त्यनीकशः ॥८॥

पदपाठः

यैः । इन्द्रः । प्रऽक्रीडते । पत्ऽघोषैः । छायया । सह । तैः । अमित्राः । त्रसन्तु । नः । अमी इति । ये । यन्ति । अनीकऽशः ॥८॥

यैः सैनिकैः सह छायया छायायुद्धेन कृत्रिमयुद्धेन निमित्तेन, पद्घोषैः छायायुद्धप्रसङ्गे सञ्चलतां योद्धृसमूहानां पदध्वनिभिः इन्द्रो देवराजः अस्मन्नृपो वा प्रक्रीडते प्रकर्षेण मोदमापद्यते तैः छायायुद्धैः सैनिकानां सञ्चलनध्वनिभिश्च येऽमी नः अमित्राः शत्रवः अनीकशः सेनाविभागशः यन्ति प्रचलन्ति ते त्रसन्तु भयार्ता भवन्तु । अनीकं सेना तद्विभागो वा यत्र नियतसङ्ख्याका अश्वगजरथपदातयो भवन्ति । अक्षौहिण्या दशमो भागः । अनीकशो विभागशः । त्रसन्तु त्रस्यन्तु । विकरणव्यत्ययश्छान्दसः ।

ज्याघोषा दुन्दुभयोऽभि क्रोशन्तु या दिशः ।
सेनाः पराजिता यतीरमित्राणामनीकशः ॥९॥

पदपाठः

ज्याऽघोषाः । दुन्दुभयः । अभि । क्रोशन्तु । याः । दिशः । सेनाः । पराऽजिताः । यतीः । अमित्राणाम् । अनीकऽशः ॥९॥

या दिशः याभिर्दिग्भिः अमित्राणाम् अस्मदरीणां सेनाः अनीकशो विभागशः प्रचलन्त्यो यतीः गच्छन्त्यो भवन्ति तासु तासु दिक्षु अस्माकं सैनिकानां ज्याघोषाः शरान् क्षिपतां धनुषां प्रत्यञ्चारवाः अस्माकं दुन्दुभयश्च अभिक्रोशन्तु गर्जन्तु । यत्र यत्र शत्रुसेनाः सन्ति तत्र तत्र अस्मद्भटानां शराः यान्तु दुन्दुभिघोषश्च गच्छतु ।

आदित्य चक्षुरादत्स्व मरीचयोऽनु धावत ।
पत्सङ्गिनीरा सजन्तु विगते बाहुवीर्ये ॥१०॥

पदपाठः

आदित्य । चक्षुः । आ । दत्स्व । मरीचयः । अनु । धावत । पत्ऽसङ्गिनीः । आ । सजन्तु । विऽगते । बाहुऽवीर्ये ॥१०॥

हे **आदित्य** ! अस्मच्छत्रूणां **चक्षुः आदत्स्व** तेषां दृष्टिं हर । तान् प्रभाप्रतिहतदृष्टीन् कुरु । आदित्यो हि चक्षुषोः शक्तिः । "आदित्यश्चक्षुषि प्रतिष्ठितः ।" (शां. आ १०।१), "असौ वा आदित्यो रुचः प्रदाता ।" (काठ. सं. १३।८) इति श्रुतेः । **मरीचयः** हे विद्युत्किरणाः ! तान् भीषयन्तः **अनुधावत** । अग्रत आदित्य आहन्तु पश्चाद्भागे च विद्युतः इति । एवमन्धीभूतानां तडिद्भिराहतानां परेषां, बाहुवीर्ये विगते भुजबले विगलिते पत्सङ्गिनीः पादलग्नाः श्रृङ्खलास्तान् **आसजन्तु** बध्नन्तु । ते निगडिता भवन्त्विति । आसजन्तु अनुनासिकलोपो छन्दसि बाहुलकात् ।

यूयमुग्रा मरुतः पृश्निमातरः
इन्द्रेण युजा प्रमृणीत शत्रून् ।
सोमो राजा वरुणो राजा
महादेव उत मृत्युरिन्द्रः ॥११॥

पदपाठः

यूयम् । उग्राः । मरुतः । पृश्निऽमातरः । इन्द्रेण । युजा । प्र । मृणीत । शत्रून् । सोमः । राजा । वरुणः । राजा । महाऽदेवः । उत । मृत्युः । इन्द्रः ॥११॥

हे **पृश्निमातरः** ! पृश्निनाम्नी सवितुर्भार्या सा माता येषां ते मरुन्नामानो गणदेवाः । 'पृश्न्या वै मरुतो जाता वाचो वाऽस्या वा पृथिव्याः' (काठ० सं. १०।११) इति श्रुतिरपि । ते यूयं सर्वे **इन्द्रेण युजा** सहायभूतेन सहिताः सन्तः । मरुतो हीन्द्रसहाया देवाः । तैः सहायैरिन्द्रो मरुत्वान् उच्यते । 'मरुत्वान् वा इन्द्रः ।' (जै. ब्रा. १।११६) । 'मरुद्भिर्वै वीर्येणेन्द्रो वृत्रमहन् न ऋते मरुद्भ्योऽशक्नोद् वीर्यं कर्तुम् ।' (मै० सं० ४।६।८) इत्यपि श्रुतिः । ते इन्द्रसहाया यूयं **मरुतः उग्राः** असह्याः भूत्वा **शत्रून्** अस्मद्विपक्षान् **प्रमृणीत** प्रकर्षेण मृदित्वा नाशयत । **सोमो राजा** 'चन्द्रमा वै सोमो राजा ।' (काठ० सं० १६।३), 'ते देवाः सोमेन राज्ञा रक्षांस्यपहत्याप्तुमात्मानं कृत्वा सुवर्गं लोकमायन् ।' (तै० सं० ६।३।२।१) इति श्रुतिः । **वरुणो राजा** । "तस्यां राजासन्द्याम् एनं वरुणं देवा अभ्यषिञ्चन्त । वसवो राज्याय, रुद्रा वैराज्यायादित्या स्वाराज्याय, विश्वेदेवास्साम्राज्याय, मरुतः सार्ववश्याय, साध्याश्चाप्त्याश्च पारमेष्ठ्याय ।" (जै० ब्रा० ३।१५२) इति ब्राह्मणमपि । **महादेवो** रुद्रः । 'स एषोऽष्टनामाष्टधा विहितो महान् देवः ।' (कौ० ब्रा० ६।९) इति ब्राह्मणमपि भवति । **उत** अपि च **मृत्युः** यमः । 'मृत्युर्वै यमः ।' (मै० सं० २।५।६) इत्यपि श्रुतिः । **इन्द्रो** देवराट् । एते सर्वे सोमवरुणरुद्रयमेन्द्रा अपि क्रुद्धा भूत्वा अस्माकमरीन् प्रमृणन्तु । प्रमृणीत मृण हिंसायां तुदादेर्लेट्, इट्

छान्दसः। उग्राः उच्यन्ते क्रुधा सम्बध्यन्त इत्युग्राः। 'ऋज्रेन्द्राग्रवज्रविप्र०' (उ० २।२८) इति रन्नन्तो निपातः।

एता देवसेनाः सूर्यकेतवः सचेतसः।
अमित्रान् नो जयन्तु स्वाहा ॥१२॥

पदपाठः

एताः। देवऽसेनाः। सूर्यऽकेतवः। सऽचेतसः। अमित्रान्। नः। जयन्तु। स्वाहा ॥१२॥

एताः सूर्यकेतवः सूर्यो केतौ ध्वजे यासां ताः, सचेतसः सह एकाभिप्रायं चेनो यासां ता ऐकमत्ययुक्ता देवसेनाः देवानां सेनाः देवस्य वाऽग्नेः सेनाभूता ज्वालाः नः अस्माकं अमित्रान् शत्रून् जयन्तु शत्रुषु विजयं प्राप्नुवन्तु। स्वाहा सुहुतेयमाहुतिर्भवतु। अस्मद्विजयमधिकृत्येमामाहुतिमग्नौ जुहुमः।



द्वाविंशं सूक्तम्

चतुर्दशर्चस्यास्य सूक्तस्य भृग्वङ्गिरा ऋषिः। तक्मनाशनो देवता। प्रथमर्चो भुरिक्त्रिष्टुप्, द्वितीयायास्त्रिष्टुप्, तृतीया-चतुर्थ्योः षष्ठ्यादिनवानाञ्चानुष्टुप्, पञ्चम्याश्च विराट्पथ्याबृहती छन्दांसि।

ज्वरभैषज्यकर्मणि 'अग्निस्तक्मानम्' इति सूक्तेन लाजान् पाययति। तथा तत्रैव कर्मणि दावाग्निप्रणयनं कृत्वा अनेन सूक्तेन ताम्रस्रुवेण मूर्ध्नि संपातान् आनयति। तथा च सूत्रम्- "अग्निस्तक्मानम्' इति लाजान् पाययति। दावे लोहितपात्रेण मूर्ध्नि संपातान् आनयति।" (कौ० सू० २६।१८, १९) इति। लाजाः कृष्णा व्रीहयः तानभिमन्त्र्य पाययति मण्डं कृत्वा।

अग्निस्तक्मानमप बाधतामितः
सोमो ग्रावा वरुणः पूतदक्षाः।
वेदिर्बर्हिः समिधः शोशुचाना
अप द्वेषांस्यमुया भवन्तु ॥१॥

पदपाठः

अग्निः। तक्मानम्। अप। बाधताम्। इतः। सोमः। ग्रावा। वरुणः। पूतऽदक्षाः। वेदिः। बर्हिः। सम्ऽइधः। शोशुचानाः। अप। द्वेषांसि। अमुया। भवन्तु ॥१॥

अयम् अग्निः ! ज्वरनाशनार्थं क्रियमाणे यज्ञे स्थितोऽग्निः **इतः** अस्माद् 'अस्मन्निवासभूतात् प्रदेशात् **तक्मानम् अपबाधताम्** अपरुध्य द्रावयतु । **सोमः** ओषधीनां राजा तक्मानमपबाधताम् । "औषधो हि सोमो राजौषधिभिस्तं' भिषज्यति ।" (ऐ० ब्रा० ३।४०) इति ब्राह्मणमपि । तथैव **ग्रावा** सोमपेषणप्रस्तरः सोऽप्यत्र स्तूयते तस्य वज्ररूपत्वात् । 'वज्रो वै ग्रावा' (मै० सं० ४।५।४) इति श्रुतिरपि । स ग्रावा तक्मानमपबाधताम् । **वरुणः** अपबाधताम् । वरुणो यक्ष्मनाशकः 'वारुणं श्यामशितिकण्ठमालभते यं व्योमानं यक्ष्मो गृह्णाति ।' (काठ० सं० १३।६) इति श्रुतेः । **बर्हिः** वेदिः परितः आस्तीर्णा दर्भाः, **समिधः** पलाशखदिराद्याः अग्नौ हुताः सत्यः **शोशुचानाः** अतिशयेन दीप्यन्त्यो ज्वलन्त्यो वा । समिधामौषधीयगुणवत्वादत्र स्मरणम् । सर्वे एते **पूतदक्षाः** पूताश्च दक्षाश्च स्वयं पवित्रा रोगहरणे दक्षाश्च ते सर्वे तक्मानम् अपबाधन्ताम् । **द्वेषांसि** द्वेषयुक्तानि रोगकारीणि सत्त्वानि **अमुया** अमुष्याः । पञ्चम्यर्थे तृतीया । अमुष्या मर्यादाया बहिः **अपभवन्तु** अपगच्छन्तु । अस्मन्निवासभूमेरपसरन्तु । तक्मानं, तकि कृच्छ्रजीवने भ्वादेरौणादिको मनिन् । शोशुचानाः शुच दीप्तौ भ्वादेर्यङ्लुकि 'गुणो यङ्लुकोः' (पा० ७।४।८२) इत्यभ्यासस्य गुणः । व्यत्ययेन शानच् ।

अयं यो विश्वान् हरितान्
कृणोष्युच्छोचयन्नग्निरिवाभिदुन्वन् ।
अधा हि तक्मन्नरसो हि भूया
'अधा न्यङ्ङधराङ् वा परेहि ॥२॥

पदपाठः

अयम् । यः । विश्वान् । हरितान् । कृणोषि । उत्ऽशोचयन् । अग्निःऽइव । अभिऽदुन्वन् । अध । हि । तक्मन् । अरसः । हि । भूयाः । अध । न्यऽङ् । अधराङ् । वा । परा । इहि ॥२॥

यः अयं यत्प्रकारस्त्वं **विश्वान्** पीतज्वरपीडितान् मनुष्यान् **उच्छोचयन्** अतिदुःखार्त्तान् कुर्वन् तथा च **अग्निरिव अभिदुन्वन्** तापेन अभितः शोषयन्, **हरितान्** पीतवर्णानापादयसि । स त्वं हे **तक्मन्** ! **अधा** अथ अध अतोऽनन्तरं ज्वरनाशनार्थ-यज्ञसम्पादनानन्तरं **हि** अवश्यमेव **अरसः** निर्बलः मन्दो **भूयाः** भविष्यसि । **अध** तदनन्तरं च **न्यङ्** नीचान् प्रदेशान् अपुनरावर्तनाय **परेहि** दूरे गच्छ । यद्वा **अधराङ्** अधःस्थितान् पातालप्रदेशान् परेहि । अधा इत्युभयत्र सांहितिको दीर्घः ।

यः परुषः पारुषेयोऽवध्वंस इवारुणः ।
तक्मानं विश्वधावीर्याधराञ्चं परा सुवा ॥३॥

पदपाठः

यः । परुषः । पारुषेयः । अवध्वंसःऽइव । अरुणः । तक्मानम् । विश्वधाऽवीर्य । अधराञ्चम् । परा । सुव ॥३॥

यः तक्मा **परुषः** कठोरस्तीव्रो वा तथा च **पारुषेयः** परुस्सु संधिपर्वसु भवः । सन्धिषु पीडाम् उत्पादयन् **अवध्वंसः** निःशेषध्वंसकारी अग्निः **इव अरुण** आरक्तवर्णः भवति तम् एतादृशं **तक्मानं** हे **विश्वधावीर्य** ! यस्य वीर्यं बलं विश्वधा सर्वत्र अनुभूयते सः तत्सम्बुद्धौ यज्ञियाग्ने ! एनं तक्मानम् **अधराञ्चम्** अधरादप्यधरं स्थानमपुरावर्तनाय **परासुव** निष्कासय । 'परुषः पिपर्तीति' । पॄ पालनपूरणयोर्जुहोत्यादेः 'पॄनहिकलिभ्य उषच्'(उ.४।७५) । पारुषेयः परुःसु भवः । पिपर्तेः'अर्तिपॄवपियजि.' (उ० २।११७) इति उस् । परू इत्यस्मात् 'शुभ्रादिभ्यश्च' (पा० ४।१।१२३) इति ढक् । परासुवा इति संहितायां दीर्घः ।

अधराञ्चं प्र हिणोमि नमः कृत्वा तक्मने ।
शकम्भरस्य मुष्टिहा पुनरेतु महावृषान् ॥४॥

पदपाठः

अधराञ्चम् । प्र । हिनोमि । नमः । कृत्वा । तक्मने । शकम्ऽभरस्य । मुष्टिऽहा । पुनः । एतु । महाऽवृषान् ॥४॥

तक्मने नमः कृत्वा नमोऽञ्जलिं कृत्वा । यद्वा नमो वज्रः मन्त्ररूपो यज्ञरूपो वा तत् कृत्वा तेन प्रहृत्य **अधराञ्चम्** अधोगामिनम् अधःस्थितान् जलमयान् प्रदेशान् प्रति **प्रहिणोमि** तत्र गन्तुं प्रेरयामि । **शकम्भरस्य मुष्टिहा** शकं शकृत् बिभर्ति शकम्भरो नाम देशविशेषो यत्र जना काष्ठाभावे शकृत्काण्डानुपयुञ्जन्ति तत्रत्यो जनोऽपि शकम्भरः, तस्य मुष्टिं हन्ति मुष्टिपर्वसु वेदनां करोति स मुष्टिहा तक्मा **महावृषान् पुनः एतु** । महावृषेति नाम्ना प्रसिद्धेभ्यो जनपदेभ्य आगतः पुनस्तत्रैव गच्छतु । महावृषान् महावृष्टिमतः प्रदेशानिति केचित् । तन्नामानो जनपदा इति प्राकरणिकोऽर्थः । प्रकरणे मूजवत्–शकम्भर–बाल्हिकादिदेशविशेषनाम दर्शनात् ।

विशेषः-- मुष्टिहा मुष्टिप्रहारेण हन्तेति लुड्विगः । शकम्भरस्य शाकभक्षकस्य मुष्ट्या हन्तेति माधवाचार्यः । शकम्भरस्य शाकभक्षकस्य मष्ट्या यो हन्यते शाकानां रोगप्रतिरोधकशक्तिमत्त्वात् । शकम्भरस्य मुष्टिं यो हन्ति अङ्गुलिपर्वसु वेदनाम् उत्पाद्य मुष्टिं हन्तीति साधीयः इति सं०

ओको अस्य मूजवन्त ओको अस्य महावृषाः ।
यावज्जातस्तक्मंस्तावानसि बल्हिकेषु न्योचरः ॥५॥

पदपाठः

ओकः । अस्य । मूजऽवन्तः । ओकः । अस्य । महाऽवृषाः । यावत् । जातः । तक्मन् । तावान् । असि । बल्हिकेषु । निऽओचरः ॥५॥

मूजवन्तः तन्नामको जनपदविशेषः यत्र मूजवान्नाम गिरिर्वर्तते । यद्वा मूञ्जतृणमयः कश्चिज्जलार्द्रः प्रदेशः । तत्र हि ज्वरस्याधिकः प्रभावो भवति । स देशः **अस्य** तक्मनः **ओको** निवासभूमिर्भवति । **महावृषाः** तन्नामको देशविशेषः । महान्तो वृषा वृषभा यत्र, महद् वर्षं यत्रेति वा । स प्रदेशोऽपि तव **ओको** निवासभूमिर्वर्तते । तथा च हे **तक्मन्** ! त्वं **यावज्जातः** यदाप्रभृति जातः **तावान्** तत आरभ्य त्वं **बल्हिकेषु** तन्नाम्नि प्रदेशविशेषे **न्योचरोऽसि** । तत्र निवसितोऽसि । यद्वा यावन्मात्रस्त्वं बाल्हिकेषु जातस्तावान् तन्मात्र एव न तु न्यूनोऽधिको वा तत्र वासं रोचयसि । न्योचरः निपूर्वाद् उच समवाये भ्वादेः पचाद्यच् । न्योचो निवासः न्योचं राति न्योचरः । पचाद्यच् ।

तक्मन् व्याल वि गद व्यङ्ग भूरि यावय ।
दासीं निष्टक्वरीमिच्छ तां वज्रेण समर्पय ॥६॥

पदपाठः

तक्मन् । विऽआल । वि । गद । विऽअङ्ग । भूरि । यवय । दासीम् । निःऽतक्वरीम् । इच्छ । ताम् । वज्रेण । सम् । अर्पय ॥६॥

हे **व्याल** ! हे हिंस्र **तक्मन्** ! हे शठ इति कश्चित् । हे **विगद** ! बलवद्रोगरूप अथवा हे विषमगदज्वर ! हे **व्यङ्ग** ! अङ्गविकारकृत् ! विगतमङ्गं यस्येति यत् तन्न समीचीनम् **भूरि यावय** सांहितिको दीर्घः । यवय इतः अतिदूरं निर्गच्छ । **दासी** दासस्यानार्यस्य स्त्रीम् **इच्छ** तां गन्तुमिच्छ । कीदृशीं दासीम् ? **निष्टक्वरीं** निकृष्टां तक्वरीं विहासशीलां दुर्वृत्ताम् असंयतां दासीम्, तामाविशेत्यर्थः । गत्वा च **तां वज्रेण समर्पय** वज्ररूपेण तवावेशेनाहतां कुरु । निष्टक्वरीं निपूर्वात् तक हसने भ्वादेः ताच्छील्ये क्वरप् ङीप् च । 'तक्वा स्तेनः' इति निघण्टुः (३।२४)

तक्मन् मूजवतो गच्छ बल्हिकान् वा परस्तराम् ।
शूद्रामिच्छ प्रफर्व्यं तां तक्मन् वीव धूनुहि ॥७॥

पदपाठः

तक्मन् । मूजऽवतः । गच्छ । बल्हिकान् । वा । परःऽतराम् । शूद्राम् । इच्छ । प्रऽफर्व्यम् । तान् । तक्मन् । विऽइव । धूनुहि ॥७॥

हे **तक्मन्** ! अनेन ज्वरशान्तिकर्मणा निष्कासितस्त्वं **मूजवतः** प्रदेशान् गच्छ। **वा** अथवा **परस्तराम्** ततोऽप्यधिकं परः दूरं **बल्हिकान्** गच्छ । तत्र बाल्हिकेषु मूजवत्सु वा काञ्चित् **प्रफर्व्यं** बृहन्नितम्बां स्वैरिणीं **शूद्रां** निकृष्टजातीयां स्त्रियम् **इच्छ** तामावेष्टुमिच्छ, तान् बल्हिकवासिनो जनान् ज्वराहतान् कृत्वा **विधूनुहि इव** अतिपीडय, तान् प्रकम्पितानिव कुरु।

महावृषान् मूजवतो बन्ध्वद्धि परेत्य ।
प्रैतानि तक्मने ब्रूमो अन्यक्षेत्राणि वा इमा ॥८॥

पदपाठः

महाऽवृषान् । मूजऽवतः । बन्धुः । अद्धि । पराऽइत्य । प्र । एतानि । तक्मने । ब्रूमः । अन्यऽक्षेत्राणि । वै । इमा ॥८॥

हे तक्मन् ! **महावृषान्** वा **मूजवतः** तान् तवानुकूलान् प्रदेशान् **परेत्य** इतोऽतिदूरं गत्वा तत्र **बन्धु** तवात्मीयवर्गम् **अद्धि** भक्षय । बन्धु इति छान्दसं रूपम् । तत्रत्यो जनस्त्वत्सहवासी तव बन्धुस्तम् आविश । **तक्मने** तुभ्यं ज्वराय **प्रैतानि** अतिदूराणि स्थानानि महावृषादीनि त्वन्निवासयोग्यानि **ब्रूमो** निश्चिनुमः । अथवा **इमा** इमानि बल्हिकादीनि **अन्यक्षेत्राणि** तावद्दूरे स्थितानि निवासाय निश्चिनुमः । तत्रैव त्वं वस नात्रेति भावः ।

अन्यक्षेत्रे न रमसे वशी
सन् मृडयासि नः ।
अभूदु प्रार्थस्तक्मा स
गमिष्यति बल्हिकान् ॥९॥

पदपाठः

अन्यऽक्षेत्रे । न । रमसे । वशी । सन् । मृडयसि । नः । अभूत् । ऊं इति । प्रऽअर्थः । तक्मा । सः । गमिष्यति । बल्हिकान् ॥९॥

हे तक्मन् ! **अन्यक्षेत्रे** त्वदीयादन्यस्मिन् परकीये क्षेत्रे निवासभूमौ **न** त्वं **रमसे** । न परकीयं क्षेत्रं ते निवासाय रोचते । अतः स्वक्षेत्रं गच्छेति सूचितम् । **वशी सन्** स्वात्मानं वशे कृत्वा त्वम् इतो गतः **नः** अस्मान् **मृडयासि** सुखयिष्यसि । यद्वा अनेन ज्वरशान्तिकर्मणा वशीभूतः सन् इतो दूरं गत्वा त्वमस्मान् सुखय । स एवं वशीभूतः **तक्मा प्रार्थोऽभूद् उ** निश्चयेन प्रार्थः शकटयुक्तोऽनड्वान् अभूत् । स यथा शकटम् अन्यं प्रदेशं प्रति वहति तथाऽयं तक्मा प्रवृत्तः । **सः** तक्माऽधुना **बल्हिकान् गमिष्यति** । नात्र स्थास्यतीत्याकूतम् ।

विशेषः—अभूदु प्रार्थः 'त्वं (हे तक्मन्) प्रार्थितोऽसि' इति माधवाचार्यः। 'त्वं प्रार्थोऽसि बलवानसि दूरमितो गन्तुं क्षमोऽसि' इति सातवलेकरः। 'गन्तुं त्वं प्रवृत्तोऽसि' इति ह्विटनिः। 'प्रार्थोऽनड्वान् प्रकर्षेण इयर्ति गच्छतीति प्रार्थः' इति पञ्चविंशब्राह्मणटीकायां ह्विटनिना लक्षितोऽर्थः। स एव साधीयानर्थः प्रतिभाति इति सम्पा.।

यत् त्वं शीतोथो रूरः
सह कासावेपयः।
भीमास्ते तक्मन् हेतयस्ताभिः
स्म परि वृङ्धि नः ॥१०॥

पदपाठः

यत्। त्वम्। शीतः। अथो इति। रूरः। सह। कासा। अवेपयः। भीमाः। ते। तक्मन्। हेतयः। ताभिः। स्म। परि। वृङ्धि। नः ॥१०॥

हे तक्मन्! यद् यदि वा त्वं शीतः शीतज्वरः अथो अथवा रूरः उष्णो ज्वरः त्वं यदि कासा सह कासेन क्षवथुना सहागतश्चेद् अवेपयः अधिकं कम्पयसि। ते हेतयः शैत्यौष्ण्यकफादिरूपाण्यायुधानि भीमाः भयङ्कराः सन्ति ताभिः हेतिभिः नः अस्मान् परिवृङ्धि। अस्मान् परिवर्जय। माऽस्मान्प्रहर।

मास्मैतान्त्सखीन् कुरुथा
बलासं कासमुद्युगम्।
मा स्मातोर्वाङैः पुनस्तत्
त्वा तक्मन्नुप ब्रुवे ॥११॥

पदपाठः

मा। स्म। एतान्। सखीन्। कुरुथाः। बलासम्। कासम्। उत्ऽयुगम्। मा। स्म। अतः। अर्वाङ्। आ। ऐः। पुनः। तत्। त्वा। तक्मन्। उप। ब्रुवे ॥११॥

हे तक्मन्! बलासं कफं, कासं शुष्कं क्षवथुम् उद्युगं क्षयं स्पर्शजन्यमागन्तुकं वा कञ्चिद् रोगमेवम् एतान् तव सखीन् मा स्म कुरुथाः तव मित्रभूतान् सहवासिनो मा कृथाः। मास्मानेतैः रोगैः सहाविश्य पीपिडः। अतः एतस्मान्निर्धारितान्मन्त्र-रक्षितात् प्रदेशाद् अर्वाङ् अन्तर्भागे मा स्म उप ऐः मा समीपम् आगमः। तत् एतन्निषधवचः त्वा त्वां पुनः ब्रुवे। पूर्वमुक्तमधुना पुनरपि तत् कथयामि मा विस्मार्षीः। उद्युगम् उत्पूर्वाद् युजेः पचाद्यच्। गुणाभावश्छान्दसः।

तक्मन् भ्राता बलासेन
स्वस्रा कासिकया सह ।
पाप्मा भ्रातृव्येण सह
गच्छामुमरणं जनम् ॥१२॥

पदपाठः

तक्मन् । भ्राता । बलासेन । स्वस्रा । कासिकया । सह । पाप्मा । भ्रातृव्येण । सह । गच्छ । अमुम् । अरणम् । जनम् ॥१२॥

हे **तक्मन्** ! तव **भ्राता** भ्रातृभूतेन सहजेन, **बलासेन** कफेन सह, **स्वस्रा** भगिनीभूतया सहजया **कासिकया** क्षुद्रक्षवथुना सह, **भ्रातृव्येण** भ्रातृपुत्रेण स्वजनभूतेन **पाप्मा** पाप्मना पापरूपेण क्षयादिना च सहितस्त्वम् **अमुं** दूरतरदेशस्थम् **अरणम्** अन्यकुलजातम् अस्माकमबन्धुं **जनं गच्छ** । 'अरणोऽपार्णो भवति, अरणस्यापगतार्णस्यापगतोदकसम्बन्धस्य परकुलजातस्य कृत्रिमस्य पुत्रस्य' इति निरुक्तम् (३।२०) ।

विशेषः––पाप्मा मलिन इति माधवाचार्यः । 'पाप्मा' इति स्थाने 'पाम्ना' इति रोथव्हिटनिभ्यां निश्चितः पाठो विश्वबन्धुशास्त्रिभिः उल्लिखितः । अन्येनापि 'पाप्मना' इति पाठः उल्लखितः । व्हिटनिस्तु पाम्ना इति पाठमनुसृत्य 'पाना चर्मरोगेण' इत्यनुवदति ।

तृतीयकं वितृतीयं सदन्दिमुत शारदम् ।
तक्मानं शीतं रूरं ग्रैष्मं नाशय वार्षिकम् ॥१३॥

पदपाठः

तृतीयकम् । विऽतृतीयम् । सदम्ऽदिम् । उत । शारदम् । तक्मानम् । शीतम् । रूरम् । ग्रैष्मम् । नाशय । वार्षिकम् ॥१३॥

अस्मिन् तक्मनिवारणकर्मणि हे यज्ञियाग्ने ! **तृतीयकं** तृतीये दिने आवर्तमानं **वितृतीयं** तृतीयाद् विशिष्टं चातुर्थिकादिकं **सदन्दिं** सातत्येनाविशन्तम् **उत** अपि च **शारदं** शरदृतौ भवं **शीतं** शैत्येन सहाविशन्तं **ग्रैष्मं** ग्रीष्मर्तौ भवं **रूरम्** उष्णज्वरं **वार्षिकं** वर्षासु भवं वृष्टिकारणाज्जातम् इत्येवं सर्वप्रकारकं **तक्मानं** ज्वरं त्वम् अस्माभिस्तर्पितो **नाशय** ।

गन्धारिभ्यो मूजवद्भ्योऽङ्गेभ्यो मगधेभ्यः ।
प्रैष्यन् जनमिव शेवधिं तक्मानं परिदद्मसि ॥१४॥

पदपाठः

गन्धारिऽभ्यः । मूजवत्ऽभ्यः । अङ्गेभ्यः । मगधेभ्यः । प्रऽएष्यन् । जनम्ऽइव । शेवऽधिम् । तकमानम् । परि । दद्मसि ॥१४॥

अनेन तक्मनाशनकर्मणा वयं यजमानर्त्विगादयः गन्धारिभ्यः गन्धाराणां जनपदेभ्यः, मूजवद्भ्यः मूजवत्प्रदेशात्, अङ्गेभ्यः अङ्गदेशस्थेभ्यः मगधेभ्यः मगधदेशस्थेभ्यः सर्वेभ्य एतेभ्यो देशस्थेभ्यः तत्र निवासिनां जनानां मध्यात् कञ्चित् जनमिव शेवधिं धननिधिं प्रैष्यन् प्रहिण्वन् कश्चिद् भवति तथैव वयमेनं तक्मानं तेभ्यः परिदद्मसि सामग्र्येण दद्मः। प्रैष्यन् प्रपूर्वकस्य इण् गतावित्यस्य भविष्यति शत्रन्तम्।



त्रयोविंशं सूक्तम्

त्रयोदशर्चस्यास्य सूक्तस्य कण्व ऋषिः। इन्द्रादयो देवताः। प्रथमादिद्वादशर्चामनुष्टुप्, त्रयोदयाश्च विराडनुष्टुप् छन्दसी।

कृमिभैषज्यकर्मणि 'ओते मे द्यावापृथिवी' इति सूक्तेन करीरमूलं संपात्य अभिमन्त्र्य बध्नीयात्। तथा अनेन सूक्तेन गोवालैः करीरकाष्टं वेष्टयित्वा सूक्तं जपित्वा पाषाणेन चूर्णयति। ततः सूक्तेनाग्नौ प्रतपति। ततः सूक्तेनादधाति। तथा अनेन सूत्रेण ग्रामपांसून् अभिमन्त्र्य सव्येन हस्तेन दक्षिणामुखो भूत्वा पांसून् परिकिरति। तथा अनेन सूक्तेन पांसून् अभिमन्त्र्य हस्तेन मथित्वा कृमेरुपरि क्षिपति। तथा अनेन सूक्तेन शान्तिवृक्षसमिध आदधाति। कृमिभञ्जनम्। तथा अनेन सूक्तेन पश्चादग्नेर्मातुरुत्सङ्गे बालं कृत्वा नवनीताक्तेन मूसलबुध्नेन तालुनि तापयति। त्रिः सूक्तप्रयोगः। तथा अनेन सूक्तेन शिग्रुबीजेन नवनीतमिश्रेण अभिमन्त्र्य व्याधिदेशं प्रलिम्पति। तथा अनेन सूक्तेन एकविंशत्युशीराणां मूलान्यभिमन्त्र्य पाषाणेन कुट्टयति। ततः सूक्तं जपित्वा उशीराणि अग्निना दहति। तथा अनेन सूक्तेन उदकघटम् एकविंशत्युशीरपिञ्जुलीसहितं सम्पात्य अभिमन्त्र्य व्याधितम् आप्लावयति। तदुक्तं कौशिकसूत्रे– 'ओते मे' इति करीरमूलं काण्डेनैकदेशम्। ग्रामात् पांसून्। पश्चादग्नेर्मातुरुपस्थे मूसलबुध्ने नवनीताक्तेन त्रिः प्रतीहारं तालुनि तापयति। शिग्रुभिर्नवनीतमिश्रैः प्रदेग्धि। एकविंशतिम् उशीराणि 'भिनद्मि' (१३) इति मन्त्रोक्तम्। उशीराणि प्रयच्छति। एकविंशत्या सहाप्लावयति। (कौ० सू० २९।२०।२६) इति।

ओते मे द्यावापृथिवी ओता देवी सरस्वती।
ओतौ म इन्द्रश्चाग्निश्च क्रिमिं जम्भयतामिति ॥१॥

पदपाठः

ओते इत्याऽउते। मे। द्यावापृथिवी इति। आऽउता। देवी। सरस्वती। आऽउतौ। मे। इन्द्रः। च। अग्निः। च। क्रिमिम्। जम्भयताम्। इति ॥१॥

मन्त्रोऽयम् अथर्व० ६।९४।३ इत्यत्र अन्तिमचरणपाठान्तरं विहाय सम्पूर्णः सायणेन व्याख्यातो यथा– 'द्यावापृथिवी द्यौश्च पृथिवी च द्यावापृथिव्यौ । 'दिवो द्यावा', 'दिवसश्च पृथिव्याम्' (पा० ६।३।२९,३०) इति द्यावादेशः । 'सुपां सुलुक्०' (पा० ७।१।२९) इति पूर्वसवर्णदीर्घः । ते उभे मे मह्यम् ओते आभिमुख्येन संतते परस्परसम्बद्धे वा देवी द्योतमाना सरस्वती द्यावापृथिव्योर्मध्ये वर्तमाना वाग्देवता सापि ओता । अस्मदाभिमुख्येन स बद्धा । आङ्पूर्वाद् वेञ् तन्तुसंताने इत्यस्मान्निष्ठा । 'वचि स्वपि०' (पा० ६।१।१५) इत्यादिना सम्प्रसारणम् । तथा इन्द्रश्च अग्निश्च मे मह्यं मदभिलषितफलसिद्धयर्थम् ओतौ आभिमुख्येन सम्बद्धौ परस्परप्रोतौ वा एककार्योद्युक्तौ । एते सर्वे देवा द्यावापृथिव्यौ, सरस्वती इन्द्राग्नी च स्वप्रभावेन क्रिमिं क्रिमिजन्यं च रोगम् । क्रमु पादविक्षेपे भ्वादेः 'क्रमितमिशस्तम्भामत इत्' (उ० ४।१२२) इति किः । बाहुलकात् सम्प्रसारणम् । क्रिमिः, कीटः कृमिः । तं क्रिमिमेतेषां प्रत्येको देवः जम्भयतां नाशयतु ।

अस्येन्द्र कुमारस्य क्रिमीन् धनपते जहि ।
हता विश्वा अरातय उग्रेण वचसा मम ॥२॥

पदपाठः

अस्य । इन्द्र । कुमारस्य । क्रिमीन् । धनऽपते । जहि । हताः । विश्वाः । अरातयः । उग्रेण । वचसा । मम ॥२॥

हे धनपते ! मघवन् इन्द्र ! अस्य कुमारस्य पञ्चवर्षकल्पे वयसि वर्तमानस्यास्य बालस्य क्रिमीन् उदरस्थान् शरीरशोषकान् कृमीन् जहि । अनेन मया शक्रमुद्दिश्य पठितेन उग्रेण रोगनाशनसमर्थेन वचसा मन्त्ररूपेण विश्वाः विश्वे सर्वेऽपि अरातयः शरीरे व्याधिमुत्पादयन्तोऽत एव अरातय शत्रुभूताः क्रिमयः हताः नष्टाः भवन्तु ।

यो अक्ष्यौ परिसर्पति यो नासे परिसर्पति ।
दतां यो मध्यं गच्छति तं क्रिमिं जम्भयामसि ॥३॥

पदपाठः

यः । अक्ष्यौ । परिऽसर्पति । यः । नासे इति । परिऽसर्पति । दताम् । यः । मध्यम् । गच्छति । तम् । क्रिमिम् । जम्भयामसि ॥३॥

यः क्रिमिः अक्ष्यौ परिसर्पति अक्ष्णोर्मध्ये इतस्ततश्चलति, यश्च नासे नासिकाविवरयोर्मध्ये परिसर्पति, यः क्रिमिः दतां मध्यं दताम् अन्तर्भागे छिद्रेषु गत्वा दन्तान् निर्मूलयति तं तत्तदवयवहानिकरं क्रिमिम् अनेन क्रिमिघ्नेन मन्त्रेण जम्भयामसि वयं नाशयामः । क्रिमिजनितं नेत्ररोगं नासारोगं दन्तरोगम् अनेन क्रिमिघ्नमन्त्रेण निवारयामः । अक्ष्यौ अक्षिशब्दस्य 'ईच द्विवचने,' (पा०७।१।७७) इति ईकारान्तादेशः ।

सरूपौ द्वौ विरूपौ द्वौ
कृष्णौ द्वौ रोहितौ द्वौ ।
बभ्रुश्च बभ्रुकर्णश्च
गृध्रः कोकश्च ते हताः ॥४॥

पदपाठः

सऽरूपौ । द्वौ । विऽरूपौ । द्वौ । कृष्णौ । द्वौ । रोहितौ । द्वौ । बभ्रुः । च । बभ्रुऽकर्णः । च । गृध्रः । कोकः । च । ते । हताः ॥४॥

सरूपौ समानाकारौ द्वौ द्विप्रकारौ क्रिमी, **विरूपौ** परस्परं भिन्नरूपौ **द्वौ** क्रिमी, **कृष्णौ** श्यामवर्णौ द्वौ द्विप्रकारौ, रोहितौ रक्तवर्णौ द्वौ, बभ्रुः पिङ्गलवर्णः, **बभ्रुकर्णः** शरीरेऽन्यवर्णः कर्णयोर्बभ्रुवर्णः क्रिमिः, गृध्रः गृध्रवन्मांसलोलुपः क्रिमिः, **कोको** वृकः तत्सदृशो हिंस्रः क्रूरश्च क्रिमिः ते सर्वे हानिकराः क्रिमयः अनेन क्रिमिघ्नमन्त्रेण हताः नष्टा भवन्तु । बभ्रुः भृञ् भरणे भ्वादेः "कुर्भ्रश्च" (उ० १।२२) इति कुः द्वित्वं च । गृध्रः, गृधु अभिकाङ्क्षायां दिवादेः "सुसूधाञ्-गृधिभ्यः क्रन्" (उ० २।२४) । कोकः, कुक आदाने पचाद्यच् ।

ये क्रिमयः शितिकक्षा
ये कृष्णाः शितिबाहवः ।
ये के च विश्वरूपास्तान्
क्रिमीन् जम्भयामसि ॥५॥

पदपाठः

ये । क्रिमयः । शितिऽकक्षाः । ये । कृष्णाः । शितिऽबाहवः । ये । के । च । विश्वऽरूपाः । तान् । क्रिमीन् । जम्भयामसि ॥५॥

एतेषु क्रिमिषु ये शितिकक्षाः शिती श्यामौ धवलौ वा कक्षौ येषां ते, **ये च शितिबाहवः** धवलभुजाः धवलपादाः मेचकभुजाः वा **क्रिमयः** ये चान्ये **विश्वरूपा** विविधाकारवर्णाः सन्ति तान् सर्वान् क्रिमीन् अनेन क्रिमिघ्नेन मन्त्रेण **जम्भयामसि** विनाशयामः ।

उत् पुरस्तात् सूर्य
एति विश्वदृष्टो अदृष्टहा ।
दृष्टांश्च घ्नन्नदृष्टांश्च
सर्वांश्च प्रमृणन् क्रिमीन् ॥६॥

पदपाठः

उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा । दृष्टान् । च । घ्नन् । अदृष्टान् । च । सर्वान् । च । प्रऽमृणन् । क्रिमीन् ॥६॥

अयं विश्वदृष्टः विश्वैः सर्वैः सचराचरैर्दृष्टः विश्वान् वा पश्यन्, अदृष्टहा अक्षिविषयातिक्रान्तानपि क्रिमीन् यो हन्ति सः सूर्यः तिग्मरश्मिः पुरः पूर्वस्यां दिशि उदेति उद्गच्छति । स सूर्यः दृष्टान् अक्षिगोचरान् क्रिमीन् घ्नन् हिंसन्, अदृष्टान् अतिसूक्ष्मान् अक्षिविषयातिक्रान्तानपि सर्वानेतान् क्रिमीन् प्रमृणन् हिंसन् विनाशयन् उदेति । सूर्यस्योदये तस्य तिग्मैः रश्मिभिः सर्वे क्रिमयो नश्यन्तु इति ।

येवाषासः कष्कषास एजत्काः शिपवित्नुकाः ।
दृष्टश्च हन्यतां क्रिमिरुतादृष्टश्च हन्यताम् ॥७॥

पदपाठः

येवाषासः । कष्कषासः । एजत्ऽकाः । शिपवित्नुकाः । दृष्टः । च । हन्यताम् । क्रिमिः । उत । अदृष्टः । च । हन्यताम् ॥७॥

येवाषासः येवाषाः यवाशा इति मोनियेरविलियम्सशब्दकोशे । यवाशा यवान् ये अश्नन्ति दूषयन्ति ते । तीक्ष्णगामिन इत्यपि कश्चित् । **कष्कषासः** कष्कषाः हिंसका दंशेन ये वेदनां जनयन्ति ते, एजत्काः येषां दंशेन एजनं कम्पो जायते तादृशाः । शिरांसि कम्पयन्त इति मो० वि० शब्दकोशः । **शिपवित्नुकाः** शिपं त्वचं वियन्ति गच्छन्ति ते त्वचं विदीर्यान्तः प्रविश्य त्वग्रोगं जनयन्तः सर्वं एते क्रिमयः । **उत** अपिच यो दृष्टः अक्षिगोचरः पुनश्च **अदृष्टः** अतिसूक्ष्मः दृष्टेरविषयः सोऽपि **क्रिमिः हन्यताम्** । अनेन क्रिमिघ्नमन्त्रेण विनश्यतु येवाषासः यवाशाः पचाद्यच्, पृषोदरादित्वात् साधु । एजत्काः एजृ कम्पने भ्वादेः शत्रन्तस्य स्वार्थे कप् । शिपवित्नुकाः शिपपूर्वस्य वी गतिकान्त्यादिषु इत्यस्मात् "कृहनिभ्यां क्त्नुः" (उ० ३।३०)[1] स्वार्थे कप् ।

हतो येवाषः क्रिमीणां हतो नदनिमोत ।
सर्वान् नि मष्मषाकरं दृषदा खल्वाँ इव ॥८॥

पदपाठः

हतः । येवाषः । क्रिमीणाम् । हतः । नदनिमा । उत । सर्वान् । नि । मष्मषा । अकरम् । दृषदा । खल्वान्ऽइव ॥८॥

अनेन मया प्रयुक्तेन क्रिमिघ्नेन मन्त्रेण क्रिमीणां मध्ये यः येवाषः यवेषु दोषमुत्पाद्य रोगकृत् क्रिमिर्मया हतः । उत अपि च नदनिमा नादकृत् क्रिमिरपि

हतः। दृषदा पेषण्यां खल्वान् इव चणकानिव। खल्वाः चणका इति सायणः (अ० २।३१।१)। चणकानिव **सर्वान् क्रिमीन् मश्मषा नि अकरवम्** सम्पेषणेन निराकरवम्, सर्वान् अनाशयम्। नदनिमा नदतेः इमनिच् औणादिकः निपातनाच्च नकारागमः।

त्रिशीर्षाणं त्रिककुदं क्रिमिं सारङ्गमर्जुनम्।
शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः ॥९॥

पदपाठः

त्रिऽशीर्षाणम्। त्रिऽककुदम्। क्रिमिम्। सारङ्गम्। अर्जुनम्। शृणामि। अस्य। पृष्टीः। अपि। वृश्चामि। यत्। शिरः ॥९॥

त्रिशीर्षाणं त्रीणि शिरांस्यस्य तम् त्रयो मस्तकाकारा अवयवा यस्य तम्, **त्रिककुदं** सर्पणावसरे त्रयः ककुदो भवन्ति यस्य शरीरस्य तम्। **सारङ्गं** शबलवर्णम् **अर्जुनं** शुभ्रवर्णम्, एवमनेकाकारं **क्रिमिं शृणामि** हन्मि। शॄ हिंसायां "प्वादीनां ह्रस्वः" (पा० ७।३।८०)। **अस्य** उक्तलक्षणस्य क्रिमेः **पृष्टीः** पार्श्वावयवान् **अपि, यच्छिरः** शरीरान्तर्मांसादिभक्षकं प्रधानमङ्गं तदपि **वृश्चामि** छिनद्मि पृष्टीः पार्श्वास्थीनि वा। यद् शिर इत्यनेन यथार्थं मस्तकमुक्तं त्रिशीर्षाणमित्यनेन शीर्षसदृशा अवयवा इति तत्त्वम्।

अत्रिवद् वः क्रिमयो हन्मि कण्ववज्जमदग्निवत्।
अगस्त्यस्य ब्रह्मणा सं पिनष्म्यहं क्रिमीन् ॥१०॥

पदपाठः

अत्रिऽवत्। वः। क्रिमयः। हन्मि। कण्वऽवत्। जमदग्निऽवत्। अगस्त्यस्य। ब्रह्मणा। सम्। पिनष्मि। अहम्। क्रिमीन् ॥१०॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २।३२।३)।

हतो राजा क्रिमीणामुतैषां स्थपतिर्हतः।
हतो हतमाता क्रिमिर्हतभ्राता हतस्वसा ॥११॥

पदपाठः

हतः। राजा। क्रिमीणाम्। उत। एषाम्। स्थपतिः। हतः। हतः। हतऽमाता। क्रिमिः। हतऽभ्राता। हतऽस्वसा ॥११॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २।३२।४)।

हतासो अस्य वेशसो हतासः परिवेशसः ।
अथो ये क्षुल्लका इव सर्वे ते क्रिमयो हताः ॥१२॥

पदपाठः

हतासः । अस्य । वेशसः । हतासः । परिऽवेशसः । अथो इति । ये । क्षुल्लकाःऽइव । सर्वे । ते । क्रिमयः । हताः ॥१२॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २।३५।५) ।

सर्वेषां च क्रिमीणां सर्वासां च क्रिमीणाम् ।
भिनद्म्यश्मना शिरो दहाम्यग्निना मुखम् ॥१३॥

पदपाठः

सर्वेषाम् । च । क्रिमीणाम् । सर्वासाम् । च । क्रिमीणाम् । भिनद्मि । अश्मना । शिरः । दहामि । अग्निना । मुखम् ॥१३॥

सर्वेषां क्रिमीणां पुंस्क्रिमीणां सर्वासां क्रिमीणां स्त्रीक्रिमीणां च, सर्वेषामेतेषां शिरो मस्तकम् अश्मना प्रस्तरखण्डेन भिनद्मि प्रहारेण भित्वा खण्डशः करोमि । सर्वेषां चैतेषां मुखं दंशकं भक्षकं चाङ्गम् अग्निना दहामि, अश्मना पिष्टा अग्निना च दग्धाः ते समूलं नक्ष्यन्ति ।



चतुर्विंशं सूक्तम्

सप्तदशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । प्रथमर्चः सविता, द्वितीयाया अग्निः, तृतीयाया द्यावापृथिव्यौ, चतुर्थ्या वरुणः, पञ्चम्या मित्रावरुणौ, षष्ठ्या मरुतः, सप्तम्याः सोमः, अष्टम्या वायुः, नवम्याः सूर्यः, दशम्याश्चन्द्रमाः, एकादश्या इन्द्रः, द्वादश्या मरुतां पिता, त्रयोदश्या मृत्युः, चतुर्दश्या यमः, पञ्चदश्याः पितरः, षोडश्या अवरे ततः सप्तदश्याश्च ततस्ततामहा देवताः । प्रथमादिदशानां द्वादश्यादितृचस्य चातिशक्वरी, एकादश्याः शक्वरी, पञ्चदशी-षोडश्योस्त्रिपदा भुरिगतिजगती, सप्तदश्याश्च त्रिपदा विराट्शक्वरी छन्दांसि ।

पौरोहित्यं करिष्यन् 'सविता प्रसवानाम्' इति सूक्तेन शूद्रेणाहृताः समिधः आदधातीति केशवः । तथा च सूत्रम्– 'सविता प्रसवानाम् इति पौरोहित्ये वत्स्यन् वैश्वलोपीः समिध आधाय' (कौ० सू० १७।३०) इति । विश्वो लुप्यते चन्द्रमा अस्याम् इति विश्वलोपा अमावस्या । तस्यां भवा एतादृशीः समिधः । चन्द्रमसः सर्वलोपाद् अमावस्या विश्वलोपेति दारिलः । तथा अस्य सूक्तस्य विवाहे आज्यहोमे

विनियोगः । तथा च सूत्रम् 'सविता प्रसवानाम्' इति (कौ० सू० ७८।११) इति । तथा चातुर्मास्ये वैश्वदेवपर्वणि सावित्रं यागं 'सविता प्रसवानाम्' इति ब्रह्मा अनुमन्त्रयेत् । तदुक्तं वैताने - 'सविता प्रसवानाम्' इति (वै० श्रौ० ८।१३) ।

सविता प्रसवानामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्या-
माशिष्यस्यां देवहूत्यां स्वाहा ॥१॥

पदपाठः

सविता । प्रऽसवानाम् । अधिऽपतिः । सः । मा । अवतु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥१॥

सविता सर्वस्योत्पादयिता सर्वस्य प्रेरकः सर्वेश्वरः **प्रसवानाम्** उत्पन्नानां जीवाजीवानाम् **अधिपतिः** अधीश्वरः । प्रसवानां शुभेषु कर्मसु अन्तःकरणप्रवृत्तीनां प्रेरकः सविता तेषामधिपतिः । 'सविता सर्वस्य प्रसविता' (निरु० १०।३।७) इति यास्कः । 'सविता प्रसवानामीशे' (तै० सं० ३।४।५, ऐ० ब्रा० १।३०) इति श्रुतिरपि । 'सविता वै देवानां प्रसविता' (मा० श० १।१।२।१७) इत्यपि श्रुतिः । **सः** सर्वप्रेरको भगवान् **अस्मिन् ब्रह्मणि** मन्त्रात्मके **कर्मणि मा** माम् **अवतु** रक्षतु । शुभेषु कर्मसु ममान्तःकरणप्रवृत्तेः स्थिरीकरणेन स मामवतु रक्षतु पालयतु च । 'त एतद् ऋग्रेतसं यजूरेतसं ब्रह्मणि योनौ रेतो दधतो यन्ति ।' (जै० ब्रा० २।२३) 'सा या सा वाग् ब्रह्मैव तत्' (जै० उ० २।५।१।२) इति हि ब्राह्मणम् । अथवाऽस्मिन् ब्रह्मणि ब्रह्मसाक्षात्काररूपे कर्मणि स सविता मामवतु । 'तदिति वा एतस्य महतो भूतस्य (परमात्मनः) नाम भवति, योऽस्यैतदेवं नाम वेद ब्रह्म भवति ।' (ऐ० आ० ५।३।३) इति ब्राह्मणमपि भवति । स सविता **अस्मिन् कर्मणि** मयानुष्ठीयमाने यज्ञादिके कर्मणि मामवतु । 'यज्ञो वै कर्म' (मा० श० १।१।२।१) इति ब्राह्मणात् । **अस्यां पुरोधायां** यज्ञनिर्वाहकाधिष्ठातृकर्मणि मम वरणे जाते सति यज्ञनिर्वाहरूपे कर्मणि स सविता मामवतु । **अस्यां प्रतिष्ठायां** स्तोत्रशस्त्रशंसनाय यज्ञकार्यनिर्वाहाय च ऋत्विक्त्वेन वृतस्य मम यज्ञकार्यसम्पादनरूपे कर्मणि सविता मामवतु । **अस्यां चित्त्यां** अग्निचयनरूपे यद्वा अस्मिन् ज्ञानाग्निचयनरूपे कर्मणि, **अस्यामाकूत्यां** मानसिके सङ्कल्परूपव्यापारात्मके कर्मणि सविता मामवतु । "आकूत्या मनसा सह (धर्मो भवति) ।" (मै० सं० ४।८।१३) इति श्रुतेः । **अस्याम् आशिषि** यजमानस्य

मम च कल्याणकामनारूपे कर्मणि सविता मामवतु। "एषा वा आशीः। जीवेयं प्रजा मे स्याच्छ्रियं गच्छेयमिति।" (मा० श० १।८।१।३६) इति ब्राह्मणमपि। अस्यां देवहूत्यां देवानामावाहनरूपे कर्मणि स मामवतु। सवितुः प्रसादाद् यदैव देवानाह्वयामि ते आगच्छन्तु इति। "यो वै बृहद्रथन्तरयोर्देवहूती वेद....यन्त्यस्य देवा हवम्।" (जै० ब्रा० १।२९६) इति ब्राह्मणम्। स्वाहा सुहुतं भवतु। देवतावाहनं हविर्दानं स्तुतिश्चैतत् सर्वं शुभं कल्याणावहं मे भवतु। "स प्रजापतिर्विदाञ्चकार स्वो वै मा महिमा हेति, स स्वाहेत्येवाजुहोत् तस्मादु स्वाहेत्येव हूयते।" (मा० श० २।२।४।६) इति ब्राह्मणमपि।

अग्निर्वनस्पतीनामधिपतिः स मावतु।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामा-
शिष्यस्यां देवहूत्यां स्वाहा ॥२॥

पदपाठः

अग्निः। वनस्पतीनाम्। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। देवऽहूत्याम्। स्वाहा ॥२॥

अग्निः वनस्पतीनां वृक्षवीरुधाम् ओषधीनाम् अधिपतिः ईश्वरः तेषां जनकः पोषकश्च। "अग्निरायुष्मान् स वनस्पतीभिरायुष्मान्" (तै० सं० २।३।१०।३) इतिश्रुतेरग्निस्तैर्वनस्पत्यादिभिः पुष्टः "अग्निर्वै वनस्पतिः।" (कौ० ब्रा० १०।६) इति च ब्राह्मणात् स तेषां पोषकोऽपि भवति। सोऽग्निर्मां ब्रह्मणि कर्मणि पुरोधायां प्रतिष्ठायां चित्त्यामाकूत्यामाशिषि देवहूत्यां च सर्वत्र अवतु इति पूर्वमन्त्रवत्सर्वं ज्ञेयम्।

द्यावापृथिवी दातॄणामधिपत्नी ते मावताम्।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामा-
शिष्यस्यां देवहूत्यां स्वाहा ॥३॥

पदपाठः

द्यावापृथिवी इति । दातॄणाम् अधिपत्नी इत्यधिपत्नी । ते इति । मा । अवताम् । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥३॥

द्यावापृथिवी द्यौश्च पृथिवी चेत्युभे द्वन्द्वरूपे दातॄणामस्मिन् लोके सर्वस्य मनीषितस्य वस्तुजातस्य दातारो ये देवा भवन्ति तेषाम् अधिपत्नी अग्रेसरे सर्वाधिकारसम्पन्ने वा । ते मामवताम् इत्यादिकं सर्वं पूर्ववत् ।

वरुणोपामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां पुरोधायामस्यां
प्रतिष्ठायामस्यां चित्त्यामस्यामाकूत्यामस्या-
माशिष्यस्यां देवहूत्यां स्वाहा ॥४॥

पदपाठः

वरुणः । अपाम् । अधिऽपतिः । सः । मा । अवतु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥४॥

वरुणोऽपामधिपतिः । "यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानाम् । मधुश्चुतः शुचयो या पावकास्ता न आपः शं स्योनाः स्युः ।" (मै० सं० २।१३।१) "वरुणोऽपामधिपतिः" (तै० सं० ३।४।५।१) इति च श्रुतेः । स वरुणो माऽवतु । शेषं पूर्ववत् ।

मित्रावरुणौ वृष्ट्याधिपती तौ मावताम् ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥५॥

पदपाठः

मित्रावरुणौ । वृष्टयाः । अधिपती इत्यधिऽपती । तौ । मा । अवताम् । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥५॥

मित्रावरुणौ मित्रश्च वरुणश्च तावुभौ वृष्ट्याः वर्षणस्य अधिपती ।। "एतौ (मित्रावरुणौ) वर्षस्येशाते ।" (काठ० सं० ११।३०) इति श्रुतिरपि । "मित्रावरुणौ त्वा वृष्टचावताम् ।" (वाज० सं० २।१६) इत्यपि श्रुतिः । तौ मित्रावरुणौ मा माम् अवताम् । शिष्टं पूर्ववत् । वृष्टचाधिपती इपि सवर्णदीर्घश्छान्दसः ।

मरुतः पर्वतानामधिपतयस्ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुराधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकृत्यामस्या-
माशिष्यस्यां देवहूत्यां स्वाहा ॥६॥

पदपाठः

मरुतः । पर्वतानाम् । अधिऽपतयः । ते । मा । अवन्तु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥६॥

मरुतो वायवः मरुद्गणाः पर्वतानामधिपतयः । "मारुता वै ग्रावाणः ।" (तां० ब्रा० ९।९।१४), "प्राणाः (मारुताः) वै ग्रावाणाः ।" (मा. श. १४।२।२।३३) इति च ब्राह्मणमपि । ते मरुतो मा अवन्तु रक्षन्तु । अन्यत्पूर्ववत् ।

सोमो वीरुधामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥७॥

पदपाठः

सोमः । वीरुधाम् । अधिऽपतिः । सः । मा । अवतु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥७॥

सोमः। वीरुधां लताप्रतानादीनामोषधीनाम् **अधिपतिः**। 'सोमः वीरुधां पते'' (तै० ब्रा० ३।११।४।१), ''औषधो हि सोमो राजा।'' (ऐ० ब्रा०) इत्यपि च ब्राह्मणम्। ''ऊर्ग्वै सोमो वनस्पतिः।'' (काठ० सं० ३६।३) इति च श्रुतिरपि। स मामवत्वित्यादिकम् अवशिष्टं पूर्ववत्।

वायुरन्तरिक्षस्याधिपतिः स मावतु।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामा-
शिष्यस्यां देवहूत्यां स्वाहा ॥८॥

पदपाठः

वायुः। अन्तरिक्षस्य। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥८॥

वायुरन्तरिक्षस्याधिपतिः। ''पृथिवी पूर्वरूपम्। द्यौरुत्तररूपम्। आकाशः सन्धिः। वायुः सन्धानम्।'' (तै० आ० ७।३।१।२), ''भुव इत्येव यजुर्वेदस्य रसमादत्ते।'' तदिदमन्तरिक्षमभवत्। तस्य यो रसः प्राणोदत् स वायुरभवत् रसस्य रसः। (जै० उ० १।१।१।४) इत्युपनिषदपि। स वायुः मा माम् अवतु। शिष्टं पूर्ववत्।

सूर्यश्चक्षुषामधिपतिः स मावतु
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥९॥

पदपाठः

सूर्यः। चक्षुषाम्। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥९॥

सूर्यः चक्षुषाम् अधिपतिः। 'सूर्यश्चक्षुर्गमयताम्'। (मै० सं० १३।४) इति, 'सूर्यो वै प्रजानां चक्षुः'। (मा० श० १३।३।८।४) इति च श्रुतेः। स सूर्यो मावतु। अवशिष्टं पूर्ववत्।

चन्द्रमा नक्षत्राणामधिपतिः स मावतु।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१०॥

पदपाठः

चन्द्रमाः। नक्षत्राणाम्। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥१०॥

चन्द्रमा नक्षत्राणामधिपतिः 'चन्द्रमा नक्षत्राणामधिपतिः।' (तै० सं० ३।४।५।१) इति श्रुत्यन्तरमपि। स मावत्विति सर्वं पूर्ववत्।

इन्द्रो दिवोधिपतिः स मावतु
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥११॥

पदपाठः

इन्द्रः। दिवः। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥११॥

इन्द्रः दिवः अधिपतिः। 'ऐन्द्री द्यौः' (तां० ब्रा० १५।४।८), 'देवलोको वा इन्द्रः'। (कौ० ब्रा० १६।८) इति च ब्राह्मणम्। स मावत्विति पूर्ववत्।

मरुतां पिता पशूनामधिपतिः स मावतु
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१२॥

पदपाठः

मरुताम्। पिता। पशूनाम्। अधिऽपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥१२॥

मरुतां पिता रुद्रः पशूनामधिपतिः। अज्ञातस्वस्वरूपाणां जीवानाम् अधिपतिः पशुपतिः। 'अथेतरेषां पशूनामशनापिपासे एवाभिज्ञानं न विज्ञातं वदन्ति……।' (ऐ० आ० २।३।२) इति तादृशस्य जीवस्य पशुत्वं श्रुतिसिद्धम्। स रुद्रः मावतु स्वस्वरूपाज्ञानं दूरीकरोतु। अन्यत्पूर्ववत्।

मृत्युः प्रजानामधिपतिः स मावतु
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१३॥

पदपाठः

मृत्युः। प्रऽजानाम्। अधिपतिः। सः। मा। अवतु। अस्मिन्। ब्रह्मणि। अस्मिन्। कर्मणि। अस्याम्। पुरःऽधायाम्। अस्याम्। प्रतिऽस्थायाम्। अस्याम्। चित्त्याम्। अस्याम्। आऽकूत्याम्। अस्याम्। आऽशिषि। अस्याम्। देवऽहूत्याम्। स्वाहा ॥१३॥

मृत्युः प्रजानामधिपतिः। 'अमृडयो दूरेहेति मृत्युर्गन्धर्वः तस्य प्रजा अप्सरसो भीरवो नाम।' (मै० सं० २।१२।२) इति श्रुतिरपि। स मृत्युर्मा रक्षतु अपमृत्योः रक्षतु। अन्यत्पूर्वत्रानुसन्धेयम्।

यमः पितॄणामधिपतिः स मावतु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१४॥

पदपाठः

यमः । पितॄणाम् । अधिऽपतिः । सः । मा । अवतु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥१४॥

यमः पितॄणामधिपतिः । 'यमेन पितरः अन्वाभूयन्त ।' (काठ०सं० ३५।१५) इति श्रुतिरपि । स यमो मां पितृलोके रक्षतु । अन्यत् पूर्ववत् ।

पितरः परे ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१५॥

पदपाठः

पितरः । परे । ते । मा । अवन्तु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥१५॥

पितरः परे देवेभ्यो भिन्ना अपि देववत् पूज्याः । 'परे वै देवेभ्यः पितरः' (मै० सं० १।१०।१८) इति श्रुत्यन्तरमपि । ते पितरो मावन्तु शुभं मे चिन्तयन्तु । शेषं पूर्ववदनुसन्धेयम् ।

तता अवरे ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१६॥

पदपाठः

ततः । अवरे । ते । मा । अवन्तु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । चित्त्याम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥१६॥

ततः तातेति सम्बोधनार्हाः पूज्या वृद्धाः ते मावन्तु मम योगक्षेमं वहन्तु कल्याणमभिकाङ्क्षन्तु । सर्वमन्यत् पूर्ववत् ।

ततस्ततामहास्ते मावन्तु ।
अस्मिन् ब्रह्मण्यस्मिन् कर्मण्यस्यां
पुरोधायामस्यां प्रतिष्ठायामस्यां
चित्त्यामस्यामाकूत्यामस्यामाशिष्यस्यां
देवहूत्यां स्वाहा ॥१७॥

पदपाठः

ततः । ततामहाः । ते । मा । अवन्तु । अस्मिन् । ब्रह्मणि । अस्मिन् । कर्मणि । अस्याम् । पुरःऽधायाम् । अस्याम् । प्रतिऽस्थायाम् । अस्याम् । आऽकूत्याम् । अस्याम् । आऽशिषि । अस्याम् । देवऽहूत्याम् । स्वाहा ॥१७॥

ततः जीवत्पितृभ्यः ततामहाः तेषामपि पितामहा दीर्घायुषः ते मा माम् अवन्तु । तेऽपि मे मङ्गलचिन्तका भवन्तु । अन्यत् सर्वं पूर्ववत् ।



पञ्चविंशं सूक्तम्

त्रयोदशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । योनिर्गर्भो मन्त्रोक्ता देवाश्च देवताः । प्रथमादिद्वादशर्चामनुष्टुप्, त्रयोदश्याश्च विराट्पुरस्ताद्बृहती छन्दसी ।

गर्भाधानाख्ये कर्मणि 'पर्वताद् दिवः' इति सूक्तेन आगमकृशरं चरुद्वयं श्रपयित्वा सम्पात्याभिमन्त्र्य द्वितीयं चरुं युगच्छिद्रेण सम्पात्याभिमन्त्र्याशयति । तथा तत्रैव कर्मणि केलूनांश्च पलाशत्सरून्निवृत्ते निघृष्य 'पर्वताद्दिवः' इति सूक्तेनाभिमन्त्र्य शिश्ने आधाय ततो मैथुनं करोति । तदुक्तं कौशिकेन--'पर्वताद्दिवः इत्यागमकृशरम् आशयति । युगतर्द्मना सम्पातवन्तं द्वितीयम् । केलूनांश्च पलाशत्सरून्निवृत्ते निष्कर्ष्याधाय शिश्ने ग्रामं प्रविशति ।" (कौ. सू. ३५।५-७) इति ।

पर्वताद् दिवो योनेरङ्गादङ्गात् समाभृतम् ।
शेपो गर्भस्य रेतोधाः सरौ पर्णमिवा दधत् ॥१॥

पदपाठः

पर्वतात् । दिवः । योनेः । अङ्गात्ऽअङ्गात् । सम्ऽआभृतम् । शेपः । गर्भस्य । रेतःऽधाः । सरौ । पर्णम्ऽइव । आ । दधत् ॥१॥

अयं मे **शेपः** पुंस्प्रजननम् । 'वृङ्शीङ्भ्यां स्वरूपाङ्गयोः पुट् च' (उ० ४।२००) इति शीङ्धातोः बाहुलकात् पः । **गर्भस्य** भ्रूणस्य । चतुर्थ्यर्थे षष्ठी, **रेतोधाः** रेतसः बीजभूतस्य प्रजननसामर्थ्यस्य धाता धारयिता । **दिवः** द्युलोकस्य संबन्धिनी या योनिः स्थानं तस्मात् । अपि च **पर्वतात्** । पर्वतः पर्ववान् तस्मात् । अथवा अन्तरिक्षस्थानीयत्वात् मेघात् । 'पर्जन्यादन्नसंभवः । अन्नाद् भवन्ति भूतानि' (भ० गी०) इति स्मृतिः । एतेन द्युलोकसंबन्धेन ओजोवत्त्वं रेतस उक्तं भवति । **अङ्गादङ्गात्** सर्वेभ्यः अङ्गेभ्यः 'नित्यवीप्सयोः' (पा० ८।१।४) इति द्विर्वचनम् । **समाभृतम्** समाहृतं सारभूतम् ओजोरूपेण संचितं यद् रेतः पुरुषशुक्रं तत् **सरौ** इति आर्षम् । शरौ शरे 'शृस्वृस्निहित्रप्यसीति' (उ० १।११) इति उः । **इव** यथा कश्चित् **पर्णं** पतत्रम् आदद्यात् शरस्य वेगार्जवयुक्तगमनसंपादनार्थं तथा **आ दधत्** आदधातु स्थापयतु, इदं मे प्रजननाङ्गं दिवः योनेः संभृतं यद् रेतः तद् मे जायाया योनौ निषिञ्चतु इत्यर्थः ।

यथेयं पृथिवी मही भूतानां गर्भमादधे ।
एवा दधामि ते गर्भं तस्मै त्वामवसे हुवे ॥२॥

पदपाठः

यथा । इयम् । पृथिवी । मही । भूतानाम् । गर्भम् । आऽदधे । एव । आ । दधामि । ते । गर्भम् । तस्मै । त्वाम् । अवसे । हुवे ॥२॥

यथा इयं परिदृश्यमाना **मही** महती **पृथिवी** भूमिः **भूतानां** चतुर्विधानां भूतजातानां प्राणिनां **गर्भम् आदधे** धारयति । पार्थिवशरीरोपादानभूतं गर्भं प्रसवावधि बिभर्तीत्यर्थः । **एव** एवं हे जाये ! अहं **ते** त्वयि, छन्दसि बहुलम् इति षष्ठी । **गर्भम् आदधामि** स्थापयामि गर्भाधानरूपं संस्कारकर्म करोमि, **तस्मै** कर्मणे **अवसे** गर्भस्थापनस्थिरीभवननिर्विघ्नवर्धनादिना रक्षणाय अहं गृहपतिः **त्वां** मे सहधर्मचारिणीं **हुवे** आह्वयामि ।

गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भं ते अश्विनोभा धत्ता पुष्करस्रजा ॥३॥

पदपाठः

गर्भम् । धेहि । सिनीवालि । गर्भम् । धेहि । सरस्वति । गर्भम् । ते । अश्विना । उभा । आ । धत्ताम् । पुष्करऽस्रजा ॥३॥

हे **सिनीवालि** ! एतत्संज्ञे देवि ! **गर्भं धेहि** निषिक्तं गर्भं स्थापय । हे **सरस्वति** ! त्वमपि निषिक्तं गर्भं स्थापय । हे जाये ! **पुष्करस्रजा** पुष्करमालिनौ स्वर्णकमलमाला-

भरणी अश्विना अश्विनी देवी उभा उभौ अपि ते तव गर्भम् आ धत्ताम् स्थापयताम् ।

गर्भं ते मित्रावरुणौ गर्भं देवो बृहस्पतिः ।
गर्भं त इन्द्रश्चाग्निश्च गर्भं धाता दधातु ते ॥४॥

पदपाठः

गर्भम् । ते । मित्राऽवरुणौ । गर्भम् । देवः । बृहस्पतिः । गर्भम् । ते । इन्द्रः । च । अग्निः । च । गर्भम् धाता । दधातु । ते ॥४॥

हे जाये ! ते तव गर्भं मित्रावरुणौ मित्रश्च वरुणश्च इति उभे अन्तरिक्ष-स्थानीये देवते । 'देवताद्वन्द्वे च' (पा० ६।१।१६८) इति पूर्वपदस्यानङादेशः तथा च बृहस्पतिः बृहताम् इन्द्रादीनां पतिः एतन्नामा देवः तथा इन्द्रो अन्तरिक्षस्थानीयः अग्निश्च पृथिवीस्थानीया देवता । 'अग्निः प्रजनयिता' (काठ०.६।६) इति ब्राह्मणम् । धाता धारको देवः ते तव गर्भं गर्भरूपेण परिणतं तद्रेतः दधातु, सर्वाः देवताः एतं गर्भं तत्रैव स्थिरं कुर्वन्तु ।

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥५॥

पदपाठः

विष्णुः । योनिम् । कल्पयतु । त्वष्टा । रूपाणि । पिंशतु । आ । सिञ्चतु । प्रजाऽपतिः । धाता । गर्भम् । दधातु । ते ॥५॥

विष्णुः व्यापको देवः योनिं गर्भाधानस्थानं कल्पयतु गर्भसेचनार्हमङ्गं करोतु । त्वष्टा तनुकर्ता एतत्संज्ञको देवश्च रूपाणि निरूपकाणि स्त्रीत्वपुंस्त्वाभिव्यञ्जकानि चिह्नानि पिंशतु अवयवीकरोतु । पिश अवयवे मुचादित्वान्नुम् । एवं प्रक्लृप्तायां योन्यां प्रजापतिः रेतः आ सिञ्चतु निसिञ्चतु । विसृजत्वित्यर्थः । शेषं व्याख्यातम् । स्रावपातापप्रसवा मा भूदित्यर्थः ।

यद् वेद राजा वरुणो यद् वा देवी सरस्वती ।
यदिन्द्रो वृत्रहा वेद तद् गर्भकरणं पिब ॥६॥

पदपाठः

यत् । वेद । राजा । वरुणः । यत् । वा । देवी । सरस्वती । यत् । इन्द्रः । वृत्रऽहा । वेद । तत् । गर्भऽकरणम् । पिब ॥६॥

हे जाये ! यद् विधिपूर्वकं अभिमन्त्रणसंपन्नम् चरुद्रव्यं कृशराख्यं राजा द्योतमानो वरुणः देवः वेद वेत्ति। यद् वा देवी सरस्वती वेत्ति। यद् वा देव इन्द्रः वृत्रहा वृत्ररूपानिष्टनाशनकर्ता वेत्ति तद् आसां देवतानां विदितं संमतम् अनुगृहीतं कृशरं गर्भकरणं गर्भधारकं पिब अशान।

गर्भो अस्योषधीनां गर्भो वनस्पतीनाम्।
गर्भो विश्वस्य भूतस्य सो अग्ने गर्भमेह धाः ॥७॥

पदपाठः

गर्भः। असि। ओषधीनाम्। गर्भः। वनस्पतीनाम्। गर्भः। विश्वस्य। भूतस्य। सः। अग्ने। गर्भम्। आ। इह। धाः ॥६॥

हे अग्ने ! त्वम् ओषधीनाम्। ओषः पाकः आसु धीयत इति ओषधयः सर्वा वीरुधः। 'ओषध्यः फलपाकान्ता बहुपुष्पफलोपगाः।' इति मेदिनीये। तासां गर्भः गर्भवद् अन्तरवस्थितः असि भवसि। अथ वनस्पतीनां वनस्य पतिः इति समासे पारस्करादित्वात् सुडागमः। तेषां वटोदुम्बरादीनां 'अपुष्पा फलवन्तो ये ते वनस्पतयः स्मृताः' इति भेदात् निर्दिष्टानां वृक्षविशेषाणाम् अपि गर्भः गर्भवद् अन्तरवस्थितः असि। किं बहुना विश्वस्य सर्वस्यापि भूतस्य भूतजातस्य त्वं गर्भः भवसि। सः ईदृशस्त्वं हे अग्ने ! इह अत्र स्थाने मम क्षेत्रे मम जायायां गर्भम् आ धाः आधेहि स्थापय। 'अग्निः प्रजननम्' (गो० ब्रा० १।२।१५) इति ब्राह्मणमपि।

अधि स्कन्द वीरयस्व गर्भमा धेहि योन्याम्।
वृषासि वृष्ण्यावन् प्रजायै त्वा नयामसि ॥८॥

पदपाठः

अधि। स्कन्द। वीरयस्व। गर्भम्। आ। धेहि। योन्याम्। वृषा। असि। वृष्ण्यऽवन्। प्रऽजायै। त्वा। आ। नयामसि ॥८॥

हे वृष्ण्यवन् ! वृष्ण्यं वृषत्वं पुंस्त्वम्। 'वृष सेचने'। 'कनिन्युवृषि०' इत्यादिना कनिन्। वृष्णि भवं वृष्ण्यम्। 'भवे छन्दसि' इति यत्। 'अल्लोपोऽनः' इति अकारलोपः। 'ये चाभावकर्मणोः' इति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते 'तद्वान् निषेककर्मसामर्थ्यवान्। ईदृश हे अग्ने ! वृषा वर्षिता सेचनसमर्थोऽसि गर्भस्य निषक्ता भवसि। तस्मात् त्वम् अधि मे जायायाः गर्भाधारस्थानम्। अधि सप्तम्यर्थानुवादी। आधारः अध्याहृतः। स्कन्द आरोह। वीरयस्व वीरकर्म कुरु यथा अहं प्रजां पुत्ररूपां लभेय तथा वीर्यवान् त्वं प्रयतस्वेत्यर्थः। अथवा निषिक्तं गर्भं वीरं पराक्रमवन्तं कुरु वीर विक्रान्तौ, वीरशब्दात् 'तत्करोति तदाचष्टे' (पा० वा० ३।१।२५ इति णिच्। योन्यां मे जायायाः प्रजननस्थाने गर्भम् आ धेहि स्थापय। यतः त्वा त्वाम्

प्रजायै अपत्यहेतवे आ नयामसि आनयामः आह्वयामः। 'सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः तृतीयो अग्निष्टे पतिस्तुरीयस्त मनुष्यजाः'' (ऋ० १०।८५।४०) इति श्रुतेः अग्निस्तु स्त्रियः पूर्वः पतिः तस्मात्तमामन्त्रयति गर्भाधानकर्मणि।

वि जिहीष्व बार्हत्सामे गर्भस्ते योनिमाशयाम्।
अदुष्टे देवाः पुत्रं सोमपा उभयाविनम् ॥९॥

पदपाठः

वि। जिहीष्व। बार्हत्सामे। गर्भः। ते। योनिम्। आ। शयाम्। अदुः। ते। देवाः। पुत्रम्। सोमऽपाः। उभयाविनम् ॥९॥

हे जाये! बार्हत्सामे बृहत्साम्नः अपत्यम् इति अण्। स्त्रियां टाप् टिलोपश्च आर्षः। त्वमपि अस्मिन् गर्भाधानकर्मणि वि विशेषेण जिहीष्व गतिं कुरु प्रयतस्वेत्यर्थः 'ओहाङ् गतौ'। लोट् थास्। येन ते तव योनिम् योन्याम् कर्मग्रहणम् आर्षम्। गर्भः आ समन्तात् शयां शेताम्। शीङ् स्वप्ने। 'लोपस्त आत्मनेपदेषु' इति तलोपः। स्थिरो भवेदित्यर्थः। यतः सोमपा सोमस्य पातारः। सोमशब्दोपपदात् पातेः 'आतो मनिन् क्वनिन वनिपश्च'' (पा० ३।२।७४) इति विच्। देवाः द्योतनादिगुणयुक्ताः दीप्यमानाः ते तुभ्यम् उभयाविनम् उभयवन्तं जायापत्योः उभयोः अंशेभ्यः जायमानम् अङ्गादङ्गात्संभवसि हृदयादधि जायसे। आत्मा वै पुत्रनामासि स जीव शरदः शतम्।' (पा० गृ० सू० १।११) इति कल्पवचनम्। अथवा उभयाविनम् उभयत्र इह लोके परलोके च अवते रक्षति इत्यपि। पुत्रं पुन्नाम्नो नरकात् त्रातारम् अदुः दत्तवन्तः।

धातः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः।
पुमांसं पुत्रमा धेहि दशमे मासि सूतवे ॥१०॥

पदपाठः

धातः। श्रेष्ठेन। रूपेण। अस्याः। नार्याः। गवीन्योः। पुमांसम्। पुत्रम्। आ। धेहि। दशमे। मासि। सूतवे ॥१०॥

अथ गर्भाधानानन्तरं निर्विघ्नगर्भवृद्ध्यै दशमासान्ते च सुखप्रसवाय धातारं स्तौति। हे धातः! सर्वस्य जगतो धारयितः देव! 'धाता पुत्रं यजमानाय दाता' (तै० सं० ३।३।११।३) इति श्रुतेः। अस्याः नार्याः मे जायायाः। नारी स्त्री। 'नृनरयोर्वृद्धिश्च (पा० ४।१।७३) इति शाङ्गरवादिषु पाठात् ङीन् प्रत्ययः तत्संनियोगेन वृद्धिश्च। तस्याः गवीन्योः। गवीन्यौ योनेः पार्श्वद्वयवर्तिन्यौ निर्गमनप्रतिबन्धिके नाड्यौ। तयोर्मध्ये स्थितायां योन्यां पुमांसम् पुंस्त्वोपेतं पुत्रं गर्भम्।

श्रेष्ठेन प्रशस्यतमेन । 'प्रशस्यस्य श्रः' (पा०५।३।६०) इति श्रादेशः । **रूपेण** आकारेण युक्तम् । **दशमे मासि** । 'पद्दन्नोमास्०' (पा० ६।१।६३) इत्यादिना मासशब्दस्य मास्भावः । दशमासपर्यन्तं भृतस्य सर्वावयवसंपूर्णस्य गर्भस्य **सूतवे** प्रसवाय । 'दशमे मासि गर्भा हिताः प्रजायन्ते ।' (का०सं०२८।६) इतिः । श्रुतिः सूते । इत्यस्य 'तुमर्थे सेसेनसे०' (पा० ३।४।६) इति तवेन्प्रत्ययः, **आ धेहि** स्थापय ।

त्वष्टः श्रेष्ठेन रूपेणास्या नार्या गीवीन्योः ।
पुमांसं पुत्रमाधेहि दशमे मासि सूतवे ॥११॥

पदपाठः

त्वष्टः । श्रेष्ठेन । रूपेण । शेषं पूर्ववत् ॥११॥

अथ त्वष्टारं स्तौति । हे **त्वष्टः** ! तनूकर्तः ! रूपकारक ! 'त्वष्टा पशूनां मिथुनानां रूपकृद्रूपपतिः ।' (तै० ब्रा० २।५।७४) इति, 'त्वष्टा रूपाणाम्' (तै०ब्रा० ३।४।५।१) इत्यपि च ब्राह्मणे । शेषं व्याख्यातम् ।

सवितः श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमाधेहि दशमे मासि सूतवे ॥१२॥

पदपाठः

सवितः । श्रेष्ठेन । रूपेण । शेषं पूर्ववत् ॥१२॥

अथ सवितारं स्तौति । हे **सवितः** ! जनक देव ! 'सविता वै प्रसविता' (कौ० ब्रा० ६।१५।२) इत्यपि 'एताभिर्वै सविता सर्वस्य प्रसवमगच्छत् ।' (तां०महाब्रा० २४।१५।२) इत्यपि ब्राह्मणे । शेषं यथापूर्वम् ।

प्रजापते श्रेष्ठेन रूपेणास्या नार्या गवीन्योः ।
पुमांसं पुत्रमाधेहि दशमे मासि सूतवे ॥१३॥

पदपाठः

प्रजाऽपते । श्रेष्ठेन । रूपेण । शेषं पूर्ववत् ॥१३॥

अन्ते च प्रजापतिं स्तौति । हे **प्रजापते** ! 'प्रजापतिः प्रजननम्'(जै०ब्रा०२।८५) इति ब्राह्मणम् । शेषं यथापूर्वम् ।



षड्विंशं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः । वास्तोष्पतिर्बह्वृचो मन्त्रोक्ता वा देवताः । प्रथमा-पञ्चम्योरूर्ध्वोर्द्विपदाच्युष्णिक्, द्वितीया-चतुर्थ्योः षष्ठ्यादितृचस्य

दशम्येकादश्योश्च द्विपदा प्राजापत्या बृहती, तृतीयायास्त्रिपदा विराड्गायत्री, नवम्यास्त्रिपदा पिपीलिकमध्या पुर उष्णिक् (एता एकावसानाः), द्वादश्याश्च पराति-शक्वरी चतुष्पदा जगती छन्दांसि ।

'यजूंषि यज्ञे' इति सूक्तेन नवशालायां घृतं मधुमिश्रं जुहुयात् । तथा च सूत्रम्– 'यजूंषि यज्ञे' (अ० ५।२६) इति नवशालायां सर्पिर्मधुमिश्रमश्नाति । 'दोषो गाय' (अ० ६।१) इति द्वितीयाम्, युक्ताभ्यां तृतीयाम् (कौ० सू० २३।१-३) इति । आहुतिमिति शेषः । ज्योतिष्टोमे 'यजूंषि यज्ञे' इति सूक्तेन आज्यं जुहोति । 'यजूंषि यज्ञ' इति च (वैता० श्रौ० सू० १६।६) इति वैतानसूत्रात् ।

यजूंषि यज्ञे समिधः स्वाहाग्निः
प्रविद्वानिह वो युनक्तु ॥१॥

पदपाठः

यजूंषि । यज्ञे । सम्ऽइधः । स्वाहा । अग्निः । प्रऽविद्वान् । इह । वः । युनक्तु ॥१॥

ज्योतिष्टोमे वा नवशालायां पुष्टिकामहेतौ वा अस्मिन् **यज्ञे** यज्ञो यजतेः 'यजयाच०' (पा० ३।३।७०) इत्यादिना नङ्प्रत्ययः । **यजूंषि** यागे विनियुक्तानि आध्वर्यवकर्मानुवादिनो यजुर्मन्त्राः यागसाधनानि वा । यजेरौणादिको भावे उसिन्प्रत्ययः । **समिधः** समिन्धनाः समिदादिद्रव्याणि, **स्वाहा** सुष्ठु आहूयन्ते देवा अनेनेति स्वाहाशब्दो हविःप्रदानवाची । आपूर्वात् ह्वयतेः डाप्रत्ययः आहा । शोभनं यथा स्यात्तथा स्वाहा । तत्र च प्रथमम् अग्निः आहूयते । 'अग्निर्मुखं प्रथमो देवतानाम्' (काठ० स० ४।१६) इति श्रुतिः । **अग्निः प्रविद्वान्** प्रकर्षेण जानन् **वः** युष्मान् याजकान् । **युनक्तु** योजयतु । इमं यज्ञं सफलं कर्तुमित्यर्थः । 'अग्निरेवैनां गृहपतीनां सुवतो' (तै० ब्रा० १।७।४।१) इति, 'अग्निरु सर्वे कामाः' (मा० शत० १०।२।४।१) इति, 'अग्निना वै मुखेन देवा असुरानुक्थेभ्यो निर्जघ्नुः' (ऐ० ब्रा० ६।१४) इति च ब्राह्मणेभ्यः अग्नेः आदौ आवाहनम् ।

युनक्तु देवः सविता प्रजानन्नस्मिन्
यज्ञे महिषः स्वाहा ॥२॥

पदपाठः

युनक्तु । देवः । सविता । प्रऽजानन् । अस्मिन् । यज्ञे । महिषः । स्वाहा ॥२॥

तथैवास्मिन् यज्ञे प्र प्रकर्षेण जानन् प्रज्ञानवान् । 'सविता सुमेधाः' (तै० सं० २।४।५।२) इति श्रुतिः । **महिषः** महान् 'महिषः' इति महन्नामसु पठ्यते नैघण्टुक-

काण्डे (निघण्टुः ३।३)। देवः द्योतनशीलः। दीव्यतेः पचाद्यजन्तः। सविता प्रेरको देवः। 'सविता वै प्रसविता' (कौ० ब्रा० ७।१४) इति ब्राह्मणम्। सोऽपि वः युनक्तु योजयतु। स्वाहा।

इन्द्रः उक्थामदान्यस्मिन् यज्ञे
प्रविद्वान् युनक्तु सुयुजः स्वाहा ॥३॥

पदपाठः

इन्द्रः। उक्थऽमदानि। अस्मिन्। यज्ञे। प्रऽविद्वान्। युनक्तु। सुऽयुजः। स्वाहा ॥३॥

अस्मिन् यज्ञे प्रविद्वान् प्रजानन्। सुयुजः शोभनः योजकः। युनक्तेः पचाद्यजन्तः। इन्द्रो देवः अपि। उक्थमदानि। उक्थानि च मदान् च। उक्थानि आज्यप्रउगादिशस्त्राणि यजनकर्मोचितदेवतास्तुतिपरकाः मन्त्राः वा। मदः सोमो वा सोमजनितः हर्षः वा। मदी हर्षे। पुषादित्वात् अङ्। शस्त्रमन्त्रान् वा सोमहर्षं वा युनक्तु योजयतु। 'इन्द्र उक्थामदैः' (मै० सं० १।७।२।८) इति श्रुतिः।

प्रैषा यज्ञे निविदः स्वाहा
शिष्टा पत्नीभिर्वहतेह युक्ताः ॥४॥

पदपाठः

प्रऽएषः। यज्ञे। निऽविदः। स्वाहा। शिष्टाः। पत्नीभिः। वहत। इह। युक्ताः ॥४॥

अस्मिन् यज्ञे प्रैषाः प्रकर्षेण इष्यमाणाः स्तुतयः, कर्मसु ऋत्विजां प्रेरकाः मन्त्राः स्वाहा। निविदः शस्त्रलक्षणाः देवात्मिकाः प्रीतिकर्यः प्रसिद्धा वाचोऽपि स्वाहा। पत्नीभिः शिष्टाः अनुज्ञाताः प्रेरिता वा हे अग्निसवित्रिन्द्रादिदेवाः! भवन्तः युक्ताः युक्तमनसः प्रीतमनसः भूत्वा इह यज्ञे सर्वाणि कर्माणि वा कामान् वहत आनयत। प्रैषाः प्रोपसृष्टस्य इषः प्रेरणार्थकस्य घञ्। 'एत्येधत्यूठ्सु' (पा० ६।१।८९) इति सूत्रेण, 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन च गुणस्थाने वृद्धिः। शिष्टाः। 'शासइदङ्हलोः' (पा० ६।४।३४) इत्युपधाया इत्वम्। शासिवसिघसीनां च' (पा० ८।३।६०) इति षत्वम्।

छन्दांसि यज्ञे मरुतः स्वाहा
मातेव पुत्रं पिपृतेह युक्ताः ॥५॥

पदपाठः

छन्दांसि। यज्ञे। मरुतः। स्वाहा। माताऽइव। पुत्रम्। पिपृत। इह। युक्ताः ॥५॥

हे मरुतः ! एतत्संज्ञकाः सप्तगणात्मका दितेः पुत्राः इन्द्रस्य सखीभूताः ! 'सप्तगणा वै मरुतः' (तै० सं० २।२।५।७) इति श्रुतिः। भवन्तः अपि युक्ताः युक्तमनसः स्थिरमनसः प्रसन्नचित्ताः भूत्वा अस्मिन् यज्ञे छन्दांसि गायत्र्युष्णिगनुष्टुबादीनि चतुरक्षराधिकानि सप्तसंख्याकानि सवननिष्पादकानि। चन्दयति आह्लादयति चन्द्यते अनेन इति वा। 'चन्देरादेश्च छः' (उ० ४।२१८) इति असुन् चस्य छश्च। वेदान् वा स्वाहा। माता इव यथा पुत्रं माता पिपर्ति पूरयति वर्धयति। तथा इह अस्मिन् यज्ञे छन्दांसि पिपृत पूरयत। 'मरुतः सप्ताक्षरयोष्णिहमुदजयंश्चतुर्धा ह्येतस्याः सप्त सप्ताक्षराणि' (मै० सं० १।११।११) इति श्रुतिः।

एयमगन् बर्हिषा प्रोक्षणीभिर्यज्ञं

तन्वानादितिः स्वाहा ॥६॥

पदपाठः

आ। इयम्। अगन्। बर्हिषा। प्रऽउक्षणीभिः। यज्ञम्। तन्वाना। अदितिः। स्वाहा ॥६॥

इयम् परिदृश्यमाना **अदितिः** अदीना वा देवमाता अखण्डनीया वा पृथिवी 'इयं वा अदितिः।' (तै० ब्रा० २।२।६।१) इति श्रुतेः सर्वाश्रयभूता भूमिः। दो अवखण्डने, अस्मात् कर्मणि क्तिनि 'द्यतिस्यतिमास्थामि०' (पा० ७।४।४०) इति इत्वम्। यास्कपक्षे तु दीङ् क्षये इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वम्। **बर्हिषा** स्रुगाद्यासादनस्थानभूतेन। 'बृंहेर्नलोपश्च' (उ० २।२६६) इति इस्प्रत्ययनलोपौ। **प्रोक्षणीभिः** पवित्रीकरणैः। यज्ञार्थपशुहननैरिति वा। इमं **यज्ञं तन्वाना** विस्तारयन्ती। **आ अगन्** आगच्छतु। गमेश्छान्दसे लुङि 'मन्त्रेघस०' (पा० २।४।८०) इति च्लेर्लुकि 'मो नो धातोः' (पा० ८।२।६४) इति मकारस्य नत्वे रूपम्।

विष्णुर्युनक्तु बहुधा तपांस्यस्मिन्

यज्ञे सुयुजः स्वाहा ॥७॥

पदपाठः

विष्णुः। युनक्तु। बहुऽधा। तपांसि। अस्मिन्। यज्ञे। सुऽयुजः। स्वाहा ॥७॥

अस्मिन् यज्ञे सुयुजः शोभनः योजकः **विष्णुः** व्यापको देवः। विष्लृ व्याप्तौ इत्यस्मात् 'विषेः किच्च' (उ० ३।३९) इति नुः। **बहुधा** बहुविधैः प्रकारैः। 'बहुगणवतुडति संख्या' (पा० १।१।२३)। 'संख्याया विधार्थे धा' (पा० ५।३।४२) इति धाप्रत्ययः। **तपांसि** सन्तापकराणि व्रतादीनि कर्माणि। शत्रोः संतापकानि तेजांसि इति वा। तपः संतापे। असुन्प्रत्ययः (उ० ४।१८७)। **युनक्तु** योजयतु।

त्वष्टा युनक्तु बहुधा नु रूपा

अस्मिन् यज्ञे सुयुजः स्वाहा ॥८॥

पदपाठः

त्वाहा । युनक्तु । बहुऽधा । न । रूपा । अस्मिन् । यज्ञे । सुऽयुजः । स्वाहा ॥८॥

अस्मिन् यज्ञे सुयुजः सुयोजकः **त्वष्टा** तनुकर्ता रूपकारकः देवः । त्वक्षू तनुकरणे इत्यस्य 'ण्वुल्तृचौ' (पा० ३।१।१३३) इति तृच् । 'त्वष्टा पुमान् देवशिल्पि०' इत्यादि मेदिनीये (३४।१६) । **नु** क्षिप्रम् । **बहुधा** बहुभिः प्रकारैः । **रूपा** रूपाणि । 'शेश्छन्दसि बहुलं' (पा० ६।१।७०) इति शेर्लोपः । प्रतिनियताकारान् यद्वा रूप्यन्त इति रूपाणि चेतनाचेतनात्मकानि वस्तूनि **युनक्तु** योजयतु । 'त्वष्टा रूपाणि विकरोति' (तै० सं० २।४।६।१) इति श्रुतिः । 'त्वष्टा वै रूपाणामीशे' (तै० ब्रा० १।४।७।१) इति च ब्राह्मणम् ।

भगो युनक्त्वाशिषो न्वस्मा अस्मिन्
यज्ञे प्रविद्वान् युनक्तु सुयुजः स्वाहा ॥९॥

पदपाठः

भगः । युनक्तु । आऽशिषः । नु । अस्मै । अस्मिन् । यज्ञे । प्रऽविद्वान् । युनक्तु । सुऽयुजः । स्वाहा ॥९॥

अस्मिन् यज्ञे सुयुजः सुयोजकः । **प्रविद्वान्** प्रज्ञावान् । **भगः** भजनीयः भाग्यस्य प्रदाता देवः । भज सेवायाम् इत्यस्मात् 'पुंसि संज्ञायां घः प्रायेण' (पा० ३।३।११८) इति घः । 'चजोः कुघिण्यतोः' (पा० ७।३।५२) इति कुत्वम् । 'भगो ह दाता भग इत् प्रदाता' (तै० ब्रा० ३।१।६।८) इति ब्राह्मणम् । **अस्मा** अस्मै यज्ञाय यज्ञसाफल्याय यजमानाय वा । **आशिषः** आशंसनानि इष्टफलप्रार्थनावचनानि । 'आशासः क्वौ' (पा० वा० ६।४।२४) इति वार्त्तिकात् इत्वम् । **नु** क्षिप्रम् । **युनक्तु** योजयतु ।

सोमो युनक्तु बहुधा पयांस्यस्मिन्
यज्ञे सुयुजः स्वाहा ॥१०॥

पदपाठः

सोमः । युनक्तु । बहुऽधा । पयांसि । अस्मिन् । यज्ञे । सुऽयुजः । स्वाहा ॥१०॥

अस्मिन् यज्ञे सुयुजः सुष्ठु योजकः **सोमः** ओषधीनां द्विजातीनां वा राजा अमृतस्य वा सविता । सू सवने इत्यस्य 'अर्तिस्तुसु०' (उ० १।१३७) इत्यादिना मन् । **बहुधा** बहुप्रकारेण । **पयांसि** सोमरसादीनि क्षीरौदनादीनि, पयोविकारभूतम् आज्यं वा

होमद्रव्याणि । युनक्तु योजयतु । 'एतत् सोमस्य (तेजः) यत् पयः' (तै० सं० २।५।२।७) इति श्रुतिः । 'सोमः पयः' (तै०सं० ६।२।११।५) इत्यपि श्रुतिः ।

इन्द्रो युनक्तु बहुधा वीर्याण्यस्मिन्
यज्ञे सुयुजः स्वाहा ॥११॥

पदपाठः

इन्द्रः । युनक्तु । बहुऽधा । वीर्याणि । अस्मिन् । यज्ञे । सुऽयुजः । स्वाहा ॥११॥

वीर्याणि उपकारजननसामर्थ्यानि वीरकर्माणि वा । वीरात् 'तत्र साधु' (पा० ४।४।९८) इति यत् । युनक्तु योजयतु । 'वीर्यम् इन्द्रः ।' (मै० सं० १।६।३) इति, 'इन्द्रियं वै वीर्यं वाजिनम्' (ऐ० ब्रा० १।१३) इति च, तथा 'वज्रेण खलु वै वीर्यं क्रियते' (मै०सं० ३।६।६) इत्यपि च श्रुतिः ।

अश्विना ब्रह्मणायातमर्वाञ्चौ
वषट्कारेण यज्ञं वर्धयन्तौ ।
बृहस्पते ब्रह्मणायाह्यर्वाङ्
यज्ञो अयं स्वरिदं यजमानाय स्वाहा ॥१२॥

पदपाठः

अश्विना । ब्रह्मणा । आ । यातम् । अर्वाञ्चौ । वषट्ऽकारेण । यज्ञम् । वर्धयन्तौ । बृहस्पते । ब्रह्मणा । आ । याहि । अर्वाङ् । यज्ञः । अयम् । स्वः । इदम् । यजमानाय । स्वाहा ॥११॥

हे अश्विना अश्विनौ देवौ ! 'सुपां सुलुक्०' (पा० ७।१।३९) इत्यकारः । युवां ब्रह्मणा हवीरूपेण अन्नेन अस्माभिः प्रयुज्यमानया मन्त्ररूपया स्तुत्या वा । तथा च वषट्कारेण देवोद्देश्यकहविस्त्यागमन्त्रेण वषट्मन्त्रकृतेन होमेन वा । ऊह्यते अनेनेति वह प्रापणे बाहुलकात वषट् । वषडित्यस्य कारः करणं यत्र । इमं यज्ञं वर्धयन्तौ विस्तारयन्तौ अर्वाञ्चौ अस्मदभिमुखौ आ यातम् आगच्छतम् । हे बृहस्पते ! बृहतां महतां देवानां पालयितर्देव ! 'तद्बृहतोः करपत्योश्चोरदेवतयोः' (पा० वा० ६।१।१५७) इति सुट्तलोपौ । त्वमपि ब्रह्मणा हवीरूपेण अन्नेन मन्त्ररूपया स्तुत्या वा । अर्वाङ् अस्मदभिमुखः आ याहि आगच्छ । अयं यज्ञः यजनकर्म इदं स्वः स्वर्गलोकरूपम् अनेन यजनकर्मणा लभ्यमानं फलमपि । स्वरिति दिवश्च आदित्यस्य च साधारणं नामैतत् । यजमानाय याजकाय स्वाहा । यथा च सर्वेषु सत्कृतेषु ब्रह्मार्पणबुद्धया 'इदं न मम' इति कथ्यते तद्वत् अयं यज्ञः अपि यज्ञप्रभूतं फलमपि यजमानाय ब्रह्मरूपाय स्वाहा । उक्तं च 'ब्रह्मार्पणं ब्रह्म हवि' रित्यादि (भ० गीता ४।२४) ।

सप्तविंशं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य ब्रह्मा ऋषिः। अग्निर्देवता। प्रथमर्चो बृहतीगर्भा त्रिष्टुप्, द्वितीयाया द्विपदा साम्नी भुरिगनुष्टुप्, तृतीयाया द्विपदार्ची बृहती, चतुर्थ्या द्विपदा साम्नी भुरिग्बृहती, पञ्चम्या द्विपदा साम्नी त्रिष्टुप्, षष्ठ्या द्विपदा विराड्-गायत्री, सप्तम्या द्विपदा साम्नी बृहती। (द्वितीयादिषडेकावसानाः) अष्टम्याः संस्तार-पङ्क्तिः, नवम्याः षट्पदानुष्टुब्गर्भा परातिजगती, दशम्यादितृचस्य च पुर-उष्णिक् छन्दांसि।

पुष्टिकामः अनेन सूक्तेन अग्नौ मन्थाकारम् औदुम्बरं दत्वा आज्यं जुहोति तथा असंख्याता आगमशष्कुलीरधिश्रित्य अनेन सूक्तेन सप्त शष्कुलीरग्नौ दत्वा आज्यं जुहोति। शेषाः शष्कुलीः कर्त्रे ददाति। तदुक्तं कौशिकेन-- 'ऊर्ध्वा अस्य' इति वार्ष्मणम् औदुम्बरं मन्थप्रतिरूपम् अभिजुहोति। असंख्याता अधिश्रित्य सप्ता-गमशष्कुलीः' (कौ० सू० २३।७।८) इति। प्रतिग्रहोपात्तेन द्रव्येण कृताः शष्कुल्य आगमशष्कुल्यः। तथा वशाशमनकर्मणि अस्य सूक्तस्य विनियोग उक्तः। सूत्रा-दिकं 'समिद्धो अद्य' (अ० ५।१२) इति सूक्ते द्रष्टव्यम्।

ऊर्ध्वा अस्य समिधो भवन्त्यूर्ध्वा
शुक्रा शोचींष्यग्नेः।
द्युमत्तमा सुप्रतीकः ससूनु-
स्तनूनपादसुरो भूरिपाणिः ॥१॥

पदपाठः

ऊर्ध्वाः। अस्य। सम्ऽइधः। भवन्ति। ऊर्ध्वा। शुक्रा। शोचींषि। अग्नेः। द्युमत्ऽतमा। सुऽप्रतीकः। सऽसूनुः। तनूऽनपात्। असुरः। भूरिऽपाणिः ॥१॥

आप्रियसूक्ते प्रथमं तावत् समिधाशंसनं भवति। 'तासामिध्मः प्रथमगामी भवति' (निरुक्त० ८।४) इति यास्कः। अस्य अग्नेः समिधः समिन्धनाः समिदादि द्रव्याणि वा ऊर्ध्वाः। उदुपसृष्टः। ओहाङ् गतौ। तस्य ऊरादेशः डागमश्च (शब्द-कल्पद्रुम० १)। उन्नताः ऊर्ध्वमुखाः भवन्ति। अस्य अग्नेः शुक्रा शुक्लानि। 'शेश्छन्दसि बहुलम्' (पा० ६।१।७०) इति शेर्लोपः रलयोश्चाभेदः। श्वेतवर्णानि उज्ज्वलानि। तथैव द्युमत्तमा द्युमत्तमानि अतिशयेन दीप्तानि। दीव्यतेर्दीप्त्यर्थस्य संपदादिलक्षणः क्विप् 'दिव उत्' (पा० ६।१।१३१) इति उत्वम्। शोचींषि तेजांसि। शुच्यतेः 'अर्चिशुचिहुसृपि०' (उ० २।१०९) इति इसिः। ऊर्ध्वा ऊर्ध्वानि उन्नतानि ऊर्ध्वगामीनि भवन्ति। अयं तनूनपात्। एतन्नामकोऽग्निः। तन्वां नपात् पौत्रः। 'नपादित्यननन्तरायाः प्रजाया नामधेयम्' (निरु० ८।५) इति यास्कः। 'तनूनपात्

आज्यम्' (निरु०८।५) इति। 'कात्थक्य' पक्षे तन्वो गावो, भोगानां तासु जायमानत्वात्। ताभ्यः उत्पन्नं क्षीरं, क्षीरात् सर्पिः इति आज्यस्य नप्तृत्वम्। तद्वान् यज्ञः। अग्नि-पक्षे आपस्तन्व उच्यन्ते। ताभ्यः ओषधिवनस्पतयः। तेभ्योऽग्निरिति नप्तृत्वम्, अरणीभ्याम् इति भावः। सुप्रतीकः विशिष्टप्रकाशरूपत्वेन शोभनाङ्गः सन्। प्रतीकः प्रतीयते इति अस्मात् व्यलीकादयश्चेति ईकन्प्रत्ययेन साधु। शोभनं प्रतीकं अङ्गं यस्य। ससूनुः सपुत्रः। 'धर्मस्य वसुभार्यायां जातः प्रथमोऽग्निः। तस्य पत्नी स्वाहा। पुत्रास्त्रयः पावकः पवमानः शुचिः' इति शब्दकल्पद्रुमे। तेषां त्रयाणां पुत्राणामन्य-तमेन एकेन द्वाभ्यां त्रिभिरेव वा सहितः। असुरः सर्वेषां प्राणदः, अनिष्टक्षेपणशीलः इति वा। असून् प्राणान् राति ददातीत्यसुरः। 'आतोऽनुपसर्गे कः' (पा० ३।२।३) इति कप्रत्ययः। यद्वा। असु क्षेपणे। अस्यति अनिष्टान् शत्रून् इत्यसुरः। 'असेरुरन्' (उ० १।४२) भूरिपाणिः बहुबाहुः। पाणयः इव ज्वालाः इति उपमार्थकम्। बहुज्वालः इति यावत्। यद्वा यजमानाय इष्टान् भोगान् दातुं भूरीन् बहून् पाणीन् करान् धारयन्।

अत्रैकस्मिन्नेव मन्त्रे पूर्वार्धेन समिद्रूपेण समिद्धः अग्निः प्रशंसितो भवति, उत्तरार्धेन च तनूनपान्नामकोऽग्निः स्तूयते इति। आप्रियसूक्तेषु प्रथितो देवताक्रमः यद्यपि अस्मिन् सूक्ते अनुसृतः तथापि प्रतिदैवतम् एकैकेन मन्त्रेण स्तौति इति प्रथितो नियमः अत्र न दृश्यते। प्रथिताः आप्रियदेवताः अपि अत्र न यथायथं दृश्यन्ते। तथाहि, पञ्चमक्रमे बर्हिषो स्थाने स्रुक् अत्र स्तुता दृश्यते, स्रुगनन्तरमेव च वसूनां स्तुतिरपि अन्येषु आप्रीसूक्तेषु न दृश्यते।

देवो देवेषु देवः पथो अनक्ति
मध्वा घृतेन ॥२॥

पदपाठः

देवः। देवेषु। देवः। पथः। अनक्ति। मध्वा। घृतेन ॥२॥

पूर्वस्याः ऋचः उत्तरार्धेन अस्याः ऋचोऽन्वयः। अयं देवः द्योतनशीलः तनूनपान्नामकोऽग्निः सर्वेषु अपि देवेषु देवः श्रेष्ठः सन् मध्वा माधुर्योपेतेन सोमादि-मधुरप्रायेण घृतेन क्षरदाज्येन च युक्तः यजमानान् पथः मार्गान् अनक्ति आगच्छति, लेपयति वा। यज्ञमार्गान् मधुरान् आलोकितान् च करोति इत्यर्थः।

मध्वा यज्ञं नक्षति प्रैणानो
नराशंसो अग्निः सुकृद् देवः
सविता विश्ववारः ॥३॥

पदपाठः

मध्वा। यज्ञम्। नक्षति। प्रैणानः। नराशंसः। अग्निः। सुऽकृत्। देवः। सविता। विश्वऽवारः ॥३॥

नराशंसः एतन्नामकः अग्निः । नरशब्दः नॄ नये इत्यस्मात् अबन्तः । शंसन्त्यस्मिन्निति शंसः । 'हलश्च' (पा० ३।३।१२१) इत्यधिकरणें घञ् । वनस्पत्यादिषु पाठात् नरशब्दस्य दीर्घत्वम् । सविता सर्वस्य प्रेरको देवः द्योतनशीलः सुकृत् शोभनकर्मणां यागादीनां कर्ता । 'सुकर्मपापमन्त्रपुण्येषु० (पा० ३।२।८९) इत्यादिना करोतेः भूतार्थे क्विप् । तुगागमः । **विश्ववारः** विश्वे वरितारो यस्य सः, विश्वैः सर्वैर्यजमानैः होतृद्वारा यष्टव्यतया वरणीयः । वारो वारणं यस्येत्यत्र वृञ् वरणे इत्यस्य ण्यन्तस्य रूपं वारः । **प्रैणानः** स्तुतिं प्रेरयन् । प्रैणृ गतिप्रेरणश्लेषणेषु । कर्मणि शानचि व्यत्ययेन श्ना । इमं **यज्ञं मध्वा** माधुर्योपेतेन सोमादिमधुरद्रव्येण **नक्षति** अभिव्याप्नोति । नक्ष गतौ धातुः ।

अच्छायमेति शवसा घृता
चिदीडानो वह्निर्नमसा ॥४॥

पदपाठः

अच्छ । अयम् । एति । शवसा । घृता । चित् । ईडानः । वह्निः । नमसा ॥४॥

अयम् अग्रे दृश्यमानः **वह्निः** अग्निः । 'वहिश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित्' (उ. ४।४९१) इति वहेर्निप्रत्ययः । **शवसा** बलेन अन्नेन वा । शव इति बलनाम । 'सुपां सुपो भवन्ति' इति ङसः टादेशः । **घृता** घृतेन क्षरदाज्येन । घृता इति आर्षम् । **नमसा** स्तोत्रेण नमस्कारेण हविर्लक्षणेन अन्नेन वा । 'तृतीया च होश्छन्दसि' (पा. २।३।३) इति कर्मणि तृतीया । **चित्** च समुच्चयार्थः, **ईडानः** ईड्यमानः स्तूयमानः, कर्मणि शानच्प्रत्ययः आर्षः । **अच्छ** अभिमुखः **एति** गच्छति । ईडायुक्तस्य अग्नेर्ऋगियम् ।

अग्निः स्रुचो अध्वरेषु प्रयक्षु
स यक्षदस्य महिमानमग्नेः ॥५॥

पदपाठः

अग्निः । स्रुचः । अध्वरेषु । प्रऽयक्षु । सः । यक्षत् । अस्य । महिमानम् । अग्नेः ॥५॥

अयम् **अग्निः प्रयक्षु** प्रकृष्टेषु यजनेषु, प्रयाजेषु इति यावत् । 'सुकर्मपाप०' इत्यादिना यज पूजायाम् इत्यस्य धातोः भूतार्थे क्विप्, तुगागमः, प्रः प्रकर्षार्थः । **अध्वरेषु** यज्ञेषु, ध्वृ हूर्छने, 'पुंसि संज्ञायाम्०' (पा० ३।३।११८) इति घः । 'ध्वरतिहिंसाकर्मा तत्प्रतिषेधः (निरु०१।८) इति यास्कः । 'अध्वर्तव्या वा इमे देवा अभूवन्निति

तदध्वरस्याध्वरत्वम्' (तै० ब्रा० ३।२।२।३) इति श्रुतिः । **स्रुचः** स्रुचा जुह्वा दत्तानां क्षरदाज्यानां हविषां भोक्ता अग्निरित्यर्थः । 'युजौ ह वा एते यज्ञस्य यत्स्रुचौ' (मा० शत० १।८।३।२७) इति ब्राह्मणम् । स्रुचा दत्ताहुतेः यज्ञाग्नेः स्तुतिरियम् । **सः** यजमानः अस्य दृश्यमानस्य स्रुगाहुताज्यस्य **अग्नेः महिमानं** माहात्म्यम् एतत्स्तोत्र–जनितं कंचिदतिशयम् । महच्छब्दात् पृथ्वादिलक्षण इमनिच्, 'टेः' (पा० ६।१।१४३) इति टिलोपः । **यक्षत्** यजतु । यजेर्लेटि अडागमः । 'सिब्बहुलं लेटि' (पा०३।१।३४) इति सिप् ।

तरी मन्द्रासु प्रयक्षु
वसवश्चातिष्ठन् वसुधातरश्च ॥६॥

पदपाठः

तरी । मन्द्रासु । प्रऽयक्षु । वसवः । च । अतिष्ठन् । वसुऽधातरः । च ॥६॥

मन्द्रासु यजमानस्य मादयितृषु । मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । अस्मात् धातोः 'स्फायितञ्चिवञ्चि०' (उ० ११२) इत्यादिना रक् प्रत्ययः । इदित्वात् नुम् । **प्रयक्षु** प्रयाजेषु । **तरी** तरणिः अतिशयेन तरिता शीघ्रगामी याजकानां वानिष्टेभ्यः तारयिता अग्निः । तॄ तरणप्लवनयोः इत्यस्मात् 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' (पा० ३।१।१३४) इति णिन् । **वसवः** वासयितारः, वसुगणे अग्नीतरे देवाः । वस निवासे इत्यस्मात् 'शॄस्वृस्निहि०' (उ० १।१०) इत्यादिना उः । 'विश्वस्य वसुराटोः' (पा० ६।३।१२८) इति न दीर्घः असंज्ञात्वात् । **च** ते अन्ये वसवोऽपि । **वसुधातरः च** वसुधातारः, डुधाञ् धारणपोषणयोः इत्यस्य तृच् । तृजन्तस्य च पितृभ्रातृवत्–प्रत्ययग्रहणम् आर्षम् । वसुधारकाः अन्येऽपि च ते देवाः । **अतिष्ठन्** तिष्ठन्ति निवसन्ति ।

यद्यपि आप्रीसूक्तानां देवतासु वसवो न परिगणिताः भवन्ति तथाप्यस्मिन् सूक्ते अस्मिन् मन्त्रे तेषां निर्देशः विशेषरूपः ।

द्वारो देवीरन्वस्य विश्वे
व्रतं रक्षन्ति विश्वहा ॥९॥

पदपाठः

द्वारः । देवीः । अनु । अस्य । विश्वे । व्रतम् । रक्षन्ति । विश्वहा ॥९॥

देवीः दिव्याः द्योतमानाः **द्वारः** यज्ञशालाद्वाराणि द्वाराभिमानिन्यो देवता इति वा । देवीः, 'वा छन्दसि' (पा० ३।४।८८) इति पूर्वसवर्णदीर्घत्वम् ।

देवशब्दात् पचाद्यजन्तात् 'पुंयोगादाख्यायाम्' (पा० ४।१।४।४८) इति ङीष् । **विश्वे** सर्वे देवाः ये पूर्वासु ऋक्षु प्रकीर्तितास्तेऽपि **अस्य** यजमानस्य **व्रतम्** यागाधिष्ठानरूपं तन्निमित्तेन संकल्पितम् उपोषणादिकं चापि **विश्वहा** विश्वेषु सर्वेषु अपि अहःसु अनु सन्ततं **रक्षन्ति** ।

उरुव्यचसाऽग्नेर्धाम्ना पत्यमाने ।
आ सुष्वयन्ती यजत उपाके
उषासानक्तेमं यज्ञमवतामध्वरं नः ॥८॥

पदपाठः

उरुऽव्यचसा । अग्नेः । धाम्ना । पत्यमाने इति । आ । सुस्वयन्ती इति । यजते इति । उपाके इति । उषसानक्ता । इमम् । यज्ञम् । अवताम् । अध्वरम् । नः ॥८॥

एते **उषासानक्ता** । उषाश्च नक्तं च उषासानक्ता । 'उषासोषसः' (पा० ६।३।३१) इति पूर्वपदस्य उषासादेशः । द्विवचनस्य 'सुपां सुलुक्०' (पा० ७।१।३८) इति आकारः । मलोप उपधादीर्घश्च छान्दसौ । उषःशब्दः नक्तशब्दश्च लोके कालविशेषवाचिनौ, इह तु अहोरात्रदेवते वा तत्कालाभिमानिवह्निमूर्तिद्वये वा प्रयुज्येते । **अग्नेः उरुव्यचसा** । उरु प्रभूतं व्यचः व्यापनं यस्य तेन । प्रभूतव्यापनशीलेन इत्यर्थः । व्यचतिर्व्याप्तिकर्मा । तस्य औणादिकः असिप्रत्ययः । 'व्यचेः कुटादित्वम् अनसीति वक्तव्यम् ।' (पा० वा० १।२।१) इति वार्तिकात् ङीत्वाभावात् सम्प्रसारणाभावः । **धाम्ना** तेजसा **पत्यमाने** आगच्छन्त्यौ, ऐश्वर्यं वा प्राप्नुवाने । पत ऐश्वर्ये, **आ सुस्वयन्ती** अतिशयेन शोभनं यथा स्यात् तथा आगच्छन्त्यौ । अय पय गतौ । शतयुंपसर्गस्य सोर्द्विवचनं छान्दसम् । सुष्ठु अयन्त्यौ गच्छन्त्यौ । यद्वा स्वपेर्ण्यन्तस्य वर्णलोपः । सुष्वापयन्त्यौ । **यजते** यष्टव्ये । 'भृमृदृशियजिपच्यमितमनमिहर्येभ्योऽतच् (उ० ३।११०) इति अतच्प्रत्ययः । अस्माकं **यज्ञम् अध्वरम् अवतां** रक्षताम् ।

दैवा होतार ऊर्ध्वमध्वरं नोऽग्नेर्जिह्वयाभि
गृणत गृणाता नः स्विष्टये ।
तिस्रो देवीर्बर्हिरेदं सदन्तामिडा
सरस्वती मही भारती गृणाना ॥९॥

पदपाठः

दैवाः । होतारः । ऊर्ध्वम् । अध्वरम् । नः । अग्नेः । जिह्वया । अभि । गृणत । गृणत । नः । सुऽइष्टये । तिस्रः । देवीः । बर्हिः । आ । इदम् । सदन्ताम् । इडा । सरस्वती । मही । भारती । गृणाना ॥९॥

हे दैवाः ! देवा एव दैवाः । स्वार्थे अण् । होतारः देवानां होमनिष्पादकाः अग्नयः त्रयः पार्थिवान्तरिक्ष्यद्युस्थानीयाः । नः अस्माकम् **अध्वरं** यज्ञं **ऊर्ध्वम्** उन्नतं कुरुत इति शेषः । **जिह्वया** वाचा ऋचा वा **अग्नेः अभि गृणत** प्रशंसां कुरुत । **नः** अस्माकं **स्विष्टये** शोभनयजनाय । यत्किञ्चिदत्र न्यूनं भवेत्तस्य पूर्त्या यज्ञस्य साफल्याय इत्यर्थः । **गृणत** अग्नेः प्रशंसां कुरुत । इमं यज्ञाग्निं प्रति प्रशंसायुक्तां वाचं प्रेरयत । पूर्वार्धेन देवान् होतॄन् स्तुत्वा उत्तरार्धेन तिस्रो देवीः स्तौति । **तिस्रः देवीः** देव्यः । इडा विष्णुपत्नी पृथिवीत्यर्थः । **मही** महती । महतीशब्दे तकारलोपः छान्दसः । 'यस्येति च' (पा० ६।४।१४८) इति अकारलोपः । महत्त्वयुक्ता इत्यर्थः । **सरस्वती** ब्रह्मपत्नी । **गृणाना** अग्निं प्रशंसन्ती **भारती** भरतस्य आदित्यस्य पत्नी । वाण्याः अधिष्ठात्री देवता वा । **इदम्** आस्तीर्णं **बर्हिः** कुशासनम् **आ सदन्ताम्** आसीदन्ताम् । लेटि अडागमे इतश्च लोपे च कृते रूपम् ।

अन्येषु सर्वेस्वपि आप्रीसूक्तेषु अस्मिन् क्रमे द्वौ एव दैव्यौ होतारौ भवतः, अस्मिन् सूक्ते तु अस्याम् ऋचि देवा होतार इति बहुवचनं प्रयुक्तम्, तस्मात् न केवलं पार्थिवमाध्यमिकौ द्वौ एव, किन्तु त्रयोऽपि अग्नयः अग्न्युद्भूता वा ऋत्विजः होतृत्वेनामन्त्रिताः इत्येव वक्तव्यं भवेत् । तथैव च अस्यामृचि अपि पूर्वार्धेन उपरिनिर्दिष्टानुसारेण देवाः होतारः स्तुताः, उत्तरार्धेन च तिस्रो देव्यः इत्यपि प्रत्यृचं एकैकस्या देवतायाः स्तुतिः इति नियमस्यापवादरूपमेव ।

तन्नस्तुरीपमद्भुतं पुरुक्षु ।
देव त्वष्टा रायस्पोषं वि ष्य नाभिमस्य ॥१०॥

पदपाठः

तत् । नः । तुरीपम् । अत्ऽभुतम् । पुरुऽक्षु । देव । त्वष्टः । रायः । पोषम् । वि । स्य । नाभिम् । अस्य ॥१०॥

हे **देव** ! द्योतनशील **त्वष्टः** तनुकर्तः रूपकारक ! **नः** अस्मान् अस्मत्कृते । **तत्** प्रसिद्धं **तुरीपं** त्वरितमाप्नुवत् तारकम् **अद्भुतं** सद्यः आविर्भवत् अभूतमिव सत् । यद्वा । महन्नामैतत् । सारतो महत् । **पुरुक्षु** । क्षुरित्यन्ननाम । बह्वन्नम्, बहुकीर्तिं वा । **रायः** धनस्य **पोषम्** पुष्टिम् । समृद्धं पश्वात्मकं वा धनमित्यर्थः । 'पशवो वै रायस्पोषः' (तै० सं० ५।४।६।२) इति श्रुतिः । ईदृशं यत् धनमस्ति, **अस्य नाभिः वि ष्य** तस्य नाभिस्थानं विमोचय, अथवा त्वष्टा वृष्ट्यादेः कर्ता । त्वष्टृशब्दः यास्केनैवं व्याख्यातः—'त्वष्टा तूर्णमश्नुते इति नैरुक्तास्त्विषेर्वा स्याद्दीप्तिकर्मणस्त्वक्षतेर्वा स्यात्करोति कर्मणः ।' (निरु० ८।१३) इति । तन्नामको वैद्युतोऽग्निः । तस्मादियमृगेवमपि व्याख्यायेत । **हे देव ! त्वष्टः ! वृष्टिकर्तः !** अस्मदर्थं तत् तादृशं तुरीपं तूर्णं व्याप्ति

अद्भुतं पुरुक्षु बह्वन्नं रायस्पोषं गवादिधनपोषकरं तव उदकं यदस्ति अस्य नाभि वृष्टेर्बन्धकं मेघस्य नाभिस्थाने अवस्थितम् उक्तलक्षणम् उदकं वि ष्य विविधं गमय। षो अन्तकर्मणि। 'ओतः श्यनि' (पा० ७।३।३१) इति ओकारलोपः। 'उपसर्गात्सुनोति' (पा० ८।३।३५) इति षत्वम्।

वनस्पतेव सृजा रराणः।
त्मना देवेभ्यो अग्निर्हव्यं
शमिता स्वदयतु ॥११॥

पदपाठः

वनस्पते। अव। सृज। रराणः। त्मना। देवेभ्यः। अग्निः। हव्यम्। शमिता। स्वदयतु ॥११॥

हे **वनस्पते**! वनस्पतिविकार यूप! यूपाभिमानिन् वा वनानां पालक! एतन्नामक अग्ने! देव! 'अग्निर्वै वनस्पतिः' (मा० शत० ८।५।२।६) इति ब्राह्मणम्। पृषोदरादित्वात्साधु। त्वं **रराणः** मा भैषीरिति शब्दायमानः अस्माभिः स्तूयमानः वा। रै शब्दे कर्त्तरि कर्मणि वा लिट्। 'लिटः कानज्वा' (पा० ३।२।१०६) इति कानजादेशः। यद्वा रा दाने। राति ददाति अभिमतफलम् इति रराणः। कानजादेशः पूर्ववत्। **अव सृज** अस्मदीयं कर्म अनुजानीहि, आत्मानं समर्पय इति वा। येन **त्मना** आत्मना, आत्मन्निति शब्दस्य 'मन्त्रेष्वाङ्यादेरात्मनः' (पा० ६।४।१४१) इत्याकारलोपः। त्वया सह वा तव साहाय्येन इति वा। **देवेभ्यः** हविर्भुग्भ्यः। तदर्थमिति। अयम् **अग्निः** यज्ञीयः आहवनीयः, **शमिता** च एतन्नामको शामित्ररूपोऽग्निरपि। स च पाकाधारः हविषः संस्कर्ता सन् **हव्यं** पशुलक्षणम् अन्नं च **स्वदयतु** स्वादूकरोतु अपाकाधिकपाकादिराहित्येन पचतु च देवान् प्रति च तत् प्रेरयतु। 'अग्निर्वै देवानामन्नवान्' (का० स० १०।६) इति श्रुतिः। एव वनस्पतिनामकोऽग्निः, यज्ञीयश्च आहवनीयाख्योऽग्निः, शामिता अग्निश्च, इत्येते त्रयोऽप्यग्नयः देवानां कृते हव्यं स्वदयन्ति इति। यद्वा यूपाग्निरेवात्र स्तूयते, स एव हवींषि सुष्ठु स्वीकरोति, स्वादूकरोति च, यूपाभावे पशुनियोजनाभावेन हविषोऽभावात्।

अग्ने स्वाहा कृणुहि जातवेदः।
इन्द्राय यज्ञं विश्वे देवा हविरिदं जुषन्ताम् ॥१२॥

पदपाठः

अग्ने। स्वाहा। कृणुहि। जातऽवेदः। इन्द्राय। यज्ञम्। विश्वे। देवाः। हविः। इदम्। जुषन्ताम् ॥१२॥

प्रयाजान्ते च स्वाहाकारेण विश्वे देवाः आहूयन्ते। यदुक्तं ब्राह्मणे— 'अन्तो वै यज्ञस्य स्वाहाकारः' (शत०१।५।३।१३) इति। सुष्ठु आहूयन्ते देवा अनेनेति स्वाहा। आपूर्वाद् ह्वयतेः डाप्रत्ययः स्वाहा। शोभनं यथा स्यात् तथा स्वाहा इति। 'स्वाहा

वै सत्यसम्भूता ब्रह्मणो दुहिता ब्रह्मप्रकृता लामसायनसगोत्रा द्वे अक्षरे एकं पदं त्रयश्च वर्णाः शुक्लः पद्मः सुवर्णं इति।' (गो० ब्रा० ३।१६) इत्यपि ब्राह्मणम्। स्वाहा अग्नेः पत्नी इति तु दर्शितं प्रथममन्त्रव्याख्याने। एवं च जातवेदसा अग्निना स्वाहाकारेण विश्वे देवा यज्ञान्ते समाहूयन्ते।

हे **अग्ने जातवेदः** ! जातमात्र एव यः पशुलक्षणं हव्यम् अविदत् इतीदृश हे देव ! 'यज्जातः पशूनविन्दत तज्जातवदेसो जातवेदस्त्वम्।' (मै०सं० १।८।२) इति च श्रुतिः। **इमम्** अस्माकं **यज्ञम् इन्द्राय** इन्द्रतुष्ट्यर्थं **स्वाहा**। स्वाहाशब्दो हविष्प्रदानवाची सन् एतन्नामकमग्निविशेषं लक्षयति तस्मात् तदग्निसंपादितं **कृणुहि** कुरु। 'कृवि हिंसाकरणयोश्च' इदित्वात् नुम्। अत्र प्रयाजेषु वषट्कारप्रदानात् स्वाहाकृतं हविरित्यर्थः। अथ स्वाहाकृतय एव विश्वे देवाः, 'तदाहुः का देवता स्वाहाकृतय इति विश्वे देवा इति ब्रूयाद्' (ऐ० ब्रा० २।१३।३-४) इति ब्राह्मणवचनात्। तस्मात् स्वाहा इत्येवंपूर्वा कृतिः करणम् उच्चारणम् येभ्यः कृते ते स्वाहाकृतयः **विश्वे देवा इदं** स्वाहाकृतं हविः **जुषन्ताम्**। जुषी प्रीतिसेवनयोः। तुदादित्वात् शप्रत्ययः। तस्य ङित्वात् लघूपधगुणाभावः। सेवन्ताम्। अत्र संनिहिता भूत्वा प्रीत्या हविः स्वीकुर्वन्तु इति।



अष्टाविंशं सूक्तम्

चतुर्दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः। अग्न्यादयो मन्त्रोक्तास्त्रिवृच्च देवताः। प्रथमादिपञ्चर्चामिष्टम्येकादशी-चतुर्दशीनाञ्च त्रिष्टुप्, षष्ठ्याः पञ्चपदातिशक्वरी, सप्तमी-नवमी-द्वादशीनां ककुम्मत्युनुष्टुप्, त्रयोदश्याश्च पुर उष्णिक् छन्दांसि।

सर्वसंपत्कर्मसु अस्य सूक्तस्य विनियोगः तथा आयुष्कामस्य हिरण्यमणिबन्धने अस्य विनिगोगः। एतदुभयविस्तरः 'यदाबध्नन्' (अ० १।३५) इति सूक्ते द्रष्टव्यः। उपनयनकर्मण्यपि आयुष्कामस्य ब्रह्मचारिण आज्यहोमे एतद् विनियुक्तम्। अस्य आयुष्यगणे पाठात्। सूत्रितं हि--'मेधाजननायुष्यं जुहुयात्' (कौ० सू० ४७।३१) इति।

तथा अनेन सूक्तेन उपनयनानन्तरम् आयुष्कामस्य माणवकस्य सुवर्णरजतलोहमयानि त्रीणि शकलान्येकत्र कृत्वा नवशालाकं मणिं त्रिवृतं कृत्वा संपात्याभिमन्त्र्य बध्नाति इति केशवः। तदुक्तं कौशिकेन -'उपनयनम्' (कौ० सू० ५५।१) प्रक्रम्य 'नव प्राणान् इति मन्त्रोक्तम्' (कौ० सू० ५८।१०) इति।

तथा 'वैष्णवीम् अन्नकामस्य अन्नक्षये च' (न० क० १७।३) इति विहितायां वैष्णव्याख्यायां महाशान्तौ त्रिवृन्मणिबन्धनेऽपि अस्य सूक्तस्य विनियोगः। तदुक्तं नक्षत्रकल्पे-"नव प्रणान् इति त्रिवृतं वैष्णव्याम्" (न० क० १९०।५) इति।

नव प्राणान्नवभिः सं मिमीते
दीर्घायुत्वाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि
त्रीणि तपसाविष्ठितानि ॥१॥

पदपाठः

नव । प्राणान् । नवऽभिः । सम् । मिमीते । दीर्घायुऽत्वाय । शतऽशारदाय । हरिते । त्रीणि । रजते । त्रीणि । अयसि । त्रीणि । तपसा । आऽविस्थितानि ॥१॥

दीर्घायुत्वाय दीर्घायुष्ट्वाय । छान्दसः सलोपः । चिरकालजीवनाय । कियत्परिमितमायुषो दैर्घ्यमिति तदाह- **शतशारदाय** शरदृतोः संबन्धिनः तद्विशिष्टाः संवत्सराः शारदाः । शतं शारदाः समाहृता यस्मिन् जीवने तत् शतशारदम्, तस्मै । शतसवंत्सरजीवनायेत्यर्थः । आयुर्दैर्घ्यपरिच्छेदस्तु मनुष्याणां परमायुर्विवक्षयेति द्रष्टव्यम् । तथा च श्रुतिः 'शतायुः पुरुषः शतेन्द्रियः' (तै०सं० २।३।११।५) इति । **नवभिः** इन्द्रियद्वारैः नेत्रकर्णमुखनासिकोपस्थगुदारूपैः देहरन्ध्रमार्गैः 'नवद्वारे पुरे देही०' इति भगवद्गीता । **नव प्राणान्** । प्राणिति एभिः इति प्रोपसृष्टस्य अनितेः **'हलश्च'** (पा० ३।३।१२१) इति करणे घञ् । एतेषु देहच्छिद्रेषु अवस्थितान् प्राणाख्यान् वायून् । 'नव वै प्राणाः सप्त शीर्षन्नवाञ्चौ द्वौ' (शत० ६।४।२।५) इति ब्राह्मणम् । **स** सुष्ठु मिनीते करोति योजयति । तथाहि 'प्राणिनां सर्वतो वायुश्चेष्टां वर्त्तयते पृथक् । प्राणनाच्चैव भूतानां प्राण इत्यभिधीयते' (महा० १२।३२८।३५) इति स्मृतिः । एवं प्राणानाम् इन्द्रियैः सम्यग्योजनेन इन्द्रियाणां बलवत्त्वम् आयुषश्च वर्धनं संजायते । तस्मादनेन संकल्पनकर्मणा मणि त्रिवृतम् त्रिधातुशलाकानिर्मितम् अभिमन्त्रयति । अयं च प्राणवायुः सूक्ष्मशरीरसमष्ट्युपहितचैतन्यरूपः प्रागगमनवान् नासिकाग्रस्थानवर्ती बहिर्गमनकर्मकश्च । तस्य च त्रीणि स्थानानि 'आस्यनासिकयोर्मध्ये हृन्मध्ये नाभिमध्यगे' इति योगार्णवे प्रोक्तानि । एतस्यानुरूपमेव त्रिभिः हिरण्यरजत-लोहरित्येतैर्धातुभिः निर्मितम् अत एव च त्रिवृदिति अभिख्यातं मणि रक्षाकरण्डकमनेन अभिमन्त्रणेन प्राणवायोः दैहिकैः उर्ध्वमध्याधःस्थानैः संयोजयति । **हरिते** हरिद्रावर्णे पीतवर्णे सुवर्णमये, **रजते** रजतमये, **अयसि** अयोमये । ताम्रमये लोहमये वा । प्रत्येकं **त्रीणि त्रीणि** इन्द्रियाणि **तपसा** तपनेन । तप संतापे तप दाहे वा इत्यस्य असुन्प्रत्ययः (उ० ४।१८९) । व्रतादिक्लेशकरैः कर्मभिर्वा दहनेन वा । **आ** समन्तात् **विष्ठितानि**, विशेषेण परस्परावियोज्यरूपेण संहत्य स्थितानि तानि, प्राणैः । यद्वा ।

प्रत्येकं त्रीणि त्रयः प्राणाः । नपुंसकं छान्दसम् । ये तपसा यागादिलक्षणेन रक्षितृदेवाद्युपासनरूपेण रक्षाप्राप्तिसाधनेन आविष्ठितानि सुप्रतिष्ठिताः, तान् इन्द्रियैर्वा । दीर्घजीवनाय सम्यग् योजयतीति ।

अग्निः सूर्यश्चन्द्रमा भूमिरापो
द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना
अनेन मा त्रिवृता पारयन्तु ॥२॥

पदपाठः

अग्निः। सूर्यः । चन्द्रमाः । भूमिः । आपः । द्यौः । अन्तरिक्षम् । प्रऽदिशः । दिशः । च । आर्तवाः । ऋतुऽभिः । सम्ऽविदानाः । अनेन । मा । त्रिऽवृता । पारयन्तु ॥२॥

अथ त्रिवृत्करणं क्षित्यप्तेजसां पृथिव्यन्तरिक्षद्युस्थानीयानां सारग्रहणेन मिश्रीकरणम् । तस्मादेवमाशास्ते । अनेन एवं विधाभिमन्त्रणसिद्धेन **त्रिवृता** त्रिधातुनिर्मितेन रक्षाकरण्डकेन **अग्निः** पृथिवीस्थानीयः, **सूर्यः** द्युस्थानीयः, चन्द्रमाश्चान्तरिक्षस्थानीयः इति त्रयोऽपि ज्योतिष्मन्तः त्रिस्थानीयाः प्रकाशकराः, एतैः तत्तत्स्थानीयाः सर्वेऽपि देवा उक्ता भवन्ति । तथा च **भूमिः** पृथिवी गन्धलक्षणा, **आपः** रसलक्षणाः, **द्यौः** द्युलोकः तेजोरूपलक्षणः, **अन्तरिक्षम्** वायुस्थानं स्पर्शलक्षणम् । **प्रदिशः दिशः च** । प्राच्यादिचतस्रो दिशः, तन्मध्याः विभागा ऐशान्याद्याः च चतस्रः प्रदिशः, ऊर्ध्वम् अधश्चेति दश दिशो आकाशविभागाश्च शब्दलक्षणा इति सर्वेन्द्रिय-प्रकाशकराणि सर्वमहाभूतानि, **आर्तवाः** ऋतुसंबन्धिनः कालविभागा **ऋतुभिः** वसन्तादिभिः षड्भिः सह, इति एवं सर्वे स्थलकालदेवा महाभूतानि च **संविदानाः** ऐकमत्यं प्राप्ताः **मा** मां **पारयन्तु** शतशारदपरिमितदीर्घजीवननिर्विघ्नसमाप्तिकरणे साहाय्यं कुर्वन्तु । तदर्थं मां समर्थं कुर्वन्तु इत्यर्थः । **सविदानाः** । विद ज्ञाने । संपूर्वाद् वेत्तेः अकर्मकात् 'समो गमादिषु विदिप्रच्छि०' (पा० वा० १।३।२९) इति आत्मनेपदम् । लटः शानच् ।

त्रयः पोषास्त्रिवृति
श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा
पशूनां त इह श्रयन्ताम् ॥३॥

पदपाठः

त्रयः । पोषाः । त्रिऽवृति । श्रयन्ताम् । अनक्तु । पूषा । पयसा । घृतेन । अन्नस्य । भूमा । पुरुषस्य । भूमा । भूमा । पशूनाम् । ते । इह । श्रयन्ताम् ।।३।।

अस्मिन् त्रिवृति हिरण्यरजतलोहमये मणौ **त्रयः** त्रिप्रकाराः **पोषाः** पुष्टयः **श्रयन्ताम्** आश्रयन्तु । आशंसायां लोट् । इमं त्रिवृतम् **पूषा**, सकलप्राणिजातस्य पोषको देवः । 'पूषापोषयत्' (तै० ब्रा० १।६।२।२) इति ब्राह्मणम् । **पयसा** गोमहिष्यादीनां पयोविकारभूतेन च **घृतेन अनक्तु** योजयतु । पूष्णः प्रसादेन **अन्नस्य** व्रीहियवादिरूपस्य **भूमा** बहुभावः । बहुशब्दाद् इमनिचि बहोर्लोपो 'भू च बहो' (पा० ६।४।१५८) इति इमनिच आदिलोपो बहोर्भूभावश्च **पुरुषस्य** पादद्वयोपेतस्य पुरुषादिकस्य **भूमा** बहुभावः, **पशूनां** पादचतुष्टयोपेतानां गोमहिष्यश्वाजाविकानां **भूमा** बहुभावः, **ते** सर्वप्रकाराः पोषाः **इह** अस्मिन् त्रिवृन्मणौ **श्रयन्तां** निवसन्तु ।

इममादित्या वसुना समुक्षतेम-
मग्ने वर्धय वावृधानः ।
इममिन्द्र सं सृज वीर्येऽणास्मिन्
त्रिवृच्छ्रयतां पोषयिष्णु ।।३।।

पदपाठः

इमम् । आदित्याः । वसुना । सम् । उक्षत । इमम् । अग्ने । वर्धय । ववृधानः । इमम् । इन्द्र । सम् । सृज । वीर्येण । अस्मिन् । त्रिऽवृत् । श्रयताम् । पोषयिष्णु ।।४।।

हे **आदित्याः** ! अदितेः द्वादश पुत्राः ! 'दित्यदित्या०' (पा० ४।१।८५) इति ण्यः । 'लिङ्गविशिष्टपरिभाषायाः' (पा० ४।१।१) अनित्यत्वात् ङचन्ताण्ण्यो न । **इमं** त्रिवृतं भवन्तः **वसुना** अभिलषितेन धनेन **सं** सम्यक् **उक्षत** सिञ्चत, उक्ष सेचने । यथा धनसमृद्धिर्भवति तथा यूयम् अस्मद्गृहेषु समृद्धा भवतेत्यर्थः । आदित्यानां वसूनां च सहसम्भवेन आदित्यान् वसुदानाय प्रार्थयते । तथा च श्रुतिः 'यथादित्यावसुभिः संबभूवुः' (तै० सं० २।१।११।२) । हे **अग्ने** ! स्वयं **वावृधानः** अतिशयेन वर्धमानः सन् । वृधु वृद्धौ । लिटः कानच् । **इमं** त्रिवृतम् अपि **वर्धय** आयुर्वर्धनसामर्थ्यं देहि अस्मभ्यमिति शेषः । 'अग्निरायुस्तस्य मनुष्या आयुष्कृतः' (मै०सं०२।३।४) इति श्रुतिः । हे **इन्द्र** ! **इमं** त्रिवृतं तव **वीर्येण** पराक्रमसामर्थ्येन **सं सृज** संसर्जय संयोजय । **अस्मिन्** **त्रिवृत्** त्रिवृति । ङिलोपश्छान्दसः । **पोषयिष्णु** पोषकम्, पूष्णो देवस्य वा यत्कर्म तद् ।

पोषयतेः 'णेश्छन्दसि' (पा० ३।२।१३९) इति इष्णुच्प्रत्ययः । सर्वप्रकारम् ओजः वीर्यं धनं च **श्रयताम्** । इह प्रथमे पादे सर्वे आदित्याः समुदायरूपेण स्तुताः, तदनन्तरं च तेभ्यः अग्निः द्युस्थानीयः, इन्द्रः, पूषा च इति प्रत्येकम् एकैकेन पादेन स्तुताः भवन्ति । कथं च पार्थिवः अग्निः द्युस्थानीयत्वेन वक्तुं शक्यते इति चेत् अत्र 'अग्निरेव सविता' (गो० १।१।३३) 'अग्निर्वा अर्कः (मा० शत० २।५।१।४) इत्यादीनि अनेकशः ब्राह्मणवचनानि प्रमाणभूतानि ।

भूमिष्ट्वा पातु हरितेन
विश्वभृदग्निः पिपर्त्वयसा सजोषाः ।
वीरुद्भिष्टे अर्जुनं संविदानं दक्षं
दधातु सुमनस्यमानम् ॥५॥

पदपाठः

भूमिः । त्वा । पातु । हरितेन । विश्वऽभृत् । अग्निः । पिपर्तु । अयसा । सऽजोषाः । वीरुत्ऽभिः । ते । अर्जुनम् । सम्ऽविदानम् । दक्षम् । दधातु । सुऽमनस्यमानम् ॥५॥

विश्वभृत् विश्व सर्वं चतुर्विधं स्वेदजादिकं जीवजात बिभ्रती इयं **भूमिः** अस्य त्रिवृतः **हरितेन** हिरणमयेन भागेन संविदानम् अभेदं कुर्वाणा सती **त्वा** त्वां त्रिवृन्मणिधारकं पुरुष **पातु** रक्षतु । तथैव च **सजोषाः** समानप्रीतिः । जुषी प्रीति-सेवनयोः । असुन्प्रत्ययः । असुनि 'सुपां सुलुक्०' (पा० ७।१।३९) इति जसः सुः । **अग्निः । अयसा** त्रिवृतः अयोमयेन भागेन त्वां **पिपर्तु** पूरयतु । पॄ पालनपूरणयोः । जुहोत्यादित्वात् शपः श्लुः । 'अर्तिपिपर्त्योश्च' (पा० ७।४।७७) इत्यभ्यासस्य इत्वम् । धनधान्यादिभिः समृद्धं करोत्वित्यर्थः अथ च अस्य त्रिवृतः **अर्जुनं** श्वेतं रजतम् । रजतमयोभागः इति यावत् । **सुमनस्यमानम्** सुमनः इवाचरत् । 'कर्तुः क्यङ् सलोपश्च' (पा० ३।१।११) इति क्यङ् । सौमनस्यं प्राप्नुवत् । **वीरुद्भिः** वल्लीभिः सोमाद्यौषधिभिः **संविदानम्** ऐकमत्यं प्राप्नुवत् ताभ्यः ते त्वत्कृते **दक्षं** बलं **दधातु** धारयतु । 'चन्द्रमा उ वै सोमः' (मा० शत० ६।५।१।१) इति ब्राह्मणेन चन्द्रमसः सोमत्वम् । सोमश्च खलु वल्ल्यात्मकौषधीनां राजा । 'ओषधयः खलु वै वाजः' (तै० ब्रा० १।३।७।१) इति ब्राह्मणम् । 'स आपूर्यमाणोऽमुं लोकं गच्छति । सोऽमुना लोकेन संस्पृश्यान्नं भवति । स यदस्य तत्र स्वद्यं तत्स्वद इत्यपोछन्निमं लोकमागच्छति । स इमा आपः ओषधीः प्रविशति' (जै० ब्रा० २।३) इति च ब्राह्मणम् । तस्मात् सोमप्रमुखौषधिप्रवेशानन्तरं बलरूपेण परिणतश्चन्द्रमा श्वेतवर्णसादृश्येन रजतेन ऐकरूप्यं प्राप्नुवन् वीरुधां बलमपि तत्र आददातु इति भावः ।

त्रेधा जातं जन्मनेदं हिरण्यमग्नेरेकं प्रियतमं
बभूव सोमस्यैकं हिंसितस्य परापतत् ।
अपामेकं वेधसां रेत आहुस्तत्
ते हिरण्यं त्रिवृदस्त्वायुषे ॥६॥

पदपाठः

त्रेधा । जातम् । जन्मना । इदम् । हिरण्यम् । अग्नेः । एकम् । प्रियऽतमम् । बभूव । सोमस्य । एकम् । हिंसितस्य । परा । अपतत् । अपाम् । एकम् । वेधसाम् । रेतः । आहुः । तत् । ते । हिरण्यम् । त्रिऽवृत् । अस्तु । आयुषे ॥६॥

जन्मना उत्पत्तिकाले इदं हिरण्यं त्रिवृन्मणिरूपं त्रेधा त्रिप्रकारेण जातम् उत्पन्नमासीत् । त्रिवृतः हिरण्यम् इति अभिधानकरणेन अस्य सर्वार्थसिद्धिप्रदरूपं श्रेष्ठत्वमुक्तं भवति । यद्वा तिसृषु धातुषु हिरण्यस्य प्राधान्यात् प्राधान्येन व्यपदेशा भवन्ति इति न्यायेन तिसृणां सम्मिश्रण सदपि हिरण्यत्वेन उक्तं भवेत् । तेभ्यः त्रिभ्यः प्रकारेभ्यः एकं प्रथमं हरितं पीतवर्णं सुवर्णं तत् अग्नेः पार्थिवस्य प्रियतमं श्रेष्ठं प्रीतिकरं बभूव । 'हिरण्यं वा अग्नेस्तेजः' (मै० सं० १।६।४) इति श्रुतिः । अग्नेः अर्चिषां सुवर्णवर्णत्वात्सुवर्णप्रियत्वमपि गम्यते । तथापि श्रुतिः' अग्निर्वा अग्रे हिरण्यमविन्दत्' (मै० सं० २।२।७) । एकं द्वितीयं श्वेतं रजतं तत् हिंसितस्य सोमस्य पञ्चम्यर्थे षष्ठी । छन्दसि बहुलम् । निष्पिष्यमानात् सोमरसात् परापतत् निष्पन्नं बभूव । सोमरसरजतयोः श्वेतवर्णसादृश्येन इदमपि गम्यते । शिष्टम् एकं तृतीयं च अयः वेधसां धातॄणाम् । सर्वेषां वृक्षपशुपक्षिमनुष्यादीनां जीवजातानाम् उत्पत्तिकारणभूतानामित्यर्थः । अपां वृष्टीनां रेतः उपादानभूतं यदुत्पत्तिकारणं भूमिः ताम् आहुः कथयन्ति । 'अयस्मयी पृथिवी' (गो० २।२।७) इति ब्राह्मणम् । तत् सुवर्णरजतायोरूपम् इदं हिरण्यं हितरमणीयं सर्वकामप्रदानेन मनोहरं त्रिवृत् ते तव आयुषे दीर्घायुरादिलाभाय । 'क्रियार्थोपपदस्य०' (पा० २।३।१४) इति चतुर्थी । अस्तु । आशसायां लोट् ।

त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् ।
त्रेधामृतस्य चक्षणं त्रीण्यायूंषि तेऽकरम् ॥७॥

पदपाठः

त्रिऽआयुषम् । जमत्ऽअग्नेः । कश्यपस्य । त्रिऽआयुषम् । त्रेधा । अमृतस्य । चक्षणम् । त्रीणि । आयूंषि । ते । अकरम् ॥७॥

जमदग्नेः एतन्नामकस्य महर्षेः। जमत् इति ज्वलतिकर्मसु (निघ० १।१७) पाठात् जमच्छब्दो दीप्तिवचनः। जमन्तः ज्वलन्तः अग्नयो यस्य स जमदग्निः तस्य। **त्र्यायुषम्** यद् दीर्घमायुः तस्य त्रिगुणम्। **कश्यपस्य** एतन्नामकस्य महर्षेः। कश्यपः दूरसूक्ष्मादिभेदभिन्नस्यापि कृत्स्नस्य जगतो द्रष्टा। 'कश्यपः पश्यको भवति। यत्सर्वं परिपश्यतीति सौक्ष्म्यात्' (तै० आ० १।८।८) इति आरण्यकम्। तस्यापि **त्र्यायुषं** दीर्घायुषो त्रिगुणम्। **त्रेधा** त्रिवारं च **अमृतस्य** शतशारदस्य आयोः। तथाहि ब्राह्मणं भवति– 'य एव शतं वर्षाणि यो वा भूयांसि जीवति स हैवैतदमृतमाप्नोति' (मा० शत० १०।२।६।८) इति। यत् **चक्षणम्** दर्शनं प्राप्तिः तदपि। चक्षिङ् दर्शने। इति एतानि त्रीणि अपि **आयूंषि** अनेन त्रिवृता अहं **ते** तव **अकरं** करोमि। जमदग्नेः कश्यपस्य च आयुषोस्त्रिगुणम्, त्रिवारं च शतशारदमायुः अनेन त्रिवृता त्वमाप्नुया इति आशास्ते।

त्रयः सुपर्णास्त्रिवृता यदा-
यन्नेकाक्षरमभिसंभूय शक्राः
प्रत्यौहन्मृत्युममृतेन साक-
मन्तर्दधाना दुरितानि विश्वा ॥८॥

पदपाठः

त्रयः। सुऽपर्णाः। त्रिऽवृता। यत्। आयन्। एकऽअक्षरम्। अभिऽसंभूय। शक्राः। प्रति। औहन्। मृत्युम्। अमृतेन। साकम्। अन्तःऽदधाना। दुःऽइतानि। विश्वा ॥८॥

यद् यदा अनेन **त्रिवृता** सुवर्णरजतलोहमयेन त्रयोऽपि धातुशलाकाः तन्तवो वा, **त्रयः सुपर्णाः** शोभनपतनशीलाः प्रभूतबलवन्तो वैनतेया इव **शक्राः** सर्वकार्येषु समर्थाः। शक्लृ शक्तौ। 'स्फायितञ्चि०' (उ० २।१३) इत्यादिना रक्। एकस्यापि वैनतेयस्य अमृतकुम्भाहरणप्रसंगे बालखिल्यऋषिसप्तकगजकच्छपादीनां हरणे दर्शितं सामर्थ्यं तु प्रसिद्धमेव, एतादृशाः त्रयोऽपि त्रिधातुनिर्मिताः सर्वेभ्यः त्रिलोकस्थानीयेभ्यो देवेभ्यो आसादितवीर्यवन्तः **अभिसंभूय** संगत्य एकीभूय त्रयाणामपि सामर्थ्यं एकीकृतवन्तः **एकाक्षरम्** एकम् अक्षरम् अविनाशिरूपम्। यद्वा वृत्ताकारम् आद्यन्तरहितं पूर्णरूपम् ओंकाररूपम्। **आयन्** आगच्छन्ति प्राप्नुवन्ति तदा ते **विश्वा** विश्वानि सर्वाणि **दुरितानि** दुर्गमानि दुःखानि अनिष्टानि वा अमंगलकारीणि **अन्तर्दधानाः** तिरस्कुर्वन्तः दूरीकुर्वन्तः **अमृतेन** मरणराहित्येन **साकं** सार्धम्, संयुज्य इति शेषः। **मृत्युं** मरणकारणं **प्रति** प्रतीपम् **औहन्** अवहन्। वहतेः छान्दसो लङ्। प्रति वहन्ति दूरं नयन्ति निवारयन्ति।

दिवस्त्वा पातु हरितं
मध्यात् त्वा पात्वर्जुनम् ।
भूम्या अयस्मयं पातु
प्रागात् देवपुरा अयम् ॥९॥

पदपाठः

दिवः । त्वा । पातु । हरितम् । मध्यात् । त्वा । पातु । अर्जुनम् । भूम्याः । अयस्मयम् । पातु । प्र । अगात् । देवऽपुराः । अयम् ॥९॥

दिवः स्वर्गात् । दिव्येभ्योऽनिष्टेभ्यः द्युस्थानोद्भवेभ्यः वा उत्पातेभ्यः इत्यर्थः । अस्य त्रिवृतः **हरितं** सुवर्णं **त्वा** त्वाम् इमं सुवर्णरजतलोहात्मकत्रिवृन्मणिं धारयन्तं पुरुषं **पातु** रक्षतु । 'हिरण्यज्योतिषैव सुवर्गं लोकमेति' (तै० सं० ५।४।२।४) इति श्रुत्या हिरण्यस्य दिव्यानिष्टनिवारकत्वम् अवगम्यते । तथैव **त्वा** त्वां **मध्यात्** मध्यस्थानात् अन्तरिक्षात् अन्तरिक्ष्येभ्यो वा अनिष्टेभ्यः **अर्जुनं** मध्यमलोकवासिना चन्द्रमसा संविदानं प्राप्तम् इदं श्वेतं रजतं **पातु** रक्षतु । 'अन्तरिक्षस्य रजताः' (तै० ब्रा० ३।९।६।५) इति ब्राह्मणम् । तथैव च अस्य **अयस्मयं** भौम्यं तृतीयं **भूम्याः** पार्थिवेभ्यः अनिष्टेभ्यः **पातु** रक्षतु । 'अयस्मयी पृथिवी' (गो० २।२।७) इति पूर्वनिर्दिष्टं ब्राह्मणम् । **अयं** त्रिवृन्मणिः **देवपुराः** देवनगरीः । पुर् इत्यस्य ङीषः स्थाने टाब्ग्रहणम् आर्षम् । **प्र** प्रकर्षेण **अगात्** गतो प्राप्तो भवति । त्रिधातुशलाकानिर्मितत्वेन त्रिषु लोकेषु स्थितानां त्रयाणामपि देवानां निवासभूतः सन्नयं त्रिवृन्मणिः त्रिलोकोद्भूतानिष्टनिवारणे समर्थः अस्तीत्यर्थः ।

इमास्तिस्रो देवपुरास्तास्त्वा रक्षन्तु सर्वतः ।
तास्त्वं बिभ्रद् वर्चस्व्युत्तरो द्विषतां भव ॥१०॥

पदपाठः

इमाः । तिस्रः । देवऽपुराः । ताः । त्वा । रक्षन्तु । सर्वतः । ताः । त्वम् । बिभ्रत् । वर्चस्वी । उत्तरः । द्विषताम् । भव ॥१०॥

त्रिवृदभिमन्त्रणानन्तरं बन्धनात् पूर्वं त्रिवृद्धारकाय आशास्ते । **इमाः** त्रिधातुशलाकाः **तिस्रो देवपुराः** देवनगर्यः एव सन्ति, यतः त्रिलोकीस्थितानां देवानां निवासभूतास्ताः, तस्मात् **ताः** तिस्रोऽपि **त्वा** त्वां **सर्वतः** सर्वानिष्टेभ्यः **रक्षन्तु** । **ताः** त्रिवृन्मणिरूपेण **बिभ्रत्** हस्ते धारयन् **त्वं वर्चस्वी** तेजस्वी प्रभावशीलः **द्विषतां** शत्रूणां **उत्तरः** उन्नततरो विजयी **भव** ।

पुरं देवानाममृतं हिरण्यं
ये आबेधे प्रथमो देवो अग्रे ।
तस्मै नमो दश प्राचीः कृणोम्यनु
मन्यतां त्रिवृदाबधे मे ॥११॥

पदपाठः

पुरम् । देवानाम् । अमृतम् । हिरण्यम् । यः । आऽबेधे । प्रथमः । देवः । अग्रे । तस्मै । नमः । दश । प्राचीः । कृणोमि । अनु । मन्यताम् । त्रिऽवृत् । आऽबधे । मे ॥११॥

अथ त्रिवृद्बन्धनार्थम् आदिमत्रिवृद्धारकस्य देवस्य अनुज्ञां प्रार्थयते । **यः प्रथमः** आदिमः श्रेष्ठो वा **देवः** द्योतनशीलः सर्वेषाम् एतत्त्रिवृन्मणिधारकाणाम् **अग्रे** पूर्वं **इदम् अमृतम्** अमरणसाधनम् अमृतत्वप्रापकं **हिरण्य** हितसाधनेन रमणीयं सर्वेषां त्रिस्थानीयानां **देवानां पुरम्** एकभूतं निवासस्थानम् **आबेधे** आबद्धवान् । औपसृष्टस्य बध्नातेः लिटि आत्मनेपदन् आर्षम् । **तस्मै** प्रथमस्मै त्रिवृन्मणिधारकाय **दश** दशसंख्याकाः अङ्गुलीः **प्राचीः** प्राङ्मुखीः कृत्वा अहं **नमः कृणोमि** नमस्करोमि । यद्वा **दश प्राचीः** उपलक्षणेन प्राच्याद्याः दिशः । दशसु दिक्षु इति यावत् । नमस्करोमि । अहम् एतं **त्रिवृत्** त्रिवृतम् विभक्तिव्यत्ययः आर्षः । **आ बधे** आबध्नामि । आत्मनेपदम् आर्षम् । तदर्थं च **मे** मह्यं स आदिमः त्रिवृद्धारको देवः **अनु मन्यताम्** अनुमतिम् अनुज्ञां ददातु ।

आ त्वा चृतत्वर्यमा पूषा बृहस्पतिः ।
अहर्जातस्य यन्नाम तेन त्वाति चृतामसि ॥१२॥

पदपाठः

आ । त्वा । चृततु । अर्यमा । आ । पूषा । आ । बृहस्पतिः । अहःऽजातस्य । यत् । नाम । तेन । त्वा । अति । चृतामसि ॥१२॥

अथ त्रिवृतं बधानः तस्य दृंहणाय देवान् प्रार्थयते । हे त्रिवृन्मणे ! **त्वा** त्वाम् **अर्यमा** । अर्यान् मिमीते । 'श्वन्नुक्षन्०' (उ० १।१५७) इत्यादिना कनिन्प्रत्ययो निपातितः । अरीन् मन्देहादीनसुरान् यच्छति नियच्छतीति अर्यमा सूर्यः । 'असौ वा आदित्योऽर्यमा' (तै० सं० २।३।४।१) इति श्रुतिः । अहोरात्रविभागस्य कर्ता सूर्यः । **आ** समन्तात् । दृढमित्यर्थः । **चृततु** ग्रथ्नातु । चृती हिंसाग्रथनयोः । तथैव **पूषा** पोषको देवः । 'अयं वै पूषा योऽयं पवत एष हीदं सर्वं पुष्यति' (शत० १४।२।१।९) इति ब्राह्मणम् । **बृहस्पतिः** बृहतां देवानां पतिः । 'बृहस्पतिर्वै देवानां पुरोहितः ।'

(ऐ०ब्रा० ८।२६) इति ब्राह्मणम् । तौ अपि इमं त्रिवृतं ग्रथ्नीतः । तथा अहर्जातस्य अहन्यहनि जायत इत्यहर्जातः प्राणिविशेषः । तस्य यत् नाम अहर्जात इति तेन नाम्ना त्वा त्वाम् अति अतिशयेन । दृढमित्यर्थः । चृतामसि ग्रथ्नीमः । 'इदन्तो मसि' (पा० ६।१।४६) ।

ऋतुभिष्ट्वार्तवैरायुषे वर्चसे त्वा ।
संवत्सरस्य तेजसा तेन संहनु कृण्मसि ॥१३॥

पदपाठः

ऋतुऽभिः । त्वा । आर्तवैः । आयुषे । वर्चसे । त्वा । सम्ऽवत्सरस्य । तेजसा । तेन । सम्ऽहनु । कृण्मसि ॥१३॥

ऋतुभिः ग्रीष्मादिभिः षड्भिः, आर्तवैः ऋतुसंबन्धिभिः कालविभागैरहोरात्रैः, ऋतुसंबन्धिनीभिर्वा देवताभिः । संवत्सरस्य संवसन्ति अस्मिन् मासादिकालावयवा इति संवत्सरः तस्य । संवत्सरव्यापिनः इत्यर्थः । यद्वा एतदुपलक्षितकालभेदनिर्वाहकस्य आदित्यस्य । 'संवत्सरोऽसावादित्यः' (तै० आ० १०।६३।१) इति आरण्यकम् । तेन प्रसिद्धेन तेजसा त्वा त्वां त्रिवृतम् आयुषे दीर्घायुरादिलाभाय । वर्चसे दीप्त्यै । संहनु संहतो हनुः यस्मिन् कर्मणि तत् । ग्रन्थेः दृढीकरणे दन्तान् संहत्य पिनष्टि इत्येवं प्रकारेण दृढम् अभेद्यं कृण्मसि कुर्मः ।

घृतादुल्लुप्तं मधुना समक्तं
भूमिदृंहमच्युतं पारयिष्णु ।
भिन्दत्सपत्नानधरांश्च कृण्वदा-
मा रोह महते सौभगाय ॥१४॥

पदपाठः

घृतात् । उत्ऽलुप्तम् । मधुना । सम्ऽअक्तम् । भूमिऽदृंहम् । अच्युतम् । पारयिष्णु । भिन्दत् । सऽपत्नान् । अधरान् । च । कृण्वत् । आ । मा । रोह । महते । सौभगाय ॥१४॥

घृतात् घृतेनेत्यर्थः । आज्येन हुतशिष्टेन उल्लुप्तम् उल्लिप्तम् ऊर्ध्वम् उपरिभागे लिप्तम् । इकारस्य उकारादेशश्छान्दसः । संपातावनयनेन सर्वतोऽक्तम् । 'आश्यबन्ध्याप्लपनयानभक्ष्याणि संपातवन्ति' (कौ० सू० ७।१५) इति परिभाषित्वाद् घृताक्तत्वम् । मधुना माक्षिकेन समक्तं सम्यक्तया लिप्तम् । आज्यमधुभ्यां लिप्तसर्वाङ्गम् इत्यर्थः । भूमिदृंहं भूमिरिव दृढम् । उपमार्थे । अच्युतं चलनरहितं

च्युतिर्नाशस्तद्रहितम् अन्यैः शत्रुभिः अच्याव्यं पारयिष्णु पारप्रापकम् । पारयतेः 'णेश्छन्दसि' (पा० ३।२।१३६) इति इष्णुच्प्रत्ययः । सपत्नान् शत्रून् भिन्दत् भिन्नान् कुर्वत् अधरान् निकृष्टान् बलहीनान् च कृण्वत् कुर्वत् महते सौभगाय । शोभनो भगोऽस्य अस्तीति सुभगः तस्य भावः सौभगम् । उद्गात्रादिगणे 'सुभगमन्त्रे' इति पाठात् 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' (पा०५।१।१२६) इति अञ् । महत् सौभाग्यमस्माकं दातुं मा माम् आ रोह मम भुजादिप्रदेशम् अधितिष्ठ ।



एकोनत्रिंशं सूक्तम्

पञ्चदशर्चस्यास्य सूक्तस्य चातन ऋषिः, जातवेदा मन्त्रोक्ता वा देवताः । प्रथमा-द्वितीया-चतुर्थीनामृचां षष्ठ्यादिषण्णाञ्च त्रिष्टुप्, तृतीयायास्त्रिपदा विराड्गायत्री, पञ्चम्याः पुरोतिजगती विराड्जगती, द्वादश्या भुरिगनुष्टुप्, त्रयोदशी-पञ्चदश्योरनुष्टुप्, चतुर्दश्याश्च चतुष्पदा पराबृहती ककुम्मत्यनुष्टुप् छन्दांसि ।

अस्य सूक्तस्य चातनगणे पाठाद् यत्र यत्र चातनगणस्य विनियोगस्तत्र तत्रास्य सूक्तस्य विनियोगः । विस्तरस्तु 'स्तुवानमग्ने' (अ० १।७) इति सूक्ते द्रष्टव्यः ।

पुरस्ताद् युक्तो वह जातवेदोऽग्ने
विद्धि क्रियमाणं यथेदम् ।
त्वं भिषग् भेषजस्यासि कर्ता
त्वया गामश्वं पुरुषं सनेम ॥१॥

पदपाठः

पुरस्तात् । युक्तः । वह । जातऽवेदः । अग्ने । विद्धि । क्रियमाणम् । यथा । इदम् । त्वम् । भिषक् । भेषजस्य । असि । कर्ता । त्वया । गाम् । अश्वम् । पुरुषम् । सनेम ॥१॥

अग्ने ! अङ्गति गच्छति वैद्युतादिरूपेण कृत्स्नं जगद् व्याप्नोति इति अग्निः । 'अङ्गेर्नलोपश्च' (उ० ४।५०) इति निप्रत्ययः तत्संयियोगेन नलोपश्च । यद्वा अग्रणीत्वादिगुणयोगादग्निः । यदाह यास्कः–'अग्निः कस्मात् । अग्रणीर्भवति अग्रं यज्ञेषु प्रणीयते अङ्गं नयति संनममानः' (निरु० ७।१४) इति । ईदृश हे अग्ने ! पुरस्तात् प्रथमतः । 'पूर्वाधरावराणामसि पुरधवश्चैषाम्' (पा० ५।३।३९) 'अस्ताति च' (पा० ५।३।४०) इति पूर्वशब्दादस्तातिप्रत्ययः, तत्संनियोगेन पुरादेशश्च । युक्तः चातनकर्मणि नियुक्तः सन् वह आवह । मदीयं कर्म प्रापय । लोटि 'अतो हेः' (पा० ६।४।१०६) इति हेर्लुक् । अग्नेः आवहनकर्तृत्वमन्यत्रापि आम्नातम्–'अग्ने देवाँ

इहावह' (ऋ० १।१२।३) इति। 'अग्निम् अग्न आवह' (तै० ब्रा० ३।५।२।२) इति च। यद्वा पिशाचं वह, आ वह प्रतीकारार्थम् अस्मिन् जने आवेशय। अथवा, निग्रहार्थं स्वसमीपमानयेत्यर्थः। हे **जातवेदः** जातानां वेदितः! जातशब्दोपपदात् विद ज्ञाने इत्यस्मात् धातोः 'गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च' (पा०उ०४।२२७) इति असुन्। यास्कः तु एवं निरवोचत्—''जातवेदाः कस्मात्। जातानि वेद, जातानि वैनं विदुः, जाते जाते विद्यत इति वा जातवित्तो वा, जातधनो वा, जातविद्यो वा जातप्रज्ञो वा। 'यत्तज्जातः पशूनविन्दतेति तज्जातवदेसो जातवेदस्त्वम्' (मै० सं० १।८।२) इति हि श्रुतिः (निरु० ७।१९) इति। **यथा** येन प्रकारेण वा प्रयोजनेन वा इदं क्रियते तत् **क्रियमाणम्** अस्माभिरनुष्ठीयमानं मन्त्रसाध्यं कर्म **विद्धि** जानीहि। एतस्य कर्मणः एतावत् फलं देयम् इति मनसा निश्चिनु **त्वं भिषग्** वैद्यः आमय-चिकित्सकोऽसि। चिकित्सका हि रोगस्वरूपं तस्य निदानं च ज्ञात्वा औषधादिभिः प्रतीकारं कुर्वन्ति। भिषज्यति चिकित्सां करोति इति भिषग् वैद्यः। **भेषजस्य** रोग-निवारकस्य औषधस्य **कर्ता असि**। जातवेदसः तापग्रहणेन हि पक्वौषधयो व्यवहारयोग्या भवन्ति। पाकानन्तरमपि शरीरस्थेनाग्निना संयुज्यमाना एव रोगानिष्टनिवारणकर्मणि सफला भवन्ति। अत एव च 'ओषध्यः फलपाकान्ताः' इति, 'ओषः पाकः आसु धीयते इति ओषधयः' इति च ओषधिशब्दनिर्वचने भवतः। 'सर्वास्वोषधीष्वग्निः' (मै० सं० ३।१।५), 'ओषधयो वा अग्नेर्भागधेयम् (तै० सं० ५।१।५।६) 'अग्नेर्वा एषा तनूर्यदोषधयः।' (तै० ब्रा० ३।२।५।७) इत्यादीनि श्रुतिवाक्यानि अग्नेः भेषजकर्तृकत्वे प्रमाणानि। **त्वया** तव प्रसादेन वयं **गां** गोमहिष्यादिकं पशुधनम् **अश्वं पुरुषं** भृत्यादिकं **सनेम** संभजेमहि लभेमहि। वन षण संभक्तौ। 'अग्नावग्निर्हृदा पूतं पुरस्ताद्युक्तो यज्ञस्य चक्षुरिति जुहोति' (कौ० सू० ३।१६) इति परिभाषितत्वात् पर्वाहुतौ अस्य मन्त्रस्य विनियोगः विहितः।

तथा तदग्ने कृणु जातवेदो
विश्वेभिर्देवैः सह संविदानः।
यो नो दिदेव यतमो जघास
यथा सो अस्य परिधिष्पताति ॥२॥

पदपाठः

तथा। तत्। अग्ने। कृणु। जातऽवेदः। विश्वेभिः। देवैः। सह। सम्ऽविदानः। यः। नः। दिदेव। यतमः। जघास। यथा। सः। अस्य। परिऽधिः। पताति ॥२॥

हे जातवेदः अग्ने ! विश्वेभिः सर्वैः, 'बहुलं छन्दसि' (पा० ६।१।१०) इति भिस ऐसादेशाभावः, देवैः द्योतनशीलैः यद्वा देवैः इन्द्रियैः । 'देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये' इति विश्वः । (१६३।१५) सह संविदानः ऐकमत्यं प्राप्तः सन् । तथा तेन प्रकारेण तत् शत्रुनिवारणकर्म कृणु कुरु । कृवि हिंसाकरणयोः । इदित्वात् नुम् । यथा येन प्रकारेण यः जनः नः अस्मान् दिदेव । दिवु मर्दने । चौरादिकस्य लिटि आमभावः आर्षः ममर्द । यतमः यज्जातीयः । 'वा बहूनां जातिपरिप्रश्ने उतमच्' (पा० ५।३।९३) इति यच्छब्दात् उतमच् । अस्मान् जघास । घस्लृ अदने, भक्षयामास । अस्माकं मर्दन-हनन-प्रयोजनन अभिचारकर्म कृतवान् । अस्य जनस्य तज्जातीयस्य वा स्वकीयस्य अभिचारकर्मणो निष्फलत्वेन अनाप्तकामस्य सतः सः रक्षासाधनभूतः परिधिः रक्षःपिशाचादिनिवारकः प्राकारः । परितो धीयते इति परिधिः । शत्रोरनागमनाय मृत्योर्वा निवारणाय प्राकारः इव । परिपूर्वाद् धाञः 'उपसर्गे घोः किः' (पा० ३।३।९२) इति किप्रत्ययः । पताति पतति । पत्लृ गतौ लेट् । परिधिष्पताति इति । 'इणः षः' (पा० ८।३।३९) इति विसर्जनीयस्य षत्वम् आर्षम् । 'तथा तदग्ने कृणु जातवेद इत्याज्यभागौ' (कौ०सू० ४७।९) इति कौशिकः । तस्मात् आभिचारिकेषु आज्यभागे अस्य मन्त्रस्य विनियोगः ।

यथा सो अस्य परिधिष्पताति
तथा तदग्ने कृणु जातवेदः ।
विश्वेभिर्देवैः सह संविदानः ।।३।।

पदपाठः

यथा । सः । अस्य । परिऽधिः । पताति । तथा । तत् । अग्ने । कृणु । जातऽवेदः । विश्वेभिः । देवैः । सह । सम्ऽविदानः ।।३।।

व्याख्यातोऽयं मन्त्रः । पूर्वया ऋचा ।

अक्ष्यौ नि विध्य हृदयं नि विध्य
जिह्वां नि तृन्द्धि प्र दतो मृणीहि ।
पिशाचो अस्य यतमो जघासाग्ने
यविष्ठ प्रति तं शृणीहि ।।४।।

पदपाठः

अक्ष्यौ । नि । विध्य । हृदयम् । नि । विध्य । जिह्वाम् । नि । तृन्द्धि । प्र । दतः । मृणीहि । पिशाचः । अस्य । यतमः । जघास । अग्ने । यविष्ठ । प्रति । तम् । शृणीहि ।।४।।

कौशिकेन 'चातनानामपनोदनेन व्याख्यातम्' (कौ० सू० २५।२२) इति प्रक्रम्य अस्य मन्त्रस्य पिशाचनिराकरणे विनियोगः उक्तः। यथा-'त्रपुसमुसलखदिरताष्टाधानामादधाति। अयुग्मान् खदिराञ्छङ्कूनक्ष्यौ नि वि येति पश्चादग्नेः समं भूमिं निहन्ति। एवमायसलोहान्। तप्तशर्कराभिः शयनं राशिपल्याणि परिकिरति।' (कौ० सू० २५।२२।२६) इत्यादि। हे अग्ने! **यविष्ठ** अभिचारनिरासकर्मणि बलिष्ठ! **अस्य** जनस्य नियुक्तः **यतमः** यज्जातीयः यः कोऽपि **पिशाचः** पिशिताशी भूतविशेषः राक्षसः जघास भक्षयामास, इमं जनमादिश्य तं शोषयामास तस्य **अक्ष्यौ** अक्षिणी। 'ई च द्विवचने' (पा० ६।१।६६) इति अक्षिशब्दस्य ईकारान्तादेशः। **नि** नितरां विध्य। व्यध ताडने दैवादिकः। 'ग्राहिज्या०' (पा०६।१।१६) इत्यादिना संप्रसारणम्। तस्य हृदयं नि विध्य। तस्य जिह्वां नि तृन्द्धि नाशय। उतृदिर् हिंसानादरयोः। 'श्नसोरल्लोपः' (पा० ६।४।१११) इति अकारलोपः। तस्य **दतः** दन्तान्। 'पद्दन्नोमास्०' (पा० ६।१।६३) इति दन्तस्य दतादेशः **प्र मृणीहि** प्रजहि। मृ हिंसायाम्। तं शत्रुणा नियुक्तं पिशाचं **प्रति** प्रतिगतं यथा स्यात् तथा शृणीहि घातय। शॄ हिंसायाम् क्र्यादिः। प्वादित्वात् ह्रस्वत्वम्। सम्मुखात् प्रबलं प्रहर येनासौ नश्यति।

यदस्य हृतं विहृतं यत् पराभृतमात्मनो
जग्धं यतमत् पिशाचैः।
तदग्ने विद्वान् पुनरा भर
त्वं शरीरे मांसमसुमेरयामः ॥५॥

पदपाठः

यत्। अस्य। हृतम्। विऽहृतम्। यत्। पराऽभृतम्। आत्मनः। जग्धम्। यतमत्। पिशाचैः। तत्। अग्ने। विद्वान्। पुनः। आ। भर। त्वम्। शरीरे। मांसम्। असुम्। आ। ईरयामः ॥५॥

हे अग्ने! **पिशाचैः** शत्रुप्रेरितैः **अस्य** पिशाचपीडितस्य **यत्** मांसं वा असवः वा यद्वान्यत्स्वास्थ्यकरं **हृतम्** आदत्तं, **विहृतं** विकृष्टम्। **यत्** वा **पराभृतं** दूरं नीतम्, **आत्मनः** स्वस्य देहात् **यतमत्** यदेव किञ्चिदपि **जग्धं** भक्षितम्। घस्लृ अदने। **तत्** सर्वं **विद्वान्** जानन् सन् **त्वं** हे जातवेदः! **पुनः आ भर** आहर। **अस्य शरीरे** पिशाचपीडिते शोषिते मांसादिरहिते अस्थिपञ्जरसमे जाते वयं पुनः तव प्रसादेन साहाय्येन च **मांसं** च **असुम्** असून् प्राणान् च। वचनव्यत्यय आर्षः। 'प्राणैरेष व्यृध्यते य आमयावी' (तां० ब्रा० १६।१३।२) इति ब्राह्मणम्। **आ ईरयामः** प्रेरयामः। पिशाचैः

अस्य शरीरात् हृतस्य मांसरुधिरादिकस्य तेभ्यः पुनरानयने अस्य शरीरे च पुनः स्थापने त्वां प्रेरयामः, स्तुतिकर्मणा त्वां प्रसन्नं कुर्म इत्यर्थः ।

आमे सुपक्वे शबले विपक्वे
यो मा पिशाचो अशने ददम्भ ।
तदात्मना प्रजया पिशाचा
वि यातयन्तामगदोयमस्तु ।।६।।

पदपाठः

आमे । सुऽपक्वे । शबले । विऽपक्वे । यः । मा । पिशाचः । अशने । ददम्भ । तत् । आत्मना । प्रऽजया । पिशाचाः । वि । यातयन्ताम् । अगदः । अयम् । अस्तु ।।६।।

यः पिशाचः आमे अपक्वे, आ ईषत् अम्यते पच्यते इति भावे घञ् । अपूर्णपचने रोगजनकं भवतीति आमम् अपक्वम् । तस्मात् आमः रोगः, षट्प्रकारकाजीर्णरोगमध्ये रोगविशेषो वा । **सुपक्वे** वा **शबले** पक्वापक्वे वा **विपक्वे** विकृतपक्वे वा **अशने** भोजने **मा** मां **ददम्भ** अजिघांसत् । 'पाप्मनैष गृहीतो य आमयावी' (का० सं० १३।२) इति 'रक्षांस्येतं सचन्ते य आमयावी' (का० सं० १०।५) इति च श्रुतिः । दम्भयतिर्वधकर्मा इति यास्कः (निघ० २।१९) । **तद्** तस्य दम्भनकर्म सः **आत्मना** स्वयं वा स्वस्य **प्रजया** स्वसृष्टया वा पुत्रपौत्रादिलक्षणया वा न केवलं सः किन्तु सर्वेऽपि तज्जातीयाः सवंशमूलाः पिशाचाः **वि** दूरं **यातयन्ताम्** अपगमयन्तु । यती प्रयत्ने इत्यस्य ण्यन्तस्य लट् । **अयं** पिशाचपीडितः जनः **अगदः** अरोगः पिशाचप्रेरितरोगमुक्तः **अस्तु** भवतु ।

क्षीरे मा मन्थे यतमो ददम्भा-
कृष्टपच्ये अशने धान्ये यः ।
तदात्मना प्रजया पिशाचा
वि यातयन्तामगदोयमस्तु ।।७।।

पदपाठः

क्षीरे । मा । मन्थे । यतमः । ददम्भ । अकृष्टऽपच्ये । अशने । धान्ये । यः । तत् । आत्मना । प्रऽजया । 'पिशाचाः । वि । यातयन्ताम् । अगदः । अयम । अस्तु ।।७।।

यतमः पिशाचः क्षीरे क्षरणशीले अभिनवे पयसि वा पयःसंपन्ने अशने भोज्ये वा मन्थे मथिते विलोडिते। मन्थ विलोडने। दधिमन्थादिपयोविकाररूपे भोज्ये वा ददम्भ जघान आमयं प्रावशयत्। यः वा पिशाचः अकृष्टपच्ये कर्षण विनापि स्वयमेव उत्पद्यमाने। 'श्यामाकाश्चैव नीवाराः जर्तिलाः सगवेधुकाः। कोविदारसमायुक्तास्तथा वेणुयवाश्च ये।' इत्यारण्यानि क्षुद्रधान्यानि। धान्ये वा व्रीहियवादिके कृषिप्राप्ते। धाने पोषणे साधु इति 'तत्र साधु' (पा० ४।४।९८) इति यत्। 'धान्य तु व्रीहौ धान्याके' इति हैमः (२।३७२)। 'सस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते' इति वाचस्पत्यम्। अशने ददम्भ इति। 'अप वा एतस्मादन्नाद्यं क्रामति य आमयावी।' (तां० ब्रा० १६।१३।३) इति हि ब्राह्मणम्। तथा हि— अपां पाने वा अन्नाद्यशने वा अतिक्रमणेन रोगः उत्पद्यते। शेषं पूर्ववत्।

अपां मा पाने यतमो ददम्भ
क्रव्याद्यातूनां शयने शयानम्।
तदात्मना प्रजया पिशाचा
वि यातयन्तामगदोयमस्तु ॥८॥

पदपाठः

अपाम्। मा। पाने। यतमः। ददम्भ। क्रव्यऽअत्। यातूनाम्। शयने। शयानम्। तत्। आत्मना। प्रऽजया। पिशाचाः। वि। यातयन्ताम्। अगदः। अयम्। अस्तु।

यातूनां हिंसकानां राक्षसानां यातुधानानां यतमः क्रव्याद् क्रव्य मांसम् अत्तीति क्रव्यशब्दोपपदाद् अत्तेः 'क्रव्ये च' (पा० ३।२।६९) इति विट्प्रत्ययः। पिशितादिभक्षकः। शयने शयानं रोगाविष्टं मा माम् अपां पाने ददम्भ। शेषं पूर्ववत्।

दिवा मा नक्तं यतमो ददम्भ
क्रव्याद्यातूनां शयने शयानम्।
तदात्मना प्रजया पिशाचा
वि यातयन्तामगदोऽयमस्तु ॥९॥

पदपाठः

दिवा। मा। नक्तम्। यतमः। ददम्भ। क्रव्यऽअत्। यातूनाम्। शयने। शयानम्। तत्। आत्मना। प्रऽजया। पिशाचाः। वि। यातयन्ताम्। अगदः। अयम् अस्तु ॥९॥

पूर्वमन्त्रवत् सर्वं स्पष्टम्।

क्रव्यादमग्ने रुधिरं पिशाचं
मनोहनं जहि जातवेदः ।
तमिन्द्रो वाजी वज्रेण हन्तु
छिनत्तु सोमः शिरो अस्य धृष्णुः ॥१०॥

पदपाठः

क्रव्यऽअदम् । अग्ने । रुधिरम् । पिशाचम् । मनःऽहनम् । जहि । जातऽवेदः । तम् । इन्द्रः । वाजी । वज्रेण । हन्तु । छिनत्तु । सोमः । शिरः । अस्य । धृष्णुः ॥१०॥

हे अग्ने ! जातवेदः ! क्रव्यादं रुधिरं रुधिरवर्णं लोहितं पिशाचं मनोहनम् मनु अवबोधने, इत्यस्मात् अपादाने असुन्प्रत्ययः । मनःशब्दोपपदात् हन्तेः 'बहुलं छन्दसि' (पा० ३।२।८८) इति क्विप् । मनसो हन्तारम् । निरुत्साहनिर्वेदकरम् इति यावत्, जहि नाशय । वाजी बलवान् । वाज इति बलनाम तद्वान् इन्द्रः वज्रेण कुलिशेन तं क्रव्यादं हन्तु नाशयतु । धृष्णुः धर्षकः शत्रूणां हिंसने प्रगल्भः । ञिधृषा प्रागल्भ्ये । 'त्रिसिगृधिधृषिक्षिपेः क्नुः' (पा० ३।२।१४०) इति क्नुप्रत्ययः । सोमः अस्य पिशाचस्य शिरः छिनत्तु । सर्वे देवाः तं नाशयन्तु इत्यर्थः ।

सनादग्ने मृणसि यातुधानान्
न त्वा रक्षांसि पृतनासु जिग्युः ।
सहमूराननु दह क्रव्यादो मा
ते हेत्या मुक्षत दैव्यायाः ॥११॥

पदपाठः

सनात् । अग्ने । मृणसि । यातुऽधानान् । न । त्वा । रक्षांसि । पृतनासु । जिग्युः । सहऽमूरान् । अनु । दह । क्रव्यऽअदः । मा । ते । हेत्याः मुक्षत । दैव्यायाः ॥११॥

यद्यपि एषा ऋक् प्राग् व्याख्याता तथापि व्यवहितत्वात् पुनर्व्याख्यायते । हे अग्ने ! त्वं सनात् चिरकालप्रभृति यातुधानान् राक्षसान् मृणसि हंसि । तथापि त्वा त्वां रक्षांसि केऽपि राक्षसाः पृतनासु संग्रामेषु न जिग्युः न जितवन्तः । अतस्त्वं क्रव्यादः मांसाशनान् राक्षसान् सहमूरान् मूलसहितान् अनु दह क्रमेण भस्मीकुरु । तेऽपि दैव्यायाः देवस्य तव संबन्धिन्याः ते तव हेत्याः आयुधात् मा मुक्षत मुक्ता मा भूवन् तद्वशं प्राप्नुवन्तु ।

समाहर जातवेदो यद् धृतं यत् पराभृतम् ।
गात्राण्यस्य वर्धन्तामंशुरिवाप्यायतामयम् ॥१२॥

पदपाठः

सम्ऽआहर । जातऽवेदः । यत् । हृतम् । यत् । पराऽभृतम् । गात्राणि । अस्य । वर्धन्ताम् । अंशुःऽइव । आ । प्यायताम् । अयम् ॥१२॥

हे **जातवेदः** ! **यद्** अस्य गात्रेभ्यः रुधिरमांसादिकं पिशाचैः **धृतं** हृतं **यत्** च **पराभृतं** दूरं नीतं तत् सर्वं **समाहर** पुनरानय येन **अस्य** रोगपिशाचपीडितस्य **गात्राणि** अस्थिपञ्जरावशेषाणि **वर्धन्तां** वृद्धिम् आप्नुवन्तु । **अयं** जनः **अंशुः इव** एककलात्मकः सोमः इव **आप्यायतां** वर्धताम् । यथा शुक्लपक्षे देवानामेकैककला-प्रदानेन सोमः वर्धते तथैव अयमपि वर्धताम् ।

सोमस्येव जातवेदो अंशुराप्यायतामयम् ।
अग्ने विरप्शिनं मेध्यमयक्ष्मं कृणु जीवतु ॥१३॥

पदपाठः

सोमस्यऽइव । जातऽवेदः । अंशुः । आ । प्यायताम् । अयम् । अग्ने । विऽरप्शिनम् । मेध्यम् । अयक्ष्मम् । कृणु । जीवतु ॥१३॥

हे **अग्ने** ! **जातवेदः** ! **अयं सोमस्य अंशुः इव आप्यायताम्** । इमं **विरप्शिनं** विरप्शी विरपणशीलो भुजास्फालनेन युद्धार्थं शत्रूणामाह्वानकारी । यद्वा विविधं रपणं स्तुतिलक्षणं यस्येति । सर्वैः स्तुत्यः इत्यर्थः । एतादृशं बलिष्ठम्, **मेध्यं** मेधार्हम् । मेधो यज्ञः तदर्हं पवित्रं निरामयत्वेन निर्मलम् । मेधः इत्यस्मात् 'छन्दसि च' (पा० ५।१।६९) इति यत्प्रत्ययः । **अयक्ष्मं** यक्ष्मारणा, वा यक्ष्मोपलक्षितेन केनापि महारोगेण रहितम् इमं तथा **कृणु** यथायं **जीवतु** ।

एतास्ते अग्ने समिधः पिशाचजम्भनीः ।
तास्त्वं जुषस्व प्रति चैना गृहाण जातवेदः ॥१४॥

पदपाठः

एताः । ते । अग्ने । सम्ऽइधः । पिशाचऽजम्भनीः । ताः । त्वम् । जुषस्व । प्रति । च । एनाः । गृहाण । जातऽवेदः ॥१४॥

हे **अग्ने** ! **ते** तव **एताः समिधः** समिन्धनाः **पिशाचजम्भनीः** पिशाचजम्भन्यः । जभि नाशने । पिशाचान् जम्भयन्ति इति एताः । हे **जातवेदः** ! **त्वं ताः जुषस्व** प्रीत्या सेवस्व । **एनाः च प्रतिगृहाण** ।

तार्ष्टाधीरग्ने समिधः प्रति गृह्णाह्यर्चिषा ।
जहातु क्रव्याद्रूपं यो अस्य मांसं जिहीर्षति ॥१५॥

पदपाठः

तार्ष्टऽअघीः । अग्ने । सम्ऽइधः । प्रति । गृह्णाहि । अर्चिषा । जहातु । क्रव्यऽअत् । रूपम् । यः । अस्य । मांसम् । जिहीर्षति ॥१५॥

हे **अग्ने** ! तव **अर्चिषा** ज्वालाभिः इमाः **तार्ष्टाघीः** । तृष्टं तृषाजनकं तीव्रं दाहकं तस्यायं तत्संबन्धी वा यः पिशाचः तार्ष्टः, तस्य कृते अघकारिण्यः, ताः । तथा च श्रुतिः-'एतौ तर्हि असुराणां ब्राह्मणौ आस्तां तृष्टावरुत्री ।' (मै० सं० ४।८।१) इति । **समिधः** समिन्धनाः **प्रति गृह्णाहि** । ग्रहेर्लोटि सिपो हिरादेशः । 'हलः श्नः शानज्झौ' (पा० ३।१।८३) इति शानजादेशो व्यत्ययेन न प्रवर्तते । 'वा छन्दसि' (पा० ३।४।८८) इति हेः पित्त्वेन ङित्त्वस्य निवर्तनात् 'ई हल्यघोः' (पा० ६।४।११३) इति ईत्वमपि न भवति । प्रतिगृहाण स्वीकुरु । **यः क्रव्याद् अस्य मांसं जिहीर्षति** हर्तुम् इच्छति सः **रूपम्** आकारं **जहातु** त्यजतु ।



त्रिंशं सूक्तम्

सप्तदशर्चस्यास्य सूक्तस्योन्मोचन ऋषिः । मन्त्रोक्ता आयुश्च देवताः । प्रथमर्चः पथ्या पङ्क्तिः द्वितीयादिसप्तानां दशम्येकादशीत्रयोदशी-पञ्चदशी-षोडशीनाञ्चानुष्टुप्, नवम्या भुरिगनुष्टुप्, द्वादश्याश्चतुष्पदा विराड्जगती, चतुर्दश्या विराट्प्रस्तारपङ्क्तिः, सप्तदश्याश्च त्र्यवसाना षट्पदा । जगती छन्दांसि ।

'आवतस्ते' इति सूक्तस्य अंहोलिङ्गगणे पाठात् तस्य गणस्य यत्र यत्र सर्वभैषज्यादिषु विनियोगः उक्तस्तत्र सर्वत्र विनियोगोऽनुसन्धेयः । अस्य विस्तरस्तु 'अक्षीभ्याम्' (अ० २।३३) इत्यत्र उक्तः तथा अनेन सूक्तेन उपनयनानन्तरम् आयुष्कामं माणवकम् अभिमृश्य अभिमन्त्रयेत । सूत्रितं हि 'उत देवाः' (अ० ४।१३) 'आवतस्ते' (अ० ५।३०) इत्यादि । 'इत्यभिमन्त्रयते' (कौ० सू० ५८।११) इत्यन्तम् । तथा ऋषिहस्ते माणवकशरीराभिमन्त्रेऽपि एतत् सूक्तम् । सूत्रितं हि- 'उत देवाः (अ० ४।१३) 'आवतस्ते' (अ० ५।३०) इत्यादि'इत्यभिमन्त्रयते ।' (कौ० सू० ५८।११) इत्यन्तम् । तथा अस्य सूक्तस्य पिष्टरात्रीकल्पे सर्षपाभिमन्त्रेणानन्तरं जपे विनियोगः । तदुक्तं परिशिष्टे 'अथातः पिष्टरात्र्याः कल्पं व्याख्यास्यामः इति प्रक्रम्य 'सर्षपान् अभिमन्त्र्य आवतस्ते इति जपन् (अ० प० ६।१।१-१०) इति ।

आवतस्त आवतः परावतस्त आवतः ।
इहैव भव मा नु गा मा पूर्वाननु गाः
पितॄनसुं बध्नामि ते दृढम् ॥१॥

पदपाठः

आऽवतः । ते । आऽवतः । पराऽवतः । ते । आऽवतः । इह । एव । भव । मा । नु । गाः । मा । पूर्वान् । अनु । गाः पितॄन् । असुम् । बध्नामि । ते । दृढम् ॥१॥

हे पुरुष ! ते तव **आवतः आवतः** समीपादपि समीपतराद् देशात्, पुनश्च **ते** तव **परावत आवतः** परादपि परतराद्देशात् दूरादपि दूरतराद्देशादाहृत्य **ते असुं** प्राणम् अस्मिंस्ते शरीरे **दृढं बध्नामि** । **इहैव** अस्मिन्नेव तव शरीरे **भव** स्थिरस्तिष्ठ। **पूर्वान् मा अनु गाः** तव पूर्वजा ये मृतास्तान्मानुगमः,ताननु मा म्रियस्व । **पितॄन्** जीवतः पितृपितामहादीनपि मानुगाः । मा बाल्ये वयसि मृथाः । आवतः परावत इत्यत्र "उपसर्गाच्छन्दसि धात्वर्थे (पा० ५।१।११८) इति वतिः ।

यत् त्वाभिचेरुः पुरुषः स्वो यदरणो जनः ।
उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥२॥

पदपाठः

यत् । त्वा । अभिऽचेरुः । पुरुषः । स्वः । यत् । अरणः । जनः । उन्मोचनप्रमोचने इत्युन्मोचनऽप्रमोचने । उभे इति । वाचा । वदामि । ते ॥२॥

यद् यदि **स्वः पुरुषः** तव बन्धूनां कश्चित्पुरुषः **यद्वा अरणो जनः** असम्बद्धो जनः परकीय इति यावत् । ते सर्वे स्वजनाः परे वा **त्वा** त्वाम् **अभिचेरुः** त्वां मारयितुमभिचारं कृतवन्तः, तस्याभिचारस्य निवृत्तय **उभे उन्मोचनप्रमोचने** अभिचार-बन्धनाद् मोक्षकारिणं मन्त्रं तथा च यस्मात्कस्माच्चिदपि अभिचारान्मोक्षकारिणं मन्त्रं **ते** त्वत्कृते त्वां मोचयितुं **वाचा वदामि** उच्चैर्घोषेण वदामि । तेन त्वम् अभिचारान्मुक्तो भविष्यसि । अरणोऽपगतोदक-सम्बन्धःपुरुषः । ऋ गतौ भ्वादेः औणादिकः असुन्, "उदके नुट् च" (उ० ४।१५७) इति नुडागमः । अर्णं एवारणम् । तन्नास्ति अस्य सोऽरणः ।

यद् दुद्रोहिथ शेपिषे स्त्रियै पुंसे अचित्त्या ।
उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥३॥

पदपाठः

यत् । दुद्रोहिथ । शेपिषे । स्त्रियै । पुंसे । अचित्त्या । उन्मोचनप्रमोचने इत्युन्मोचनऽप्रमोचने । उभे इति । वाचा । वदामि । ते ॥३॥

यद् यदि त्वम् अचित्त्या अबोधपूर्वम् अज्ञानात् कस्यैचित् स्त्रियै वा पुंसे पुरुषाय स्त्रियं पुरुषम् अधिकृत्य **दुद्रोहिथ** अनिष्टचिन्तनरूपं द्रोहं कृतवान् यद्वा **शेपिषे** शप्तवान् शापमुक्तवान् वा ततः तज्जनिताद् दोषादात्मानं मोचयितुम् अन्यस्माच्चैतादृशाद्दोषान्मोचयितुम् अहं ते अनया मन्त्रवाचा उपायम् उपदिशामि इति सर्वं पूर्ववत् ।

यदेनसो मातृकृताच्छेषे पितृकृताच्च यत् ।
उन्मोचनप्रमोचने उभे वाचा वदामि ते ॥४॥

पदपाठः

यत् । एनसः । मातृऽकृतात् । शेषे । पितृऽकृतात् । च । यत् । उन्मोचनप्रमोचने इत्युन्मोचनऽप्रमोचने । उभे । इति । वाचा । वदामि । ते ॥४॥

यद् यदि त्वं **मातृकृताद् एनसः** मात्रा आचरितस्य पापस्य कारणात् यद्वा **पितृकृतात्** पित्रा आचरितस्य पापस्य कारणात् त्वं आर्तः **शेषे** तदा तस्मादप्येनसो मुक्तेरिति पूर्ववदन्यत् ।

यत् ते माता यत् ते पिता जामिर्भ्राता च सर्जतः ।
प्रत्यक् सेवस्व भेषजं जरदष्टिं कृणोमि त्वा ॥५॥

पदपाठः

यत् । ते । माता । यत् । ते । पिता । जामिः । भ्राता । च । सर्जतः । प्रत्यक् । सेवस्व । भेषजम् । जरत्ऽअष्टिम् । कृणोमि । त्वा ॥५॥

यद् यदौषधं तव रोगनिवारणाय ते माता ते पिता वा सर्जतः आप्तैः संमन्त्र्य निर्मिमाते यद्वा औषधं ते जामिः भगिनी ते भ्राता सहोदरः सृजतः तत्ते व्याधिनिवारणक्षमं प्रत्यक् प्रत्यक्षमनुभूयमानं सुखावहं च भवति अतस्तद् भेषजम् ओषधं सेवस्व सावधानतया गृहाण । एतेनौषधेन मत्प्रयुक्तेन च मन्त्रेणाहं त्वा जरदष्टिं जरायां वार्धक्येऽपि कार्यक्षमं स्वस्थं कृणोमि । अनेन त्वं दीर्घजीवी स्वस्थश्च भविष्यसि । "जामिः अन्येऽस्यां जनयन्ति जाम् अपत्यम् इति जामिर्भगिनी । जमतेर्वा स्याद् गतिकर्मणः निर्गमनप्राया' (निरु० ३।१।६)। भ्राता भरतेर्हरतिकर्मणो हरते भागं भर्तव्यो भवतीति वा । पितृरिक्थस्य भागहर्ता इति च ।

इहैधि पुरुष सर्वेण मनसा सह ।
दूतौ यमस्य मानु गा अधि जीवपुरा इहि ॥६॥

पदपाठः

इह । एधि । पुरुष । सर्वेण । मनसा । सह । दूतौ । यमस्य । मा । अनु । गाः । अधि । जीवऽपुराः । इहि ॥६॥

हे पुरुष ! **सर्वेण मनसा सह इह एधि** अस्मिल्लोकेऽस्माभिः स्वजनैः सह एधि भव निवस । मा रोगभयमभिचारभयं वा मनसि कृत्वा उन्मनीभूः । **यमस्य दूतौ** जीवापहारकौ श्वानौ श्यामशबलौ **मानुगाः** तौ मानुगमः । मा म्रियस्वेति । इहास्मिल्लोके जीवपुराः जीवानां पुरः भोगायतनानि शरीराणि, निवासभूमीः ग्रामजनपदाद्या वा जीवपुराः तासु । मध्ये स्वजनैः सह **अधि इहि** प्राप्नुहि निवस । जीवपुराः "ऋक्पूरब्धूःपथामानक्षे ।" (पा० ५।४।७४) इति समासान्तः अः ।

अनुहूतः पुनरेहि विद्वानुदयनं पथः ।
आरोहणमाक्रमणं जीवतोजीवतोयनम् ॥७॥

पदपाठः

अनुऽहूतः । पुनः । आ । इहि । विद्वान् । उत्ऽअयनम् । पथः । आऽरोहणम् । आऽक्रमणम् । जीवतःऽअजीवतः । अयनम् ॥७॥

हे पुरुष ! **अनुहूतः** रोगकारणादभिचारप्रभावाद् वा मुमूर्षुः अस्मान उज्झित्वा गच्छन् अनेनायुष्येन मन्त्रेणास्माभिः अनु पृष्ठतः आहूतः **पुनरेहि** निवृत्य पुनरस्मासु मध्ये भव, जीवेत्यर्थः । यतस्त्वं **पथः उदयनम्** उत्तरायणेन गमनं **विद्वान्** असि ज्ञातवानसि । स मार्गो मुमुक्षुणा त्वया दृष्टः । अतस्त्व निवर्तस्व । **आरोहणम्** उन्नतपदाधिष्ठानम् **आक्रमणं** प्रयत्नपूर्वकं पुरोगमनं च **जीवतः जीवतः** प्रत्येक-प्राणिनः **अयनं** गतिः । जीवतो जन्तोः प्रगतिसाधनं पुरोगमनं च निर्मितमव । अतस्त्वं मुमूर्षां त्यक्त्वा जीवेति भावः ।

मा बिभेर्न मरिष्यसि जरदष्टिं कृणोमि त्वा ।
निरवोचमहं यक्ष्ममङ्गेभ्यो अङ्गज्वरं तव ॥८॥

पदपाठः

मा । बिभेः । न । मरिष्यसि । जरत्ऽअष्टिम् । कृणोमि । त्वा । निः । अवोचम् । अहम् । यक्ष्मम् । अङ्गेभ्यः । अङ्गऽज्वरम् । तव ॥८॥

हे पुरुष ! **मा बिभेः** रोगस्याभिचारस्य भयं त्वया न कार्यम्। यतस्त्वं न मरिष्यसि । मया प्रयुक्तस्यौषधस्य मन्त्रस्य च प्रभावेन न मृत्युस्त्वामाक्रमिष्यति । त्वा त्वामहं **जरदष्टिं** वार्धक्येऽप्यरोगं कार्यक्षमं च **कृणोमि** । येन यक्ष्मरोगेण अङ्गज्वरेण च त्वं पीड्यसे तं **यक्ष्मं** तज्जनितं **च** अङ्गज्वरं तवाङ्गेभ्यः अहं **निरवोचम्** । तव अङ्गेभ्यो निर्गन्तुं मन्त्रबलेनाहं तावाज्ञापयम् । त्वमतः परं नीरोगः भविष्यसि ।

अङ्गभेदो अङ्गज्वरो यश्च ते हृदयामयः ।
यक्ष्मः श्येन इव प्रापप्तद् वाचा साढः परस्तराम् ॥९॥

पदपाठः

अङ्गऽभेदः । अङ्गऽज्वरः । यः । च । ते । हृदयऽआमयः । यक्ष्म. । श्येनःऽइव । प्र । अपप्तत् । वाचा । साढः । परःऽतराम् ॥९॥

हे पुरुष ! **यस्ते** शरीरे **अङ्गभेदः** वातादिरोगजनिता अवयवाना पीडा, **अङ्गज्वरः** अन्तस्तापरूपेणाङ्गेषु वर्तमानो ज्वरः, **यश्च ते हृदयामयः** रक्ताभिसरणस्य क्षैप्र्यमान्द्यादिजनितो हृदयरोगः यश्च **यक्ष्मः** शरीरं शनैःशनैः क्षपयन्नन्तकरो राजरोगः स सर्वो रोगो **वाचा** मया प्रयुक्तस्य रोगनिवारणक्षमस्य मन्त्रस्य उच्चारणप्रभावन **साढः** सोढः पराजितः सन् **परस्तरां** दूरतर **श्येन इव** श्येनो यथा वेगेन प्रपतन् दूरतरं देशं गच्छति तद्वत् परस्तरां **प्रापप्तत्** अतिदूरमुड्डीय महता वगेन गच्छतु । हृदयामयः ह्रियते विषयैरिति हृदयम् । हृञ् हरणे भ्वादेः "वृह्रोः षुग्दुकौ च" (उ० ४।१००) इति कयन् दुगागमश्च । आमयः अमतेः भावे घञ् । अथवा आमं यान्त्यनेन । या प्रापणे इत्यस्माद् "अन्येष्वपि दृश्यते ।" (पा० ३।२।१०१) इति डः यद्वा आङ्-पूर्वात् मीङ् हिसायां दिवादेः 'एरच्' (पा० ३।३।५६) अथवा 'पुंसि संज्ञाया घः प्रायेण' (पा० ३।३।११९) इति घः ।

ऋषी बोधप्रतीबोधावस्वप्नो यश्च जागृविः ।
तौ ते प्राणस्य गोप्तारौ दिवा नक्तं च जागृताम् ॥१०॥

पदपाठः

ऋषी इति । बोधऽप्रतीबोधौ । अस्वप्नः । यः । च । जागृविः । तौ । ते । प्राणस्य । गोप्तारौ । दिवा । नक्तम् । च । जागृताम् ॥१०॥

यौ इमौ **बोधप्रतिबोधौ** बोधो ज्ञानं प्रतिबोधश्च ज्ञानस्य यथाकालं यथायथं स्मरणं तौ स्मृत्यनुभवरूपौ **ऋषी** सर्वस्य द्रष्टारौ **यश्च** तयोरेकः **अस्वप्नः** न स्वपिति

सः सततजागरणशीलः यश्चान्यो जागृविः निद्रां परिहृत्य जागरणस्वभावः तौ बोधप्रतिबोधौ ऋषी ते तव प्राणस्य गोप्तारौ रक्षितारौ सन्तौ दिवा दिवसे नक्तं रात्रौ च सततं जागृताम्। मत्प्रयुक्तमन्त्रजनिते शक्ती स्मृतिप्रभारूपे त्वां सतत रक्षताम्। ऋषिर्दर्शनात्। "पश्यति ह्यसौ सूक्ष्मानथान्। स्तोमान् ददर्शेत्यौपमन्यवः। मन्त्राः स्तोमाः तानसौ तारकेण ज्ञानेन पश्यतीत्योपमन्यवः।" इति निरुक्त-(२।३।२) टीकायां दुर्गः। जागृविः जागर्तेः "जॄ॰शॄ॰स्तॄ॰जागृभ्यः क्विन्।" (उ० ४।५५)।

अयमग्निरुपसद्य इह सूर्य उदेतु ते।
उदेहि मृत्योर्गम्भीरात्
कृष्णाच्चित् तमसस्परि ॥११॥

पदपाठः

अयम्। अग्निः। उपऽसद्यः। इह। सूर्यः। उत्। एतु। ते। उत्ऽएहि। मृत्योः। गम्भीरात्। कृष्णात्। चित्। तमसः। परि ॥११॥

अयं साक्षाद् वेदिस्थः अग्निः तव उपसद्यः समीपे उपविश्याग्निहोत्रादिना सेवनीयः तं सेवस्व। प्रतिदिनम् इह अस्मिन्नेव ते निवासे सूर्यः उदेतु इहैव ते सुखेन दिवसा यान्तु। गम्भीरात् अतिगहनात् कृष्णात् तमसः परि तत्पराजित्य तमःपूर्णात् मृत्योः गतात्। उदेहि उपर्यागच्छ रोगजनितां मूर्च्छां त्यक्त्वोत्तिष्ठ। मूर्च्छां मृत्युं च मन्त्रणानेन विजित्य प्रतिबुध्यस्वेति।

नमो यमाय नमो अस्तु मृत्यवे
नमः पितृभ्य उत ये नयन्ति।
उत्पारणस्य यो वेद तमग्निं
पुरो दधेस्मा अरिष्टतातये

पदपाठः

नमः। यमाय। नमः। अस्तु। मृत्यवे। नमः। पितृऽभ्यः। उत। ये। नयन्ति। उत्ऽपारणस्य। यः। वेद। तम्। अग्निम्। पुरः। दधे। अस्मै। अरिष्टऽतातये ॥१२॥

नमो यमाय मृत्यवे यमकिंकरायापि नमः अस्तु। पितृभ्यो नमः पूर्वजेभ्यः। उत अपि च ये अस्मद्वृद्धाः सदुपदेशेनास्मान् नयन्ति सन्मार्गं दर्शयन्ति तेभ्योऽपि नमः। सर्व एते पुरुषस्यास्य सौख्यकरा भवन्तु। अस्मै शान्तिकर्महेतुभूताय अरिष्टतातये

रिष्टं हिंसनं तदभावः अरिष्टम् । तस्मै अस्य क्षेमाय इमम् अग्निं यः उत्पारणस्य तस्य संसारसागरपारकरणस्य । द्वितीतार्थे षष्ठी । पारकरणं यो वेद जानाति तमग्निं पुरोदधे अस्माकं प्रेरकरूपेणाग्रतः वेद्यां स्थापयामि । यद्वा तं मार्गदर्शकम् अग्रयायिनं करोमि । सोऽस्मान् रक्षिष्यति । अरिष्टतातये "शिवशमरिष्टस्य करे" (पा० ४।४।१४३) इति तातिल् ।

ऐतु प्राण ऐतु मन ऐतु चक्षुरथो बलम् ।
शरीरमस्य सं विदां तत् पद्भ्यां प्रति तिष्ठतु ।।१३।।

पदपाठः

आ । एतु । प्राणः । आ । एतु । मनः । आ । एतु । चक्षुः । अथो इति । बलम् । शरीरम् । अस्य । सम् । विदाम् । तत् । पत्ऽभ्याम् । प्रति । तिष्ठतु ।

अस्य रुग्णस्य प्राणः जीवनशक्तिः तस्य शरीरे आ एतु पुनरागच्छतु । तस्य मनः सङ्कल्पविकल्पात्मिका शक्तिरपि ऐतु तं पुनः प्राप्नोतु । अथो तदनन्तरं चक्षुः दर्शनम्, चक्षुरुपलक्षणम् । सर्वाणि ज्ञानेन्द्रियाणि चक्षुःश्रोत्रादीनि पुनरेनं प्राप्नुवन्तु । अस्य रुग्णस्य शरीरं समग्रं विदां वेदनां सर्वप्रकारकं ज्ञानं प्रति संतिष्ठतु संस्थितं भवतु । स्थिरतया ज्ञानं गृहीत्वा वेवेक्तु । तच्च शरीरं पुनः बलवद् भूत्वा पद्भ्यां प्रतितिष्ठतु पुनर्गमनसमर्थं भवतु । पद्भ्यामित्युपलक्षणम् । सर्वाण्यस्य कर्मेन्द्रियाणि स्वस्वकर्मसमर्थानि भवन्त्विति । विदां वेदनाम् । विद् ज्ञाने अदादेः "षिद्भिदादिभ्योऽङ्" (पा० ३।३।१०४) इत्यङ् टाप् च ।

प्राणेनाग्ने चक्षुषा सं सृजेमं समीरय तन्वा सं बलेन ।
वेत्थामृतस्य मा नु गान्मा नु भूमिगृहो भुवत् ।।१४।।

पदपाठः

प्राणेन । अग्ने । चक्षुषा । सम् । सृज । इमम् । सम् । ईरय । तन्वा । सम् । बलेन । वेत्थ । अमृतस्य । मा । नु । गात् । मा । नु । भूमिगृहः । भुवत् ।।१४।।

हे अग्ने ! रुग्णम् इमं प्राणेन सं सृज । तस्मिन् प्राणं पुनर्धेहि । चक्षुषा सं सृज । तं चक्षुरादिभिर्ज्ञानेन्द्रियैः संयोजय । सर्वाण्यस्य ज्ञानेन्द्रियाणि स्वकर्मक्षमाणि भवन्तु । इमं रोगिणं तन्वा समीरय शरीरक्रियानिर्वर्त्तनसमर्थं कुरु । तं बलेन समीरय । बलमाधाय तं प्रवर्तय । सर्वमेतत् त्वत्त आशास्महे यतस्त्वम् अमृतस्य वेत्थ । पुरुषो येनामृतो भवति तत् सर्वं त्वं जानासि । अयं रुग्णः मा अनुगात् ।

मृतान् पूर्वजान् मा अनुगच्छतु । मा म्रियताम् । मा भूमिगृहो भुवत् नु नु इति आशंसायाम्, मृत्वा चितास्थितशरीरो भूमिमेव गृहं कुर्वन् न भवतु । यद्वा दग्धशरीरः भस्मरूपेण भूमिष्ठो न भवतु । माऽस्य शरीरं नश्यतु ।

मा ते प्राण उप दसन्मो अपानोऽपि धायि ते ।
सूर्यस्त्वाधिपतिर्मृत्योरुदायच्छतु रश्मिभिः ॥१५॥

पदपाठः

मा । ते । प्राणः । उप । दसत् । मो इति । अपानः । अपि । धायि । ते । सूर्यः । त्वा । अधिऽपतिः । मृत्योः । उत्ऽआयच्छतु । रश्मिऽभिः ॥१५॥

हे रुग्ण ! ते तव प्राणः मा उपदसत् मा उपक्षीयताम् । प्राणस्य श्वसनं मा रुध्यताम् । श्वसनं जीवतो लक्षणं तन्मा रुध्यताम् । ते तव अपानः अपि शरीरस्थो मलवाहको वायुरपानो मा अपिधायि मा रुद्धो भवतु । यतोऽपानरोधान्मृत्युः संभवति । सर्वस्य जीवजातस्य अधिपतिः सूर्यः रश्मिभिः स्वकिरणैः त्वा त्वाम् उदायच्छतु किरणैर्बद्ध्वा मृत्युमुखादुद्धरतु । "अधिद्यौर्नामास्यमृतेन विष्टा''......"विश्वे ते देवा गोप्तारः सूर्योऽधिपतिः ।" (मै० सं० २।८।१४) इति श्रुतिरपि । उपदसत् लुङि माङ्योगे अडभावः । अपिधायि कर्मणि लुङ् "सूर्यः सरतेर्वा सुवतेर्वा स्वीर्यतेर्वा ।" इति निरुक्तम् (१२।२।३) ।

इयमन्तर्वदति जिह्वा बद्धा पनिष्पदा ।
त्वया यक्ष्मं निरवोचं शतं रोपीश्च तक्मनः ॥१६॥

पदपाठः

इयम् । अन्तः । वदति । जिह्वा । बद्धा । पनिष्पदा । त्वया । यक्ष्मम् । निः । अवोचम् । शतम् । रोपीः । च । तक्मनः ॥१६॥

इयं पनिष्पदा अपनिस्पदा मम जिह्वा बद्धा इव निश्चला भूत्वा अन्तर्वदति मुखान्तर्भागे अव्यक्तं वदति । पीडानिवारणमन्त्रम् उपांशु जपतीत्यर्थः । हे जिह्वे ! त्वया सहायभूतया अहं यक्ष्मं राजरोगं क्षय निरवोचम् । अस्य रुग्णस्य शरीरान्निर्गन्तुमवोचम् । अनेन मन्त्रपाठेन यक्ष्मं निवारयामि निष्कासयामि वा । तक्मनः ज्वरस्य च शतं रोपीः कम्पप्रलयादीनि शतशः पीडाचिह्नानि अपि निरवोचम् निवारयामि । पनिष्पदा अप-नि-पूर्वात् स्पन्द किञ्चिच्चलने भौवादिकात् पचाद्यच् टाप् च । उपसर्गादेरकारस्य लोपः धातोर्नकारलोपश्च छान्दसौ । रोपीः रुप विमोहने दिवादेः घञ् ङीप् च ।

अयं लोकः प्रियतमो देवानामपराजितः ।
अस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे ।
स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ।।१७।।

पदपाठः

अयम् । लोकः । प्रियऽतमः । देवानाम् । अपराऽजितः । अस्मै । त्वम् । इह । मृत्यवे । दिष्टः । पुरुष । जज्ञिषे । सः । च । त्वा । अनु । ह्वयामसि । मा । पुरा । जरसः । मृथाः ।।१७।।

अयं लोकः मनुष्यलोकः **देवानां** सर्वेषामपि **प्रियतमो**ऽतिमात्रं प्रियो भवति । "पृथिवी वै सर्वेषां देवानामायतनम्" (मा० श० १४।३।२-४), 'इतः प्रदानाद्धि देवा यज्ञमुपजीवन्ति ।" (मै० सं० १।७।५) इति च श्रुतेः । स त्वया न त्याज्य इति । पुनश्चायं लोको देवदानवादिभिरपि **अपराजितः**, स्वतन्त्र इत्यर्थः । **यस्मै इह दिष्टः** यत्रास्मिन् लोके वस्तुं तव भाग्यं निर्मितं तत्र हे **पुरुष** ! **त्वं मृत्यवे** पूर्णायुष्यम् उषित्वा अन्ते मृत्युमुपगन्तुं **जज्ञिषे** जातोऽसि । एतज्जानन्तो वयं **त्वाम्** अकाले मृत्युमुखे पतितं त्वाम् **अनुह्वयामसि** अत्र निर्वर्तितुं पृष्ठतस्त्वां ह्वयामः । जरसः पुरा जराम-प्राप्य मा मृथाः । पूर्णायुष्यमुपभुङ्क्ष्वेति । अस्मिन् लोके जातस्य ते मृत्युस्तु निर्मित एव तथापि पूर्णायुष्यं विना मा मृथाः ।



एकत्रिंशं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य शुक्र ऋषिः । कृत्यादूषणं देवता । प्रथमादिदशर्चामनुष्टुप्, एकादश्या बृहतीगर्भानुष्टुप्, द्वादश्याश्च पथ्याबृहती छन्दांसि ।

'यां ते चक्रुः' इति सूक्तस्य कृत्याप्रतिहरणगणे पाठाद् यत्र यत्र तस्य गणस्य विनियोगस्तत्र सर्वत्रास्य सूक्तस्य विनियोगोऽनुसन्धेयः । विस्तरस्तु 'दूष्या दूषिरसि' (अ० २।११) इति सूक्ते कृतो द्रष्टव्यः ।

यां ते चक्रुरामे पात्रे यां चक्रुर्मिश्रधान्ये ।
आमे मांसे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।१।।

पदपाठः

याम् । ते । चक्रुः । आमे । पात्रे । याम् । चक्रुः । मिश्रऽधान्ये । आमे । मांसे । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ।।१।।

हे पुरुष ! ते तव अहितः यां कृत्याम् अभिचारशक्तिम् आमे पात्रे अपक्वे मृत्पात्रे अभिचारक्रियासाधनभूते चक्रुः अभिचारविधिं कृतवन्तः, तथा च यां कृत्यां मिश्रधान्ये साधनभूते चक्रुः। मिश्रधान्यं पञ्चप्रकारकं सतुषं धान्यं भावप्रकाशे यथा "शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकम्। शिम्बीधान्यं क्षुद्रधान्यमित्युक्तं धान्यपञ्चकम्। शालयो रक्तशाल्याद्याः व्रीहयः षष्टिकादयः। यवादिकं शूकधान्यं मुद्गाद्यं शिम्बिधान्यकम्। कङ्ग्वादिकं क्षुद्रधान्यं तृणधान्यं च तत्स्मृतम्।" तानि सर्वाणि मिश्राणि मिश्रधान्यम्। तस्मिन्नाहारार्थं सङ्गृहीते यां कृत्यां ते निदधुः। यां च आमे अपक्वे मनुष्यस्य पशोर्वा मांसे निदधुः तां कृत्याम् अभिचारमन्त्रजां घोरां शक्तिम् अहं मम मन्त्रबलेन पुनः प्रतिहरामि प्रयोक्तारमेव निर्वर्तितुं प्रेरयामि। कृत्या करोतेः "कृञः श च" (पा० ३।३।१००) इति चकारात् संज्ञायां क्यप्। "ह्रस्वस्य पिति कृति०" (पा० ६।१।७१) इति तुक्।

यां ते चक्रुः कृकवाकावजे वा यां कुरीरिणि।

अव्यां ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥२॥

पदपाठः

याम्। ते। चक्रुः। कृकवाकौ। अजे। वा। याम्। कुरीरिणि। अव्याम्। ते। कृत्याम्। याम्। चक्रुः। पुनः। प्रति। हरामि। ताम् ॥२॥

याम् अभिचारक्रियां ते अहिताः कृकवाकौ कुक्कुटौ तित्तिरौ वा तं साधनीकृत्य चक्रुः, यां च कृत्यां कुरीरिणि केशाच्छन्नशरीरे अजे छागे, वा अव्यां मेष्यां साधनीभूतायां चक्रुः तां कृत्यां मन्त्रबलेन पुनस्तं प्रति प्रेरयामीत्यादि पूर्ववत्। कुरीरिणि कुरीराः केशाः। केशाच्छन्नशरीर इति। करोतेः "कृञ उच्च।" (उ० ४।३४) इति ईरन्, धातोर्ऋकारस्य च उत्। तस्माद् इनिः।

यां ते चक्रुरेकशफे पशूनामुभयादति।

गर्दभे कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥३॥

पदपाठः

याम्। ते। चक्रुः। एकऽशफे। पशूनाम्। उभयादति। गर्दभे। कृत्याम्। याम्। चक्रुः। पुनः। प्रति। हरामि। ताम् ॥३॥

यां कृत्यां मारणक्रियां ते अमित्राः पशूनाम् अस्मदीयानां मध्ये एकशफे अच्छिन्नखुरयुक्ते पशौ अश्वे यद्वा उभयादति मुखे उभयत्र ऊर्ध्वाधोभागयोः दन्ता यस्य तादृशगोमहिष्यादौ यद्वा गर्दभे रासभे यां कृत्यां चक्रुः तामिति शेषं पूर्ववत्। उभयादतीति दीर्घश्छान्दसः।

यां ते चक्रुरमूलायां वलगं वा नराच्याम् ।
क्षेत्रे ते कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥४॥

पदपाठः

याम् । ते । चक्रुः । अमूलायाम् । वलगम् । वा । नराच्याम् । क्षेत्रे । ते । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ॥४॥

याम् अभिचारक्रियां ते वैरिणः अमूलायां मूलरहितायां तन्नाम्न्यां कन्दौषध्यां वा वलगम् अवलगम् अवलग्नम् अवबद्धं कृत्वा चक्रुः, वा अथवा नराच्यां तन्नाम्न्याम् ओषध्यां यद्वा क्षेत्रे सस्यभूमौ यां कृत्यां चक्रुः कृतवन्तः तामित्यन्यत् पूर्ववत् । वलगं अवपूर्वात् लगतेः पचाद्यच् पृषोदरादित्वादकारलोपः ।

यां ते चक्रुर्गार्हपत्ये पूर्वाग्नावुत दुश्चितः ।
शालायां कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥५॥

पदपाठः

याम् । ते । चक्रुः । गार्हऽपत्ये । पूर्वऽअग्नौ । उत । दुःऽचितः । शालायाम् । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ॥५॥

यां कृत्यां ते दुश्चितः अस्मासु पापबुद्धयः गार्हपत्ये अग्नौ उत अपि वा पूर्वाग्नौ आवसथ्येऽग्नौ कृतवन्तः । अथवा यां तेऽहिताः अस्माकं गार्हपत्येऽग्नौ यदि वा दुश्चितः अस्मासु पापबुद्धेः कस्यचिदहितस्य पूर्वाग्नौ यां कृत्यां चक्रुः । उत अपि च शालायां अस्मदीयनिवासशालायां अग्निहोत्रशालायां वा चक्रुः तां कृत्यां तेष्वेव प्रतिहरामि प्रति निवर्तयामीत्यादिकं पूर्ववत् ।

यां ते चक्रुः सभायां यां चक्रुरधिदेवने ।
अक्षेषु कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ॥६॥

पदपाठः

याम् । ते । चक्रुः । सभायाम् । याम् । चक्रुः । अधिऽदेवने । अक्षेषु । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ॥६॥

याम् अभिचारक्रियां ते शत्रवः सभायाम् अस्माकं मिलनस्थाने सभागृहे चक्रुः यां च अधिदेवने अक्षक्रीडादिदेवनसभायाम् अक्षेषु वा क्रीडासाधनभूतषु बिभीतकादिषु कृतवन्तः तामिति पूर्ववत् । अधिदेवने अधिदिवो अधिकरणे ल्युट् ।

यां ते चक्रुः सेनायां यां चक्रुरिष्वायुधे ।
दुन्दुभौ कृत्यां यां चक्रुः पुनः प्रति हरामि ताम् ।।७।।

पदपाठः

याम् । ते । चक्रुः । सेनायाम् । याम् । चक्रुः । इषुऽआयुधे । दुन्दुभौ । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ।।७।।

यां कृत्यां हिंसाप्रयोगं ते अस्मच्छत्रवः अस्मदीयायां सेनायां वैमनस्य-विरोधकलहात्मिकां कृत्यां चक्रुः यां च इष्वायुधे बाणाद्यायुधे अस्मदीयेषु शस्त्रास्त्रेषु वैकल्यकरणादिरूपां चक्रुः यां च अस्माकं दुन्दुभौ भेर्यां अनुत्साहजनना-दिरूपां चक्रुः तामिति प्रथमेन मन्त्रेणानुसन्धयेम् ।

यां ते कृत्यां कूपेवदधुः श्मशाने वा निचख्नुः ।
सद्मनि कृत्यां यां चक्रुः पुनः प्रतिहरामि ताम् ।।८।।

पदपाठः

याम् । ते । कृत्याम् । कूपे । अवऽदधुः । श्मशाने । वा । निऽचख्नुः । सद्मनि । कृत्याम् । याम् । चक्रुः । पुनः । प्रति । हरामि । ताम् ।।८।।

यां कृत्यां अभिचारक्रियां ते विरुद्धाः कूपे अस्माकं जलप्राप्तिस्थले जलाशये अवदधुः निचिक्षिपुः तथा चैवं जलदूषणमुत्पादितवन्तः वा अथवा अस्मानुद्दिश्य श्मशाने पितृवणे अस्मत्कुलविनाशकारिणीं कृत्यां निचख्नुः निखन्य दधुः, यद्वा सद्मनि अस्मदीये निवासगृहेऽग्निशरणे वा अस्मत्तोऽविज्ञातां यां कृत्यां चक्रुः तां तेष्वेव अभिचारकारकेषु पुनः प्रतिहरामि पुनः निवर्त्तयामि । श्मशाने, शीङ् स्वप्ने अदादेः औणादिको मानन् । पृषोदरादित्त्वाच्च श्मशानम् ।

यां ते चक्रुः पुरुषास्थे अग्नौ संकसुके च याम् ।
म्रोकं निर्दाहं क्रव्यादं पुनः प्रति हरामि ताम् ।।९।।

पदपाठः

याम् । ते । चक्रुः । पुरुषऽअस्थे । अग्नौ । सम्ऽकसुके । च । याम् । म्रोकम् । निःऽदाहम् । क्रव्यऽअदम् । पुनः । प्रति । हरामि । ताम् ।।९।।

याम् अभिचारक्रियां ते परे पुरुषास्थे मनुष्यास्थनि पुरुषास्थिक्षीणतापादकां चक्रुः । अथ च श्मशाने गृहे वा स्थिते संकसुके अग्नौ विनाशके शवदाहके वा अग्नौ

चक्रुः तां क्षयकारिणीं कृत्याम्, तं च म्रोकं चौरं चौरवत् छन्नं निर्दाहकं निःशेषेण दग्ध्वा विनाशकारिणं क्रव्यादम् आममांसभक्षक चाग्निं तेष्वेव पुनर्दधामि। पुरुषास्थे समासान्तः अच्प्रत्ययः। संकसुक संपूवात् कसुतेरदादेः 'वलेरुकः' (उ० ४।४०) छान्दसो ह्रस्वश्च। म्रोकं, म्रोचति धनादिकम् अपहृत्य छन्नः सन् गच्छति। म्रुचु गतौ "पुंसि संज्ञायां घः प्रायेण" (पा० ३।३।११८) इति व्यत्ययेन घः कर्तरि। "चजोः कु घिण्यतोः" (पा० ७।३।५२) इति कुत्वम्।

अपथेना जभारैणां तां पथेतः प्र हिण्मसि।

अधीरो मर्याधीरेभ्यः सं जभाराचित्त्या ॥१०॥

पदपाठः

अपथेन। आ। जभार। एनाम्। ताम्। पथा। इतः। प्र। हिण्मसि। अधीरः। मर्याऽधीरेभ्यः। सम्। जभार। अचित्त्या ॥१०॥

यः कश्चित् एनां कृत्यां सृष्टवान् स एनाम् अपथेन अयोग्येन सद्भिर्निन्दितेन मार्गेण आ जभार अस्मान् प्रति आनीतवान्। तां कृत्यां पथा योग्येन मार्गेण इतः अस्मत्तः अस्माद्वा स्थानात् प्र हिण्मसि प्रकृष्ट दूरं निष्कासयामः। स खलु पापः एनां कृत्यां मर्याधीरेभ्यः मर्येभ्यो धीरेभ्यः धीरान् पुरुषान् पीडयितुं स जभार प्रहितवान् तदेतदस्य कर्म अचित्त्या अज्ञानेन वृत्तम्। अतस्तां कृत्यां तं प्रत्येव निवर्तयामः।

यश्चकार न शशाक कर्तुं शश्रे पादमङ्गुरिम्।

चकार भद्रमस्मभ्यमभगो भगवद्भ्यः ॥११॥

पदपाठः

यः। चकार। न। शशाक। कर्तुम्। शश्रे। पादम्। अङ्गुरिम्। चकार। भद्रम्। अस्मभ्यम्। अभगः। भगवत्ऽभ्यः ॥११॥

यः कश्चिदेनां कृत्यां चकार अस्मद्विनाशाय प्रहितवान् स तां तथा हिंसासमर्थां कर्तुं न शशाक न स तया अस्मान् हिंसितुं समर्थोऽभूत्। अपि च अप्रयोगज्ञः सः स्वकीयमेव पादम् अङ्गुरिम् अङ्गुलिं च शश्रे शशार आहतवान्। स विफलीभूतः अभगः दौर्भाग्यवान् कृत्याकरणे विफलीभूय अस्मभ्यं भगवद्भ्यः कृत्यासंकटान्मुक्तत्वात् सुभगेभ्यः अस्मभ्यं भद्रं कल्याणमेव चकार। अमङ्गलस्थाने मङ्गलमस्माकं संवृत्तम्। शश्रे शृणातेरात्मनेपदं छान्दसम्।

अस्य मन्त्रस्यादिमं पादत्रयं सायणेन (अ० ४।१८।६) इत्यत्रैवं व्याख्यातम्- यः शत्रुः चकार कृत्यां प्रयुङ्क्ते तया कृत्यया एकं पादमेकामङ्गुलिं वा शश्रे हिनस्ति शॄ हिंसायामित्यस्माद् छान्दसो लिट्। स शत्रुः कर्तुं तथा हिंसितुं न शशाक न शक्नोतु छान्दसो लिट्। कृत्याप्रयोगतः मारणमवयवहानिं वा कर्तुम् असमर्थो भवतु इत्यर्थः। तत्कृतमभिचारकर्म अस्मभ्यं भद्रं मङ्गलं चकार। प्रतीकारमन्त्रौषधिप्रभावतः श्रेयः करोतु।

कृत्याऽकृतं वलगिनं मूलिनं शपथेय्यम्।
इन्द्रस्तं हन्तु महता वधेनाग्निर्विध्यत्वस्तया ॥१२॥

पदपाठः

कृत्याऽकृतम्। वलगिनम्। मूलिनम्। शपथेय्यम्। इन्द्रः। तम्। हन्तु। महता। वधेन। अग्निः। विध्यतु। अस्तया ॥१२॥

कृत्याकृतम् अस्मान् प्रति कृत्याप्रेरकं वलगिनं नीचमित्येके, रहसि प्रयोगकर्तारमित्यन्ये, भूमौ निखन्याच्छादकमित्यपरे। प्राकरणिकत्वात् आच्छादकमिति साधीयानर्थः, तम् मूलिनम् ओषधिमूलेनाभिचारप्रयोक्तारं शपथेय्यं शपथे साधुम्। विश्वासोत्पादनाय वृथाशपथकारिणं तम् अस्मच्छत्रुम् इन्द्रः महता वधेन अतीव विनाशकारिणा वज्रेण हन्तु हिनस्तु। अग्निः च अस्तया प्रक्षिप्तया शक्त्या ज्वालादिरूपया तं विध्यतु प्रहृत्य मारयतु।

इति अथर्ववेदे पञ्चमं काण्डं समाप्तम्।

महामण्डलेश्वर-वेददर्शनाचार्य-

स्वामिश्रीगङ्गेश्वरानन्दोदासीनलिखितानि वेदभाष्याणि

(गुरुगङ्गेश्वरग्रन्थमालायां मुद्रितानि)

१. शुक्लयजुःसंहिता-प्रथमाध्यायस्य समन्वयभाष्यम्

सम्पादकौ- आचार्यश्रीसुरजनदासः स्वामी एम० ए०
स्वामी गोविन्दानन्दो वेदान्ताचार्यश्च

२. शुक्लयजुःसंहिता-द्वितीयाध्यायस्य समन्वयभाष्यम्

सम्पादकौ- आचार्यश्रीसुरजनदासः स्वामी एम० ए०
स्वामी गोविन्दानन्दो वेदान्ताचार्यश्च

३. शुक्लयजुःसंहिता-तृतीयाध्यायस्य समन्वयभाष्यम्

सम्पादकौ- आचार्यश्रीसुरजनदासः स्वामी एम० ए०
स्वामी गोविन्दानन्दो वेदान्ताचार्यश्च

४. अथर्ववेदोयकुन्तापसूक्तस्य समन्वयभाष्यम्

सम्पादकौ- आचार्यश्रीसुरजनदासः स्वामी एम० ए०
स्वामी गोविन्दानन्दो वेदान्ताचार्यश्च

५. अथर्ववेदसंहितायाः पञ्चमकाण्डस्य अभिनवसायणभाष्यम्

सम्पादकौ- स्वामी गोविन्दानन्दो वेदान्ताचार्यः
म० म० पं० नवलकिशोरकाङ्करश्च

६. अथर्ववेदसंहितायाः नवम-दशमकाण्डयोरभिनवसायण-भाष्यम्

सम्पादकौ- स्वामी गोविन्दानन्दो वेदान्ताचार्यः
श्रीगोविन्दनरहरिवैजापुरकरसाहित्याचार्यश्च

७. अथर्ववेदसंहिताया द्वादशकाण्डस्य अभिनवसायणभाष्यम्

सम्पादकौ- स्वामी गोविन्दानन्दो वेदान्ताचार्यः
म० म० पं० नवलकिशोरकाङ्करश्च

८. अथर्ववेदसंहितायास्त्रयोदशकाण्डस्य अभिनवसायण-भाष्यम्

सम्पादकौ– स्वामी गोविन्दानन्दो वेदान्ताचार्यः
पं० नीलकण्ठाचार्यश्च

९. अथर्ववेदसंहितायाश्चतुर्दश-पञ्चदश-षोडशकाण्डानाम् अभिनवसायणभाष्यम्

सम्पादकौ– स्वामी गोविन्दानन्दो वेदान्ताचार्यः
म० म० पं० नवलकिशोरकाङ्करश्च

१०. अथर्ववेदसंहिताया विंशकाण्डस्याभिनवसायणभाष्यम्

सम्पादकौ– स्वामी गोविन्दानन्दो वेदान्ताचार्यः
म० म० पं० नवलकिशोरकाङ्करश्च

११. अथर्ववेदसंहितायाः पञ्चमकाण्डस्याभिनवसायणभाष्यम्

सम्पादकौ– स्वामी गोविन्दानन्दो वेदान्ताचार्यः
म० म० पं० नवलकिशोरकाङ्करश्च


१२. ऋग्वेद (कतिपयसूक्त) समन्वयभाष्यम्


सम्पादकौ– स्वामी गोविन्दानन्दो वेदान्ताचार्यः
स्वामी आनन्दभास्करोदासीनश्च

१३. वामनसामवेदसमन्वयभष्यम्

सम्पादकः– स्वामी गोविन्दानन्दो वेदान्ताचार्यः







 शुभसंवादः 

आचामीकृत–सर्वशास्त्रसम्पदां वेद-वरिवस्या–विहितफलेग्रहि–प्रयत्नानां महामण्डलेश्वर–सद्गुरुश्रीगङ्गेश्वरानन्दोदासीनस्वामिनां शततमवर्षायुःप्रवेश-मभिलक्ष्य तदभ्यर्हणमनुष्ठाय पूज्यपूजाव्यतिक्रमकिल्बिषादात्मानं मोचयितुं मुम्बय्यां महता समारोहेण समायोजिते जन्मशताब्दीमहोत्सवे समवेतैस्तच्चरणाम्बुज-चञ्चरीकैः सर्वैरेव सेवकैर्निरचीयत यद् आशैशवमास्थविरञ्च वेद-वेदाङ्गचर्य्या-परिचरद्भ्यच एभ्यः स्वामिमहाभागेभ्योऽचिरादेवैको वेद-वेदाङ्गविषयकैः शोधलेखैः सम्भृतस्तथैषां पावन-जीवन-ग्रन्थलेखन-विश्वभ्रमणादिवृत्तपरिचायकः स्वरूपोचितश्च सुमहानभिनन्दनग्रन्थोऽवश्यं समर्पणीयः इति । तदानीमेवेमं ग्रन्थं सम्पादयितुं लेखन-सम्पादन-गवेषणादिचणा इमे विचक्षणा अपि निरचायिषत––

श्री स्वा० अखण्डानन्दसरस्वती	डा० श्रीपट्टाभिरामशास्त्री राष्ट्रपतिसम्मानितः
श्री स्वा० योगीन्द्रानन्दोदासीनः	श्रीनवलकिशोरकाङ्करः राष्ट्रपतिसम्मानितः
श्री स्वा० सुरजनदास आचार्यः	डा० श्री बी० कृष्णस्वामी अय्यंगारः
श्री स्वा० सर्वज्ञमुनिः एम० ए०	डा० न० वी० राजगोपालनः
श्री स्वा० गोविन्दानन्दोदासीनः	डा० श्री विष्णुशर्मा शास्त्री
श्री स्वा० आनन्दभास्करोदासीनः	श्री डोरीलालोऽग्रवालः, अमर-उजाला सम्पादकः
डा० श्री विद्यानिवासमिश्रः	श्री राव दामोदर मुसलगांवकरः

एतद्ग्रन्थस्य प्रबन्धसम्पादनभारं स्वयं सहर्षं स्वीकृत्य श्रीसद्गुरूणामनन्यो-ऽनुजीवी आगरानगराभिजनः श्रीरामनारायणः अग्रवालः प्रयत्नैरनेकैः पूजनीयानां जगद्गुरूणां, मान्यानां महामण्डलेश्वराणां, प्रथिताभिधेयानां कुलपतीनां, विश्वविश्रुतिजुषां विदुषाञ्च शोधलेखान् संमजरीगृहीत, यांश्च संस्कृते, हिन्द्यामाङ्ग्लायां गवि च लिखितान् समस्तान् लेखान् सम्पादकमण्डलं पूर्णं परिश्रम्य सम्यक् सम्पादितवान् । तस्यास्याभिनन्दनग्रन्थस्य मुद्रणं साम्प्रतं प्रक्रान्तं वर्तते । विद्वद्वर–श्रीगोविन्दनरहरिवैजापुरकरसाहित्याचार्यश्चास्य प्रूफसंशोधनं करोतीति शीघ्रमेव प्रकाशमुपयातोऽयं ग्रन्थः श्रीसद्गुरुमहाराजेभ्यः ससमारोह समर्पयिष्यते ।



मण्डले प्रमुखः शिष्यो गोविन्दानन्द-सन्मुनिः ।
कुर्वेऽहं सर्वकार्याणि गुर्वाज्ञां शिरसा वहन् ॥

––––0––––